तम्। देवेभ्यः। देवत्रेति देव। त्रा। दात। शुक्रपेभ्य इति शुक्र। पेभ्यः। येषाम्। भागः।

स्थ। स्वाहा॥२७॥ कार्षिः। असि। समुद्रस्य। त्वा। अक्षित्यै। उत्। नयामि। सम्। आपः। अ
द्भिरित्यत्। भिः। अग्मत। सम्। ओषधीभिः। ओषधीः॥२८॥ यम्। अग्ने। पृत्स्विति पृत्
सु। मर्त्यम्। अवाः। वाजेषु। यम्। जुनाः। सः। यन्ता। शश्वतीः। इषः। स्वाहा॥२९॥ आ। ददे।
असि। रावा। गभीरम्। इमम्। अध्वरम्। कृधि। इन्द्राय। सुषूतमम्। सुसूतममिति सुऽसू
तमम्। उत्तमेनेत्युत्। तमेन। पविना। ऊर्जस्वन्तम्। मधुमन्तमिति मधु। मन्तम्।
पयस्वन्तम्। निग्राभ्या इति नि। ग्राभ्याः। स्थ। देवश्रुत इति देव। श्रुतः। तर्पयत। मा
॥३०॥ मनः। मे। तर्पयत। वाचम्। प्राणम्। चक्षुः। श्रोत्रम्। आत्मानम्। प्रजाम्। इति

॥३६॥

प्रऽजाम्। पुरुषान्। गृणान्। गुणाः। नु। मा। वि। तृषन्॥४१॥ इंद्राय। त्वा। वसुमतऽइतिव
सुऽमते। रुद्रवतऽइति रुद्र। वते। आदित्यवतऽइत्यादित्य। वते। अभिमातिघ्नऽइत्यभि
मातिऽघ्ने। श्येनाय। सोमभृतऽइति सोम। भृते। अग्नये। रायस्पोषदऽइति रायस्पो
ष। दे॥४२॥ यत्। ते। सोम। दिवि। ज्योतिः। पृथिव्याम्। उरौ। अंतरिक्षे। तेन। अस्मै।
यजमानाय। उरु। राये। कृधि। अधि। दात्रे। वोचः॥४३॥ श्वात्राः। स्थ। वृत्रतुरऽइति
वृत्र। तुरः। राधोगूर्ताऽइति राधः। गूर्ताः। अमृतस्य। पत्नीः। ताः। देवीः। देव
त्रेति देव। त्रा। इमम्। यज्ञम्। नयत। उपहूताऽइत्युप। हूताः। सोमस्य। पिबत॥४४॥

पा३६॥

मा। नः। मा। सम्। विक्थाः। ऊर्जम्। धत्त। धिषणेऽइति धिषणे। वीड्वीऽइति वीड्वी। सतीऽइ
ति सती। वीडयेथाम्। ऊर्जम्। दधाथाम्। पाप्मा। हतः। न। सोमः॥४५॥ प्राक्। अपा
क्। उदक्। अधराक्। सर्वतः। त्वा। दिशः। आ। धावंतु। अंब। निः। पर। सम्। अरीः।
विदाम्॥४६॥ त्वम्। अंग। प्र। शंसिषः। देवः। शविष्ठ। मर्त्यम्। न। त्वत्। अन्यः। मघ
वन्निति मघ। वन्। अस्ति। मर्डिता। इंद्र। ब्रवीमि। ते। वचः॥४७॥ ॥इति शुक्लयजुः
काण्वपदसंहिता षष्ठमोध्यायः॥६॥ ॥ हरिः ॐ॥ वाचः। पतये। पवस्व। वृष्णः।
अंशुभ्यामित्यंशु। भ्याम्। गभस्तिपूतऽइति गभस्ति। पूतः। देवः। देवेभ्यः। पवस्व।

॥३७॥

येषाम्। भागः। असि। मधुमतीरितिमधुऽमतीः। नः। इषः। कृधि॥१॥ यत्। ते। सोम।
अदाभ्यम्। नाम। जागृवि। तस्मै। ते। सोम। सोमाय। स्वाहा। स्वाहा। उरु। अंतरिक्षम्।
अनु। एमि। स्वांकृतइतिस्वाम्। कृतः। असि। विश्वेभ्यः। इंद्रियेभ्यः। दिव्येभ्यः। पार्थिवे
भ्यः॥२॥ मनः। त्वा। अष्टु। स्वाहा। त्वा। सुभवइतिसु। भवः। सूर्याय। देवेभ्यः। त्वा। मरी
चिपेभ्यइतिमरीचिऽपेभ्यः। देव। अंशो इति। अंशो। यस्मै। त्वा। ईडे। तत्। सत्यम्। उप
रिप्रुतेत्युपरिऽप्रुता। भंगेन। हतः। असौ। फट्। प्राणाय। त्वा। व्यानायेतिविऽआना
य। त्वा॥३॥ उपयामगृहीतइत्युपयाम। गृहीतः। असि। अंतः। यच्छ। मघव

॥३७॥

न्निति मघऽवन्। पाहि। सोमम्। उरुष्य। रायः। अव। इषः। यजस्व॥४॥ अंतरिसंतः।
ते। द्यावापृथिवीइतिद्यावापृथिवी। दधामि। अंतः। दधामि। उरु। अंतरिक्षम्।
सजूरितिसऽजूः। देवेभिः। अवरैः। परैः। च। अंतर्यामइत्यंतः। यामे। मघवन्निति
मघऽवन्। मादयस्व। उदानायेत्युत्ऽआनाय। त्वा॥५॥ आ। वायोइतिवायो। भूष।
शुचिपाइतिशुचिऽपाः। उप। नः। सहस्रम्। ते। नियुतइतिनिऽयुतः। विश्ववारे
तिविश्व। वार। उपोइत्युपो। ते। अंधः। मद्यम्। अयामि। यस्य। देव। दधिषे। पू
र्वपेयमितिपूर्व। पेयम्। वायवे। त्वा॥६॥ इंद्रवायूइतींद्रवायू। इमे। सुताः।

॥३९॥

उप। प्रयोभिरितिप्रयः भिः। आ। गतम्। इंद्रवः। वाम्। उशंति। हि। वायवे। इंद्रवायुभ्यामितींद्रवायुऽभ्याम्। त्वा। एषः। ते। योनिः। सजोषोभ्यामितिसजोषःऽभ्याम्। त्वा॥७॥४॥ अयम्। वाम्। मित्रावरुणा। सुतः। सोमः। ऋतावृधा। ऋतवृधेत्यृत। वृधा। मम। इत्। इह। श्रुतम्। हवम्। मित्रावरुणाभ्याम्। त्वा॥८॥ राया। वयम्। ससवांसइतिससवांसः। मदेम। हव्येन। देवाः। यवसेन। गावः। ताम्। धेनुम्। मित्रावरुणा। युवम्। नः। विश्वाहा। धत्तम्। अनपस्फुरंती। मित्यनप। स्फुरंतीम्। एषः। ते। योनिः। ऋतायुभ्याम्। ऋतायुभ्यामित्यृतायुऽभ्याम्। त्वा॥९॥४॥ या। वाम्।

॥३९॥

कशा। मधुमतीतिमधुऽमती। अश्विना। सूनृतावतीतिसूनृताऽवती। तया। यज्ञम्। मिमिक्षतम्। अश्विभ्यामित्यश्विऽभ्याम्। त्वा। एषः। ते। योनिः। माध्वीभ्याम्। त्वा॥१०॥ तम्। प्रत्नथेतिप्रत्न। था। पूर्वथेतिपूर्व। था। विश्वथेतिविश्व। था। इमथेती म। था। ज्येष्ठतातिमितिज्येष्ठ। तातिम्। बर्हिषदम्। बर्हिसदमितिबर्हि। सदम्। स्वर्विदमितिस्वः। विदम्। प्रतीचीनम्। वृजनम्। दोहसे। धुनिम्। आशुम्। जयंतम्। अनु। आसु। वर्द्धसे। शंडाय। त्वा॥११॥ एषः। ते। योनिः। वीरताम्। पाहि। अपमृष्ट इत्यपमृष्टः। शंडः। देवाः। त्वा। शुक्रपाइतिशुक्र। पाः। प्र। नयंतु। अनाधृष्टा। असि।

सुवीर इति सु। वीरः। वीरान्। प्रजनयन्निति प्र। जनयन्। परि। इहि। अभि। रायः।
पोषेण। यजमानम्। संजग्मान इति सम्। जग्मानः। दिवा। पृथिव्या। शुक्रः। शुक्र
शोचिषेति शुक्र। शोचिषा। निरस्त इति निः। अस्तः। शण्डः। शुक्रस्य। अधिष्ठानम्।
अधिष्ठानमित्यधि ऽ स्थानम्। असि॥१२॥ अछिन्नस्य। ते। देव। सोम। सुवीर्य
स्येति सु ऽ वीर्यस्य। रायः। पोषस्य। ददितारः। स्याम। सा। प्रथमा। संस्कृतिः। वि
श्ववारेति विश्व। वारा। सः। प्रथमः। वरुणः। मित्रः। अग्निः॥१३॥ सः। प्रथमः। बृ
हस्पतिः। चिकित्वान्। तस्मै। इन्द्राय। सुतम्। आ। जुहोत। स्वाहा। तृम्पन्तु। होत्राः।

३९

मध्वः। यत्। स्विष्टमिति सु ऽ इष्टम्। सुभृतमिति सु भृतम्। यत्। स्वाहा॥१४॥ अय
म्। वेनः। चोदयत्। पृश्निगर्भा इति पृश्नि। गर्भाः। ज्योतिर्जरायुरिति ज्योतिः। जरायुः।
रजसः। विमान इति वि ऽ मानः। इमम्। अपाम्। संगम इति सम्। गमे। सूर्यस्य। शिशु
म्। न। विप्राः। मतिभिरिति मति ऽ भिः। रिहन्ति। मर्क्काय। त्वा॥१५॥ मनः। न। येषु। हव
नेषु। तिग्मम्। विपः। शच्या। वनुथः। द्रवन्ता। आ। यः। शर्याभिः। तुविनृम्ण इति तुवि।
नृम्णः। अस्य। अश्रीणीत। आदिशमित्या ऽ दिशम्। गभस्तौ॥१६॥ एषः। ते। योनिः। प्र
जा इति प्र ऽ जाः। पाहि। अपमृष्ट इत्यप। मृष्टः। मर्क्कः। देवाः। त्वा। मन्थिपा इति मन्थि। पाः।

॥४०॥

प्र। नयन्तु। अनाधृष्टा। असि। सुप्रजा इति सुऽप्रजाः। प्रजा इति प्रऽजाः। प्रजनयन्निति प्र।
जनयन्। परि। इहि। अभि। रायः। पोषेण। यजमानम्। संजग्मान इति सम्ऽजग्मानः।
दिवा। पृथिव्या। मन्थी। मन्थिशोचिषेति मन्थिऽशोचिषा। निरस्त इति निःऽअस्तः। मर्कः।
मन्थिनः। अधिष्ठानम्। अधिस्थानमित्यधिऽस्थानम्। असि ॥१७॥६॥ ये। देवासः।
दिवि। एकादश। स्थ। पृथिव्याम्। अधि। एकादश। स्थ। अप्सुक्षित इत्यप्सुऽक्षितः।
महिना। एकादश। स्थ। ते। देवासः। यज्ञम्। इमम्। जुषध्वम् ॥१८॥ आग्रयणः। अ
सि। स्वाग्रयण इति सुऽआग्रयणः। पाहि। यज्ञम्। पाहि। यज्ञपतिमिति यज्ञऽपतिम् ॥१९॥

॥४०॥

विष्णुः। त्वाम्। इन्द्रियेण। पातु। विष्णुम्। त्वम्। पाहि। अभि। सवनानि। पाहि। सोमः। पवि
त्रे। सोमः। पवते ॥२०॥ अस्मै। ब्रह्मणे। क्षत्राय। सुन्वते। यजमानाय। इषे। ऊर्जे। अद्भ्य
इत्। भ्यः। ओषधीभ्यः। द्यावापृथिवीभ्याम्। सुभूतायेति सुऽभूताय। ब्रह्मवर्चसा
येति ब्रह्म। वर्चसाय। पवते। विश्वेभ्यः। त्वा। देवेभ्यः। एषः। ते। योनिः। विश्वेभ्यः। त्वा।
देवेभ्यः ॥२१॥ इन्द्राय। त्वा। बृहद्वत इति बृहत्ऽवते। वयस्वते। उक्थायुवम्। उक्थ
युवमित्युक्थ्ऽयुवम्। गृह्णामि। यत्। ते। इन्द्र। बृहत्। वयः। तस्मै। त्वा। विष्णवे। त्वा।
एषः। ते। योनिः। उक्थेभ्यः। त्वा ॥२२॥ देवेभ्यः। त्वा। देवायुवम्। देवयुवमिति देव।

॥४१॥

युवम्। गृह्णामि। यज्ञस्य। आयुषे। मित्रावरुणाभ्याम्। इन्द्राय। इन्द्राग्निभ्यामितीन्द्रा
ग्निऽभ्याम्। इन्द्राय। इन्द्रावरुणाभ्याम्। इन्द्राबृहस्पतिभ्यामितीन्द्राबृहस्पतिऽभ्या
म्। इन्द्राविष्णुभ्यामितीन्द्राविष्णुऽभ्याम्। त्वा। देवायुवम्। देवयुवमिति देवऽयुवम्।
गृह्णामि। यज्ञस्य। आयुषे॥२३॥ मूर्द्धानम्। दिवः। अरतिम्। पृथिव्याः। वैश्वानर
म्। ऋते। आ। जातम्। अग्निम्। कविम्। सम्राजमिति सम्ऽराजम्। अतिथिम्। ज
नानाम्। आसन्। आ। पात्रम्। जनयन्त। देवाः॥२४॥ ध्रुवः। असि। ध्रुवक्षितिरिति
ध्रुवऽक्षितिः। ध्रुवाणाम्। ध्रुवतम इति ध्रुवऽतमः। अच्युतानाम्। अच्युतक्षित्तम

॥४१॥

इत्यच्युतक्षित्ऽतमः। एषः। ते। योनिः। वैश्वानराय। त्वा॥२५॥ ध्रुवम्। ध्रुवेण। मनसा।
वाचा। सोमम्। अव। नयामि। अथ। नः। इन्द्रः। इत्। विशः। असपत्नाः। समनस इति
सऽमनसः। करत्॥२६॥ यः। ते। द्रप्सः। स्कन्दति। यः। ते। अंशुः। ग्रावच्युत इति ग्राव
ऽच्युतः। धिषणयोः। उपस्थादित्युपऽस्थात्। अध्वर्योः। वा। परि। वा। यः। पवित्रात्। तम्।
ते। जुहोमि। मनसा। वषट्कृतमिति वषट्ऽकृतम्। स्वाहा। देवानाम्। उत्क्रमणमित्यु
त्ऽक्रमणम्। असि॥२७॥ मधवे। माधवाय। शुक्राय। शुचये। नभसे। नभस्याय।
इषे। ऊर्जे। सहसे। सहस्याय। तपसे। तपस्याय। अंहसस्पतये। अंहसः। पत

४२

युरसंऽहसः। पूतये। त्वा॥२८॥ ६॥ इन्द्राग्नी इतीन्द्राग्नी। आ। गतम्। सुतम्। गीर्भि
रितिगीःऽभिः। नभः। वरेण्यम्। अस्य। पातम्। धिया। इषिता। इन्द्राग्निभ्यामितीन्द्रा
ग्निऽभ्याम्। त्वा। एषः। ते। योनिः। इन्द्राग्निभ्यामितीन्द्राग्निऽभ्याम्। त्वा॥२९॥ आ। घ। ये।
अग्निम्। इंधते। स्तृणंति। बर्हिः। आनुषक्। येषाम्। इन्द्रः। युवा। सखा। अग्नीन्द्रा
भ्याम्। त्वा। एषः। ते। योनिः। अग्नीन्द्राभ्याम्। त्वा॥३०॥ ७॥ ओमासः। चर्षणीधृतः। च
र्षणिधृत इतिचर्षणिऽधृतः। विश्वे। देवासः। आ। गत। दाश्वांसः। दाश्वुषः।
सुतम्॥३१॥ विश्वे। देवासः। आ। गत। शृणुत। मे। इमम्। हवम्। आ। इदम्। ब

४२

र्हिः। नि। सीदत॥३२॥ इन्द्र। मरुत्वः। इह। पाहि। सोमम्। यथा। शार्याते। अपिबः। सु
तस्य। तव। प्रणीती। प्रनीतीतिप्रऽनीती। तव। शूर। शर्मन्। आ। विवासंति। कव
यः। सुयज्ञा इतिसुऽयज्ञाः। इंद्राय। त्वा। मरुत्वते। एषः। ते। योनिः। इंद्राय। त्वा। मरु
त्वते॥३३॥ मरुत्वंतम्। वृषभम्। वावृधानम्। ववृधानमितिववृधानम्। अ
कवारिमित्यकव। अरिम्। दिव्यम्। शासम्। इन्द्रम्। विश्वासाहम्। विश्वसहमि
ति विश्वसहम्। अवसे। नूतनाय। उग्रम्। सहोदामितिसहःऽदाम्। इह। तम्।
हुवेम॥३४॥ मरुताम्। ओजसे। त्वा॥३५॥ सजोषा इतिसऽजोषाः। इन्द्र। सगण

॥४३॥

इतिस।गणः।मरुद्भिरितिमरुत्ऽभिः।सोमम्।पिब।वृत्रहेतिवृत्र।हा।शूर।वि
द्वान्।जहि।शत्रून्।अप।मृधः।नुदस्व।अथ।अभयम्।कृणुहि।विश्वतः।नः
॥३६॥ महान्।इन्द्रः।नृवदितिनृऽवत्।आ।चर्षणिप्राइतिचर्षणिऽप्राः।उत।द्वि
बर्हाइतिद्विऽबर्हाः।अमिनः।सहोभिरितिसहःऽभिः।अस्मद्र्यक्।वावृधे।ववृध
इतिववृधे।वीर्याय।उरुः।पृथुः।सुकृतइतिसुऽकृतः।कर्तृभिरितिकर्तृऽभिः।भू
त्।महेन्द्रायेतिमहाऽइन्द्राय।त्वा।एषः।ते।योनिः।महेन्द्रायेतिमहाऽइन्द्राय।त्वा
॥३७॥ महान्।इन्द्रः।यः।ओजसा।पर्जन्यः।वृष्टिमान्ऽइव।वृष्टिमानिवेतिवृष्टिमान्ऽ

॥४३॥

इव।स्तोमैः।वत्सस्य।वावृधे।ववृधइतिववृधे॥३८॥ ७॥ इतिशुक्लयजुःक्रवपद
संहितायांसप्तमोध्यायः॥७॥ ७॥ हरिःॐ॥ आदित्येभ्यः।त्वा॥१॥ कदा।चन।प्र।यु
च्छसि।उभेइत्युभे।नि।पासि।जन्मनीइतिजन्मनी।तुरीप।आदित्य।सवनम्।ते।
इन्द्रियम्।आ।तस्थौ।अमृतम्।दिवि।आदित्येभ्यः।त्वा॥२॥ यज्ञः।देवानाम्।प्रति।
एति।सुम्नम्।आदित्यासः।भवत।मृडयन्तः।आ।वः।अर्वाची।सुमतिरितिसुऽ
मतिः।ववृत्यात्।अंहोः।चित्।या।वरिवोवित्तरेतिवरिवोवित्ऽतरा।असत्।
आदित्येभ्यः।त्वा।विवस्वन्।आदित्य।एषः।ते।सोमपीथइतिसोमऽपीथः।तस्मिन्।

पुरस्व ॥३॥ अ० ॥३॥ अंतः । अस्मे । नरः । वंवसे । दधातन । यत् । आशीः । दा सौम्यीः । दा
दंपती इति दंऽपती । वामम् । अश्नुतः । पुमान् । पुत्रः । जायते । विंदते । वसु । अध ।
विश्वाहा । अरपः । एधते । गृहे ॥४॥ वामम् । अद्य । सवितः । वामम् । ऊं इति । श्वः ।
दिवेदिव इति दिवेऽदिवे । वामम् । अस्मभ्यम् । सावीः । वामस्य । हि । क्षयस्य । देव ।
भूरेः । अया । धिया । वामभाज इति वामऽभाजः । स्याम ॥५॥ सावित्रः । असि । चनो
धा इति चनःऽधाः । चनः । मयि । धेहि । जिन्व । यज्ञम् । जिन्व । यज्ञपतिमिति यज्ञ ।
पतिम् । भगाय । सवित्रे । त्वा ॥६॥ सुशर्मेति सुऽशर्मा । असि । सुप्रतिष्ठान इति सुप्र

तिस्थान इति सुऽप्रतिस्थानः । बृहदुक्षाय इति बृहत्ऽउक्षाय । नमः ॥७॥ बृहस्पतिसुतस्ये
ति बृहस्पतिऽसुतस्य । ते । देव । सोम । इंदो इतीन्दो । इंद्रियावतः । इंद्रियवत इतीन्द्रिय ।
वतः । पत्नीवत इति पत्नीऽवतः । ग्रहान् । ऋध्यासम् ॥८॥ अहम् । पुरस्तात् । अहम् ।
अवस्तात् । यत् । अंतरिक्षम् । तत् । ऊं इति । मे । पिता । आसीत् । अहम् । सूर्यम् । उभयतः ।
ददर्श । अहम् । देवानाम् । परमम् । गुहा । यत् ॥९॥ अग्ने । वाक् । पते । सजूरिति स
जूः । देवेन । त्वष्ट्रा । सोमम् । पिब । स्वाहा ॥१०॥ प्रजापतिरिति प्रजाऽपतिः । वृषा । असि ।
रेतोधा इति रेतःऽधाः । रेतः । मयि । धेहि । प्रजापते रिति प्रजाऽपतेः । तु । वृष्णः । रेतो

॥४५॥

धसुइतिरेतःऽधसेः । रेतःधामितिरेतःऽधाम् । अत्रीय ॥११॥ हरिः । असि । हारियोज नइतिहारिऽयोजनः । हरिभ्यामितिहरिऽभ्याम् । त्वा । हर्योः । धानाः । स्थ । सहसोमाइ तिसह । सोमाः । इंद्राय ॥१२॥ यः । ते । देव । सोम । अश्वसनिरित्यश्वऽसनिः । गोसनिरितिगोऽसनिः । तस्य । ते । इष्टयजुषइतीष्टऽयजुषः । स्तुतस्तोमस्येतिस्तुतऽस्तोमस्य । शस्तोक्थस्येतिशस्तऽउक्थस्य । उपहूतइत्युपऽहूतः । उपहूतस्येत्युपऽ हूतस्य । भक्षयामि ॥१३॥ युक्ष्व । हि । केशिना । हरीइतिहरी । वृषणा । कक्ष्यप्रेतिकक्ष्यऽप्रा । अथ । नः । इंद्र । सोमपाइतिसोमऽपाः । गिराम् । उपश्रुतिमित्युपऽश्रुतिम् ।

॥४५॥

चर । इंद्राय । त्वा । षोडशिने । एषः । ते । योनिः । इंद्राय । त्वा । षोडशिने ॥१४॥ आ । तिष्ठ । वृत्रहन्नितिवृत्रऽहन् । रथम् । युक्ता । ते । ब्रह्मणा । हरीइतिहरी । अर्वाचीनम् । सु । ते । मनः । ग्रावा । कृणोतु । वग्नुना ॥१५॥ इन्द्रम् । इत् । हरीइतिहरी । वहतः । अप्रतिधृष्टशवसमित्यप्रतिधृष्टऽशवसम् । ऋषीणाम् । च । स्तुतीः । उप । यज्ञम् । च । मानुषाणाम् ॥१६॥ यस्मात् । न । जातः । परः । अन्यः । अस्ति । यः । आविवेशेत्याऽविवेश । भुवनानि । विश्वा । प्रजापतिरितिप्रजाऽपतिः । प्रजयेतिप्रऽजया । संरराणइतिसम्ऽरराणः । त्रीणि । ज्योतींषि । सचते । सः । षोडशी ॥१७॥ इंद्रः । च । सम्राडितिसम्ऽराट् । वरुणः ।

४३६

च। राज्ञो। तौ। ते। भक्षम्। चक्रतुः। अग्रे। एतम्। तयोः। अहम्। अनु। भक्षम्। भक्षयामि।
वाक्। देवी। जुषाणा। सोमस्य। तृप्यतु। सह। प्राणेन। स्वाहा॥१८॥ अग्ने। आयूंषि। पव
से। आ। सुव। ऊर्जम्। इषम्। च। नः। आरे। बाधस्व। दुच्छुनाम्। अग्नये। त्वा। वर्चसे। एषः।
ते। योनिः। अग्नये। त्वा। वर्चसे। अग्ने। वर्चस्विन्। वर्चस्वान्। त्वम्। देवेषु। असि। वर्चस्वा
न्। अहम्। मनुष्येषु। भूयासम्॥१९॥ अग्ने। पवस्व। स्वपा इति सुऽअपाः। अस्मे इत्यस्मे।
वर्चः। सुवीर्यमिति सुऽवीर्यम्। दधत्। रयिम्। मयि। पोषम्॥२०॥ उत्तिष्ठन्नित्युत्ऽ
तिष्ठन्। ओजसा। सह। पीत्वी। शिप्रे इति शिप्रे। अवेपयः। सोमम्। इन्द्र। चमू इति चमू।

४४६

गो

सुतम्। इन्द्राय। त्वा। ओजसे। एषः। ते। योनिः। इन्द्राय। त्वा। ओजसे। इन्द्र। ओजस्विन्। ओज
स्वान्। त्वम्। देवेषु। असि। ओजस्वान्। अहम्। मनुष्येषु। भूयासम्॥२१॥ अदृश्रम्। अ
स्य। केतवः। वि। रश्मयः। जनान्। अनु। भ्राजन्तः। यथा। सूर्याय। त्वा। भ्राजे। एषः। ते। योनिः।
सूर्याय। त्वा। भ्राजे। सूर्य। भ्राजस्विन्। भ्राजस्वान्। त्वम्। देवेषु। असि। भ्राजस्वान्। अ
हम्। मनुष्येषु। भूयासम्॥२२॥ उत्। ऊं इत्यूं। त्यम्। जातवेदसमिति जातऽवेदसम्। दे
वम्। वहन्ति। केतवः। दृशे। विश्वाय। सूर्यम्॥२४॥ चित्रम्। देवानाम्। उत्। अगात्। अ
नीकम्। चक्षुः। मित्रस्य। वरुणस्य। अग्नेः। आ। अप्राः। द्यावापृथिवी इति द्यावापृथिवी।

अग्नयेः

अंतरिक्षम्। सूर्य्यः। आत्मा। जगतः। तस्थुषः। च॥२४॥ वि। नः। इंद्र। मृधः। जहि। नी

चा। यच्छ। पृतन्यतः॥ यः। अस्मान्। अभिदासति। इत्यभिऽदासति। अधरम्। गमय। त

मः। इंद्राय। त्वा। विमृधइतिवि। मृधे। एषः। ते। योनिः। इंद्राय। त्वा। विमृधइतिवि॰

मृधे॥२५॥ वाचः। पतिम्। विश्वकर्म्माणमितिविश्वऽकर्माणम्। ऊतये। मनोजुव

मितिमनः। जुवम्। वाजे। अद्य। हुवेम। सः। नः। विश्वानि। हवनानि। जोषत्। विश्व

शंभूरितिविश्व। शंभूः। अवसे। साधुकर्मेतिसाधुऽकर्मा। इंद्राय। त्वा। विश्वकर्मण

इतिविश्व। कर्मणे। एषः। ते। योनिः। इंद्राय। त्वा। विश्वकर्मणइतिविश्वऽकर्मणे॥२६॥

विश्वकर्मन्नितिविश्वकर्मन्। हविषा। वावृधानः। ववृधानइतिववृधानः। स्वयम्। य

जस्व। पृथिवीम्। उत। द्याम्। मुह्यंतु। अन्ये। अभितः। सपत्नाइतिसऽपत्नाः। इह। अ

स्माकम्। मघवेतिमघ। वा। सूरिः। अस्तु॥२७॥ विश्वकर्मन्नितिविश्व। कर्मन्। हवि

षा। वर्द्धनेन। त्रातारम्। इंद्रम्। अकृणोः। अयुध्यम्। तस्मै। विशः। सम्। अनमं

त। पूर्वीः। अयम्। उग्रः। विहव्यइतिवि॰हव्यः। यथा। असत्॥२८॥ अग्नये। त्वा।

गायत्रछंदसमितिगायत्र। छंदसम्। गृह्णामि। इंद्राय। त्रिष्टुप्छंदसम्। त्रिष्टुप्छं

दसमितित्रिष्टुप्। छंदसम्। विश्वेभ्यः। देवेभ्यः। जगच्छंदसमितिजगत्। छंदसम्।

४८

उरुद्रप्सम्। अनु। स्कन्। बिसंतु। स्कप्। ते। अभिगरइसंभि। गरः॥२९॥ श्रेत्रीनाम्। त्वा।
पत्मन्। आ। धूनोमि। ककूननानाम्। भंदनानाम्। मध्वंतमानामितिमधुऽअंत
मानाम्। शुक्रम्। त्वा। शुक्रे। आ। धूनोमि। अन्हः। रूपे। सूर्यस्य। रश्मिषु॥३०॥ककु
हम्। रूपम्। वृषभस्य। रोचते। बृहत्। सोमः। सोमस्य। पुरोगाइतिपुरः। गाः। शुक्रः।
शुक्रस्य। पुरोगाइतिपुरः। गाः। यत्। ते। सोम। अदाभ्यम्। नाम। जागृवि। तस्मै। त्वा।
गृह्णामि। तस्मै। ते। सोम। सोमाय। स्वाहा॥३१॥ उशिक्। त्वम्। देव। सोम। अग्नेः। प्रि
यम्। पाथः। अपि। इहि। वशी। इंद्रस्य। अस्मत्सखेत्यस्मत्। सखा। त्वम्। देव। सोम।

५

विश्वेषाम्। देवानाम्। प्रियम्। पाथः। अपि। इहि॥३२॥ इति शुक्लयजुः काण्वप
दसंहितायां अष्टमोध्यायः॥८॥ ७॥ हरिः ॐ॥ प्राणाय। मे। वर्चोदाइति वर्चः। दाः।
वर्चसे। पवस्व। व्यानायेति विऽआनाय। उदानायेत्युत्। आनाय। वाचे॥१॥ क्रतूद
क्षाभ्याम्। श्रोत्राय। चक्षुर्भ्यामितिचक्षुःभ्याम्। मे। वर्चोदसाइति वर्चः। दसौ। वर्च
से। पवेथाम्॥२॥ आत्मने। ओजसे। आयुषे। विश्वाभ्यः। मे। प्रजाभ्यइतिप्रऽजाभ्यः।
वर्चोदसाइतिवर्चः। दसौ। वर्चसे। पवेथाम्॥३॥ कः। असि। कतमः। कस्य। कः। ना
म। असि। यस्य। ते। नाम। अमन्महि। यम्। त्वा। सोमेन। अतीतृपाम॥४॥ रूपेण।

वः। रूपम्। अभि। आ। अगाम्। तुथः। वः। विश्ववेदा इति विश्वऽवेदाः। वि। भजतु। ऋतस्य। पथा। प्र। इत। चन्द्रदक्षिणा इति चन्द्रऽदक्षिणाः ॥५॥ वि। स्वः। इति स्वः। पश्य। वि। अन्तरिक्षम्। यतस्व। सदस्यैः। ब्राह्मणाम्। अद्य। विदेय। पितृमन्तमिति पितृऽमन्तम्। पैतृमत्यमिति पैतृऽमत्यम्। ऋषिम्। आर्षेयम्। सुधातुदक्षिणमिति सुधातुऽदक्षिणम् ॥६॥ अस्मद्रात्ते सस्मत्। राता। देवत्रेति देवऽत्रा। गच्छ। प्रदातारमिति प्र॒ऽदातारम्। आ। विश। अग्नये। त्वा। मह्यम्। वरुणः। ददातु। सः। अमृतत्वमिति समृत्त। त्वम्। अश्यात् ॥७॥ आयुः। दात्रे। एधि। मयः। मह्यम्। प्रतिग्र-

-हीत्र इति प्रति। ग्रहीत्रे। रुद्राय। प्राणः। बृहस्पतये। त्वक्। यमाय। वयः। मयः। मह्यम्। प्रतिग्रहीत्र इति प्रति। ग्रहीत्रे ॥८॥ कः। अदात्। कस्मै। कामः। कामाय। कामः। दाता। कामः। प्रतिग्रहीतेति प्रतिऽग्रहीता। काम। एतत्। ते। तव। काम। सत्ता। भुनजातेहे ॥९॥ सम्। इन्द्र। नः। मनसा। नेषि। गोभिः। सम्। सूरिभिरिति सूरिऽभिः। मघवन्निति मघ। वन्। सम्। स्वस्त्या। सम्। ब्रह्मणा। देवकृतमिति देव। कृतम्। यत्। अस्ति। सम्। देवानाम्। सुमताविति सुऽमतौ। यज्ञियानाम् ॥१०॥ धाता। रातिः। सविता। इदम्। जुषन्ताम्। प्रजापतिरिति प्रजा। पतिः। निधिपा

५०

इति निधिऽपाः। देवः। अग्निः। त्वष्टा। विष्णुः। प्रजयेति प्र। जया। संऽरराणा इति
सम्। रराणाः। यजमानाय। द्रविणम्। दधातु ॥११॥ सुगेति सुऽगा। वः। देवाः।
सदना। अकर्म। ये। आजग्मेत्याऽजग्म। इदम्। सवनम्। जुषाणाः। भरमाणाः।
वहमानाः। हवींषि। अस्मे इत्यस्मे। धत्त। वसवः। वसूनि ॥१२॥ यान्। आ। अव
हः। उशतः। देव। देवान्। तान्। प्र। ईरय। स्वे। अग्ने। सधस्थ इति सधस्थे। ज
क्षिवांस इति जक्षिवांसः। पपिवांस इति पपिऽवांसः। च। विश्वे। असु
म्। घर्मम्। स्वः। आ। तिष्ठत। अनु ॥१३॥ वयम्। हि। त्वा। प्रयतीति प्रऽयति। यज्ञे।

५०

अस्मिन्। अग्ने। होतारम्। अवृणीमहि। इह। ऋधक्। अयाः। ऋधक्। उत। अश
मिष्ठाः। प्रजानन्निति प्र। जानन्। यज्ञम्। उप। याहि। विद्वान् ॥१४॥ यज्ञ। यज्ञम्।
गच्छ। यज्ञपतिमिति यज्ञ। पतिम्। स्वाम्। योनिम्। गच्छ। स्वाहा। एषः। ते। यज्ञ।
यज्ञपत इति यज्ञ। पते। सहसूक्तवाक इति सह। सूक्तवाकः। सर्ववीर इति स
र्व। वीरः। तम्। जुषस्व। स्वाहा ॥१५॥ उरुम्। हि। राजा। वरुणः। चकार। सूर्याय।
पन्थाम्। अन्वेतवा इत्यनु। एतवै। उं इत्युं। अपदे। पादा। प्रतिधातव इति प्रतिऽ
धातवे। अकः। उत। अपवक्तेत्यप। वक्ता। हृदयाविधः। हृदयविध इति हृदय। वि

५१

धैः। चित्तु। नमः। वरुणाय। अभिष्ठितः। अभिस्थितइत्यभिऽस्थितः। वरुणस्य। पाशः॥१६॥ अग्नेः। अनीकम्। अपः। आ। विवेश। अपाम्। नपात्। प्रतिरक्षन्निति प्रतिऽरक्षन्। असुर्य्यम्। दमेदमइतिदमेऽदमे। समिधमिति समऽइधम्। यक्षि। अग्ने। प्रति। ते। जिह्वा। घृतम्। उत्। चरण्यत्। स्वाहा॥१७॥ समुद्रे। ते। हृदयम्। अप्स्विन्त्यप्ऽसु। अंतः। संतः। सम्। त्वा। विशंतु। ओषधीः। उत। आपः। यज्ञस्य। त्वा। यज्ञपतइतियज्ञऽपते। सूक्तोक्ताविति सूक्तऽउक्तौ। नमोवाकइतिनमःऽवाके। विधेम। यत्। स्वाहा॥१८॥ देवीः। आपः। एषः। वः। गर्भः। तम्। सुप्रीतमिति

५१

सुऽप्रीतम्। सुभृतमितिसुऽभृतम्। बिभृत। देव। सोम। एषः। ते। लोकः। परि। च। वक्षि। शम्। च। वक्षि। देवानाम्। समिदितिसम्ऽइत्। असि॥१९॥ राजतु। दशमास्यइतिदशऽमास्यः। गर्भः। जरायुणा। सह। यथा। अयम्। वायुः। एजति। यथा। समुद्रः। एजति। एव। अयम्। दशमास्यइतिदशऽमास्यः। अस्रत्। जरायुणा। सह॥२०॥ यस्यै। ते। यज्ञियः। गर्भः। यस्यै। योनिः। हिरण्ययी। अंगानि। अह्रुता। यस्य। तम्। मात्रा। सम्। अजीगमम्। स्वाहा॥२१॥ पुरुदस्मइतिपुरुऽदस्मः। विषुरूपइतिविषुऽरूपः। इंदुः। अंतः। महिमानम्। आनंज। धीरः। एकपदीम्। इति

५२

सेक।पदीम्।द्विपदीमितिद्विऽपदीम्।त्रिपदीमितित्रिऽपदीम्।चतुष्पदीम्।
चतुःपदीमितिचतुःऽपदीम्।अष्टापदीमित्यष्टाऽपदीम्।भुवना।अनु।प्रथंता
म्।स्वाहा॥२२॥मरुत्तः।यस्य।हि।क्षये।पाथ।दिवः।विमहस इतिविऽमहसः।
सः।सुगोपातम इतिसुऽगोपातमः।जनः॥२३॥मही।द्यौः।पृथिवी।च।नः।इम
म्।यज्ञम्।मिमिक्षताम्।पिपृताम्।नः।भरीमभिरितिभरीमऽभिः॥२४॥आ।
जिघ्र।कलशम्।मही।आ।त्वा।विशन्तु।इंदवः।पुनः।ऊर्जा।नि।वर्तस्व।सा।नः।
सहस्रम्।धुक्ष्व।उरुधारेत्युरुऽधारा।पयस्वती।पुनः।मा।आ।विशतात्।र

५२

यिः॥२५॥हव्ये।काम्ये।इडे।रंते।चंद्रे।ज्योते।अदिते।सरस्वति।महि।विश्रुतीति
विऽश्रुति।एता।ते।अघ्न्ये।नामानि।देवेषु।मा।सुकृतमितिसुऽकृतम्।ब्रूतात्॥२६॥
इह।रतिः।इह।रमध्वम्।इह।धृतिः।इह।स्वधृतिरितिस्वऽधृतिः।स्वाहा॥उ
पसृजन्नित्युपऽसृजन्।धरुणम्।मात्रे।धरुणः।मातरम्।धयन्।रायः।पोष
म्।अस्मासु।दीधरत्।स्वाहा॥२७॥अगन्म।ज्योतिः।अमृताः।अभूम।दिवम्।पृ
थिव्याः।अधि।आ।अरुहाम।अविदाम।देवान्।स्वः।ज्योतिः॥२८॥युवम्।तम्।
इंद्रापर्वता।पुरोयुधेतिपुरःऽयुधा।यः।नः।पृतन्यात्।अप।तंतमितितम्।तम्।

॥५३॥

इत्तम्। हृत्तम्। वज्रेण। त्तंतुमिति तृत्तम्। त्तम्। इत्तम्। हृत्तम्। दूरे। वृत्राय। धुन्नत्तम्। गर्हं
नम्। यत्त्। इन्नक्षत्त्। अस्माकम्। राष्ट्रम्। परि। शूर। विश्वत्तः। दर्मा। दर्षीष्ट। विश्व
त्तः॥ २९॥ परमेष्ठी। परमेस्थीतिपरमेऽस्थी। अभिधीत्त इत्यभिऽधीत्तः। प्रजापति
रिति प्रजाऽपतिः। वाचि। व्याहृतायामिति विऽआहृतायाम्। अन्धः। अछेत्त इत्य
छऽइत्तः। सविता। सन्याम्। विश्वकर्मेति विश्वऽकर्मा। दीक्षायाम्। पूषा। सोमक्र
यण्यामिति सोमऽक्रयण्याम्॥ ३०॥ इंद्रः। च। मरुत्तः। च। क्रयाय। उपोत्थित्त इत्युपऽउ
थित्तः। असुरः। पण्यमानः। मित्रः। क्रीत्तः॥ ३१॥ विष्णुः। शिपिविष्ट इति शिपि

॥५३॥

विष्टः। ऊरौ। आसन्न इत्याऽसन्नः। विष्णुः। नरंधिषः। प्रोह्यमाणः। प्रोह्यमान इति प्र
ऽउह्यमानः। सोमः। आगत्त इत्याऽगत्तः। वरुणः। आसंधामित्याऽसंधाम्। आसन्न इ
त्याऽसन्नः॥ ३२॥ अग्निः। आग्नीध्रे। इंद्रः। हविर्धान इति हविःऽधाने। अथर्वा। उपा
वह्रियमाण इत्युप। अवह्रियमाणः। विश्वे। देवाः। अंशुषु। न्युप्यमानेष्विति निऽ
उप्यमानेषु॥ ३३॥ विष्णुः। आप्रीत्तपा इत्याप्रीत्तऽपाः। आप्याय्यमान इत्याऽप्याय्यमा
नः। यमः। सूयमानः। विष्णुः। संभ्रियमाण इति सम्ऽभ्रियमाणः। वायुः। पूयमा
नः। शुक्रः। पूत्तः॥ ३४॥ शुक्रः। क्षीरश्रीरिति क्षीरऽश्रीः। मंथी। सक्तुश्रीरिति सक्तु।

श्रीः। विश्वे। देवाः। चमसेषु। उन्नीतइत्युत्। नीतः। असुः। होमाय। उद्यतइत्युत्।
यतः॥३५॥ रुद्रः। हूयमानः। वातः। अभ्यावृत्तइत्यभिऽआवृत्तः। नृचक्षाइतिनृऽ
चक्षाः। प्रतिख्यातइतिप्रतिऽख्यातः। भक्षः। पीतः। पितरः। नाराशंसाः। साद्य
मानः। सिंधुः। अवभृथायेत्यवऽभृथाय। उद्यतइत्युत्। यतः। समुद्रः। अभ्यवह्रि
यमाणइत्यभि। अवह्रियमाणः। सलिलः। प्रप्लुतइतिप्रऽप्लुतः॥३६॥ ययोः। ओ
जसा। स्कभिता। रजांसि। वीर्येभिः। वीरतमेतिवीरऽतमा। शविष्ठा। या। पत्येते
इतिपत्येते। अप्रतीतेत्यप्रतिऽइता। सहोभिरितिसहःऽभिः। विष्णूइतिविष्णू।

अगन्। वरुणा। पूर्वहूताइतिपूर्वऽहूतौ॥३७॥ देवान्। दिवम्। अगन्। यज्ञः। ततः।
मा। द्रविणम्। अष्टु। मनुष्यान्। अंतरिक्षम्। पितॄन्। पृथिवीम्। यम्। कम्। च। लो
कम्। अगन्। यज्ञः। ततः। मे। भद्रम्। अभूत्॥३८॥ इतिशुक्लयजुःकाण्वप
दसंहितायांनवमोध्यायः॥९॥ हरिःॐ॥ देव। सवितरितिसवितः। प्र। सु
व। यज्ञम्। प्र। सुव। इमम्। भगाय। दिव्यः। गंधर्वः। केतपाइतिकेतऽपाः। केतम्।
नः। पुनातु। वाचः। पतिः। नः। अद्य। वाजम्। स्वदतु॥१॥ ध्रुवसदमितिध्रुवऽसदम्।
त्वा। नृषदम्। नृसदमितिनृऽसदम्। मनःसदमितिमनःऽसदम्। उपयामगृहीत

१५५

इत्युपयाम्। गृहीतः। असि। इंद्राय। त्वा। जुष्टम्। गृह्णामि। एषः। ते। योनिः। इंद्राय।
त्वा। जुष्टतममिति जुष्टऽतमम्॥ २॥ अप्सुषदम्। अप्सुसदमित्यप्सुऽसदम्। त्वा। घृ
तसदमिति घृतऽसदम्। व्योमसदमिति व्योमऽसदम्। पृथिविसदमिति पृथिविऽ
सदम्। अंतरिक्षसदमित्यंतरिक्षऽसदम्। दिविसदमिति दिविऽसदम्। देवस
दमिति देवऽसदम्। नाकसदमिति नाकऽसदम्॥ ३॥ अपाम्। रसम्। उद्वयसमि
त्युत्ऽवयसम्। सूर्ये। संतम्। समाहितमिति समऽआहितम्। अपाम्। रसस्य।
यः। रसः। तम्। वः। गृह्णामि। उत्तममित्युत्ऽतमम्॥ ४॥ ग्रहाः। ऊर्जाहुतय इत्यूर्ज्ऽ

१५५

आहुतयः। व्यंतः। विप्राय। मतिम्। तेषाम्। विशिप्रियाणामिति विऽशिप्रियाणाम्।
वः। अहम्। इषम्। ऊर्जम्। सम्। अग्रभम्॥ ५॥ संपृच इति सम्ऽपृचः। स्थ। सम्।
मा। भद्रेण। पृङ्क्त। विपृच इति विऽपृचः। स्थ। वि। मा। पापेन। पृङ्क्त॥ ६॥ इंद्रस्य। वज्रः।
असि। वाजसा इति वाजऽसाः। त्वया। अयम्। वाजम्। सेत्। वाजस्य। नु। प्रसव इति प्रऽ
सवे। मातरम्। महीम्। अदितिम्। नाम। वचसा। करामहे। यस्याम्। इदम्। विश्वम्।
भुवनम्। आविवेशेत्याऽविवेश। तस्याम्। नः। देवः। सविता। धर्म। साविषक्॥ ७॥ देवीः।
आपः। अपाम्। नपात्। यः। वः। ऊर्मिः। प्रतूर्तिरिति प्रऽतूर्तिः। ककुद्मानिति ककुत्ऽमान्।

वाजसाऽइतिवाज।साः। तेन। अयम्। वाजम्। सेत्॥८॥ अप्ऽसु। अंतः। अमृतम्। अप्ऽसु। भेषजम्। अपाम्। उत। प्रशस्तिभिरितिप्रशस्तिऽभिः। अश्वाः। भवत। वाजिनः॥९॥ वातः। वा। वः। मनः। वा। गंधर्वाः। सप्तविंशतिरितिसप्तऽविंशतिः। ते। अग्रे। अश्वम्। अयुंजन्। ते। अस्मिन्। जवम्। आ। अदधुः॥१०॥ वातरंहाइतिवातऽरंहाः। भव। वाजिन्। युज्यमानः। इंद्रस्येवेतींद्रस्यऽइव। दक्षिणः। श्रिया। एधि। युंजंतु। त्वा। मरुतः। विश्ववेदसइतिविश्वऽवेदसः। आ। ते। त्वष्टा। पत्स्वितिपत्ऽसु। जवम्। दधातु॥११॥ जवः। यः। ते। वाजिन्। निहितइतिनिऽहितः। गुहा। यः। श्येने।

परीत्तइतिपरिऽइत्तः। अचरत्। च। वाते। तेन। नः। वाजिन्। बलवानितिबलऽवान्। बलेन। वाजजिदितिवाज।जित्। च। राधि। समने। च। पारयिष्णुः॥१२॥ वाजिनः। वाजजितइतिवाजऽजितः। वाजम्। सरिष्यंतः। बृहस्पतेः। भागम्। अव। जिघ्रत॥१३॥ देवस्य। वयम्। सवितुः। सवे। सत्यसवसइतिसत्यऽसवसः। बृहस्पतेः। उत्तमम्। नाकम्। रुहेम। इन्द्रस्य। उत्तमम्। नाकम्। रुहेम। उत्तमम्। नाकम्। रुहेम। अरुहाम॥१४॥ बृहस्पते। वाजम्। जय। बृहस्पतये। वाचम्। वदत। बृहस्पतिम्। वाजम्। जापयत॥१५॥ इंद्र। वाजम्। जय। इंद्राय। वाचम्। वदत। इन्द्रम्। वाजम्। जापयत॥१६॥ ए

षा। वृः। सा। सुसा। संवागिति सम्। वाक्। अभूत्। यथा। बृहस्पतिम्। वाजम्। अजी
जपत। अजीजपत। बृहस्पतिम्। वाजम्। वनस्पतयः। वि। मुच्यध्वम्॥१७॥ देव
स्य। वयम्। सवितुः। सवे। सत्यसवस इति सत्य। सवसः। बृहस्पतेः। वाजजित इ
ति वाज। जितः। वाजम्। जेष्म॥१८॥ वाजिनः। वाजम्। जयत। अध्वनः। स्कभ्नंतः। यो
जना। मिमानाः। काष्ठाम्। गच्छत॥१९॥ एषः। स्यः। वाजी। क्षिपणिम्। तुरण्यति। ग्रीवा
याम्। बद्धः। अपिकक्ष इत्यपिऽकक्षे। आसनि। क्रतुम्। दधिक्रा इति दधिऽक्राः। अ
नु। संतवीत्वदिति सम्। तवीत्वत्। पथाम्। अङ्कांसि। अनु। आपनीफणदित्याऽप

॥५७॥

नीफणत्॥२०॥ उत। स्म। अस्य। द्रवतः। तुरण्यतः। पर्णम्। न। वेः। अनु। वाति। प्रगर्धिन
इति प्र। गर्धिनः। श्येनस्येवेति श्येनस्यऽइव। ध्रजतः। अङ्कसम्। परि। दधिक्राव्ण इ
ति दधि। क्राव्णः। सह। ऊर्जा। तरित्रतः॥२१॥ शम्। नः। भवंतु। वाजिनः। हवेषु। देव
तातेति देव। ताता। मितद्रव इति मित्। द्रवः। स्वर्का इति सुऽअर्काः। जंभयन्तः। अहि
म्। वृकम्। रक्षांसि। सनेमि। अस्मत्। युयवन्। अमीवाः॥२२॥ ते। नः। अर्वंतः। ह
वनश्रुत इति हवनऽश्रुतः। हवम्। विश्वे। शृण्वंतु। वाजिनः। मितद्रव इति मित। द्र
वः। सहस्रसा इति सहस्रसाः। मेधसाता इवेति मेधसाताऽइव। सना। महः। ये। ध

नेम्।सुमितये।इतिसम्।इयेषु।जज्ञिरे॥२३॥वाजेवाजइतिवाजेऽवाजे।अवत।वाजि
नः।नः।धनेषु।विप्राः।अमृताः।ऋतज्ञाइत्यृत।ज्ञाः।अस्य।मध्वः।पिबत।मादयध्वम्।
तृप्ताः।यात।पथिभिरितिपथि।भिः।देवयानैरितिदेव।यानैः॥२४॥आ।मा।वाजस्य।
प्रसवइतिप्र।सवः।जगम्यात्।आ।इमेइतीमे।द्यावापृथिवीइतिद्यावापृथिवी।वि
श्वरूपेइतिविश्व।रूपे।आ।मा।गंतम्।पितरा।मातरा।युवम्।आ।मा।सोमः।अमृत
त्वायेत्यमृत।त्वाय।गम्यात्॥२५॥वाजिनः।वाजजितइतिवाज।जितः।वाजम्।स
सृवांसइतिससृ।वांसः।बृहस्पतेः।भागम्।अव।जिघ्रत।निमृजानाइतिनिऽ

मृजानाः॥२६॥आपये।स्वाहा।स्वापयइतिसुऽआपये।अपिजायेत्यपिऽजाय।क्रतवे।
वसवे।अहर्पतये।अहःपतयइत्यहः।पतये।अह्ने।मुग्धाय।मुग्धाय।वैनंशिना
य।विनंशिनइतिविऽनंशिने।आंत्यायनायेत्यांत्य।आयनाय।अंत्याय।भौवना
य।भुवनस्य।पतये।अधिपतयइत्यधिऽपतये॥२७॥आयुः।यज्ञेन।कल्पताम्।
प्राणः।चक्षुः।श्रोत्रम्।पृष्ठम्।यज्ञः।यज्ञेन।कल्पताम्॥२८॥आये।आ।इहि।स्व
रितिस्वः।रोहाव।प्रजापतेरितिप्रजाऽपतेः।प्रजाइतिप्र।जाः।अभूम।स्वः।देवाः।अ
गन्म।अमृताः।अभूम॥२९॥अस्मेइत्यस्मे।वः।अस्तु।इंद्रियम्।अस्मेइत्यस्मे।नृम्णम्।

उत। ऋतुः॥ अस्मेइत्यस्मे। क्वीःसि। संतु। वः। नमः। मात्रे। पृथिव्यै। इयम्। ते। राट्। यं
ता। असि। यमनः। ध्रुवः। असि। धरुणः। कृष्यै। क्षेमाय। रय्यै। पोषाय॥ ३०॥ वाजस्य।
इमम्। प्रसवइतिप्रऽसवः। सुषुवे। सुसुवइतिसुसुवे। अग्रे। सोमम्। राजानम्।
ओषधीषु। अप्स्विसप्सु। ताः। अस्मभ्यम्। मधुमतीरितिमधुऽमतीः। भवंतु।
वयम्। राष्ट्रे। जागृयाम। पुरोहिताइतिपुरःऽहिताः॥ ३१॥ वाजस्य। इदम्। प्रसवइ
तिप्रऽसवः। आ। बभूव। इमा। च। विश्वा। भुवनानि। सर्वतः। सनेमि। राजा। परि। या
ति। विद्वान्। रयिम्। पुष्टिम्। वर्द्धयमानः। अस्मेइत्यस्मे॥ ३२॥ वाजस्य। इमाम्। प्र

सवइतिप्रऽसवः। शिश्रिये। दिवम्। इमा। च। विश्वा। भुवनानि। सम्राडितिसम्ऽराट्।
अदित्संतम्। दापयति। प्रजानन्नितिप्रऽजानन्। सः। नः। रयिम्। सर्ववीरमितिसर्वऽवी
रम्। नि। यच्छतु॥ ३३॥ अग्ने। अच्छ। वद। इह। नः। प्रति। नः। सुमनाइतिसुऽमनाः। भव। प्र
नः। यच्छ। सहस्रजिदितिसहस्रऽजित्। त्वम्। हि। धनदाइतिधनऽदाः। असि॥ ३४॥ सो
मम्। राजानम्। अवसे। अग्निम्। अन्वारभामहइत्यनुऽआरभामहे। आदित्यम्। विष्णु
म्। सूर्यम्। ब्रह्माणम्। च। बृहस्पतिम्॥ ३५॥ प्र। नः। यच्छतु। अर्यमा। प्र। पूषा। प्र। सर
स्वती। प्र। वाक्। देवी। ददातु। नः॥ ३६॥ अर्यमणम्। बृहस्पतिम्। इंद्रम्। दानाय। चोद

११६०॥

यो। वाचम्। विष्णुम्। सरस्वतीम्। सवितारम्। च। वाजिनम्। ३७। सरस्वत्यै। वाचः। यन्तुः। यन्त्रियेण। तुर्ये। तुर्यम्। दधामि। बृहस्पतेः। त्वा। साम्राज्येनेति साम्। राज्येन। अभि। सिंचामि। इंद्रस्य। त्वा। साम्राज्येनेति साम्। राज्येन। अभि। सिंचामि। ३८। अग्निः। एकाक्षरेणेत्येक। अक्षरेण। प्राणम्। उत्। अजयत्। तम्। उत्। जेषम्। अश्विनौ। द्व्यक्षरेणेति द्वि। अक्षरेण। द्विपद इति द्वि। पदः। मनुष्यान्। उत्। अजयताम्। तान्। उत्। जेषम्। विष्णुः। त्र्यक्षरेणेति त्रि। अक्षरेण। त्रीन्। इमान्। लोकान्। उत्। अजयत्। तान्। उत्। जेषम्। सोमः। चतुरक्षरेणेति चतुः। अक्षरेण। चतुष्पदः। चतुः पद इति चतुः। पदः। पशून्। उत्। अजय

११६०॥

त्। तान्। उत्। जेषम्। ३९। पूषा। पंचाक्षरेणेति पंच। अक्षरेण। पंच। ऋतून्। उत्। अजयत्। तान्। उत्। जेषम्। सविता। षडक्षरेणेति षट्। अक्षरेण। षट्। ऋतून्। उत्। अजयत्। तान्। उत्। जेषम्। मरुतः। सप्ताक्षरेणेति सप्त। अक्षरेण। सप्त। ग्राम्यान्। पशून्। उत्। अजयन्। तान्। उत्। जेषम्। बृहस्पतिः। अष्टाक्षरेणेत्यष्ट। अक्षरेण। गायत्रीम्। उत्। अजयत्। ताम्। उत्। जेषम्। ४०। मित्रः। नवाक्षरेणेति नव। अक्षरेण। त्रिवृतमिति त्रि। वृतम्। स्तोमम्। उत्। अजयत्। तम्। उत्। जेषम्। वरुणः। दशाक्षरेणेति दश। अक्षरेण। विराजमिति वि। राजम्। उत्। अजयत्। ताम्। उत्। जेषम्। इंद्रः। एकादशाक्षरेणेत्येकादश। अक्षरेण। त्रिष्टुभम्। त्रिस्तुभमिति त्रि। स्तुभम्। उत्। अजयत्। ताम्। उत्। जेषम्। विश्वे। देवाः। द्वादशा

॥१६१॥

नम

रेणेति द्वादश्या। अक्षरेण। जगतीम्। उत्। अजयन्। ताम्। उत्। जेषम्। ४१॥ वसवस्त्र
योदशाक्षरेणेति त्रयोदश्या। अक्षरेण। त्रयोदशमितित्रयः। दशम्। स्तोमम्। उत्। अ
जयन्। उत्। जेषम्। रुद्राः। चतुर्दशाक्षरेणेति चतुर्दश्या। अक्षरेण। चतुर्दशमिति चतुः
तुः। दशम्। स्तोमम्। उत्। अजयन्। तम्। उत्। जेषम्। आदित्याः। पञ्चदशाक्षरेणे
ति पञ्चदश्या। अक्षरेण। पञ्चदशमिति पञ्च। दशम्। स्तोमम्। उत्। अजयन्। तम्।
उत्। जेषम्। अदितिः। षोडशाक्षरेणेति षोडश्या। अक्षरेण। षोडशम्। स्तोमम्। उ
त्। अजयत्। तम्। उत्। जेषम्। प्रजापतिरिति प्रजापतिः। सप्तदशाक्षरेणेति स

॥१६१॥

प्तदश्या। अक्षरेण। सप्तदशमिति सप्त। दशम्। स्तोमम्। उत्। अजयत्। तम्। उत्। जे
षम्॥ ४२॥ ॥ इति शुक्लयजुः काण्वपदसंहितायां दशमोऽध्यायः॥ १०॥

नाहृश।

पुरु

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ एषः । ते ।
निर्ऋते इति निः ऽऋते । भागः । तम् । जुषस्व । स्वाहा । अग्निनेत्रेभ्य इत्यग्नि ऽनेत्रेभ्यः ।
देवेभ्यः । पुरस्सद्भ्य इति पुरस्सत् ऽभ्यः । यमनेत्रेभ्य इति यम ऽनेत्रेभ्यः । दक्षिणसद्भ्य
इति दक्षिणसत् ऽभ्यः । विश्वदेवनेत्रेभ्य इति विश्वदेव ऽनेत्रेभ्यः । पश्चात्सद्भ्य इति प
श्चात्सत् ऽभ्यः । मित्रावरुणनेत्रेभ्य इति मित्रावरुण ऽनेत्रेभ्यः । वा । मरुन्नेत्रेभ्य इ
ति मरुत् ऽनेत्रेभ्यः । वा । देवेभ्यः । उत्तरसद्भ्य इत्युत्तरसत् ऽभ्यः । सोमनेत्रेभ्य इति
सोम ऽनेत्रेभ्यः । देवेभ्यः । उपरिषद्भ्यः । उपरिसद्भ्य इत्युपरिसत् ऽभ्यः । दुवस्व

द्भ्य इति दुवस्वत् ऽभ्यः । स्वाहा ॥ १ ॥ ये । देवाः । अग्निनेत्रा इत्यग्नि ऽनेत्राः । पुरस्सद
इति पुरः ऽसदः । यमनेत्रा इति यम ऽनेत्राः । दक्षिणासद इति दक्षिण ऽसदः । विश्वदे
वनेत्रा इति विश्वदेव ऽनेत्राः । पश्चात्सद इति पश्चात् ऽसदः । मित्रावरुणनेत्रा इति
मित्रावरुणनेत्राः । वा । मरुन्नेत्रा इति मरुत् ऽनेत्राः । वा । उत्तरसद इत्युत्तरसदः । सोम
नेत्रा इति सोमनेत्राः । उपरिसद इत्युपरि ऽसदः । दुवस्वंतः । तेभ्यः । स्वाहा ॥ २ ॥ अ
ग्ने । सहस्व । पृतनाः । अभिमातीरित्यभि ऽमातीः । अप । अस्य । दुष्टरः । दुस्तर इ
ति दुः ऽतरः । तरन् । अरातीः । वर्चः । धाः । यज्ञवाहसीति यज्ञ ऽवाहसि ॥ ३ ॥

उपरिषदः ३

उपांशोरित्युपंऽअंशोः। वीर्येण। जुहोमि। हतम्। रक्षः। स्वाहा। रक्षसाम्। त्वा। वधाय।
अवधिष्म। रक्षः। अमुष्य। त्वा। वधाय। अमुम्। अवधिष्म। जुषाणः। अप्तुः। आज्यस्य
वेतु। स्वाहा॥४॥ अपः। देवाः। मधुमतीरिति मधुऽमतीः। अगृभ्णन्। ऊर्जस्वतीः। राज
स्वइति राजऽस्वः। चितानाः। याभिः। मित्रावरुणौ। अभि। असिंचन्। याभिः। इंद्रम्। अ
नयन्। अति। अरातीः॥५॥ वृष्णः। ऊर्मिः। असि। राष्ट्रदा इति राष्ट्रऽदाः। राष्ट्रम्। मे।
देहि। स्वाहा। वृष्णः। ऊर्मिः। असि। राष्ट्रदा इति राष्ट्रऽदाः। राष्ट्रम्। अमुष्मै। देहि। वृष
सेन इति वृषऽसेनः॥६॥ अर्थेत इत्यर्थऽइतः। ओजस्वतीः। आपः। परिवाहिणीः। प

रिवाहिणीरिति परिऽवाहिणीः। अपाम्। पतिः। अपाम्। गर्भः। सूर्य्यवर्चस इति सूर्य्यऽ
वर्चसः। सूर्यत्वच इति सूर्यऽत्वचः। व्रजक्षित इति व्रजऽक्षितः। वाशाः। मांदाः। शक्व
रीः। जनभृत इति जनऽभृतः। विश्वभृत इति विश्वऽभृतः। शैष्ठाः। आपः। स्वरा
ज्ञीः। स्वराज्ञीरिति स्वऽराज्ञीः। स्थ। राष्ट्रदा इति राष्ट्रऽदाः। राष्ट्रम्। अमुष्मै। दत्त॥
७॥ सम्। मधुमतीरिति मधुऽमतीः। मधुमतीभिरिति मधुमतीभिः। पृच्यंताम्।
महि। क्षत्रम्। क्षत्रियाय। वन्वानाः। अनाधृष्टाः। सीदत। सह। ओजसा। महि। क्ष
त्रम्। क्षत्रियाय। दधतीः॥८॥ सविता। त्वा। प्रसवानामिति प्रऽसवानाम्। सुव

नाम्।अग्निः।गृहपतीनामितिगृहऽपतीनाम्।सोमः।वनस्पतीनाम्।बृहस्पतिः।
वाचे।इंद्रः।ज्येष्ठ्याय।रुद्रः।पशूनाम्।मित्रः।सत्याय।वरुणः।धर्मपतीनामिति
धर्मऽपतीनाम्॥९॥इमम्।देवाः।असपत्नम्।सुवध्वम्।महते।क्षत्राय।महते।
ज्येष्ठ्याय।इमम्।अमुम्।अमुष्य।पुत्रम्।अमुष्याः।पुत्रम्।अस्यै।विशे॥१०॥
एषः।वः।कुरवः।राजा।एषः।वः।पंचालाः।राजा।सोमः।अस्माकम्।ब्राह्मणा
नाम्।राजा॥११॥७॥सोमस्य।त्विषिः।असि।अग्नये।स्वाहा।सोमाय।सवि
त्रे।सरस्वत्यै।पूष्णे।बृहस्पतये॥१२॥इंद्राय।अंऽशुाय।श्लोकाय।घोषाय।भ

गाय।अर्यम्णे।अनिभृष्टमित्यनिःभृष्टम्।असि।वाचः।बंधुः।तपोजाः।तित
पःऽजाः।सोमस्य।दात्रम्।असि।स्वाहा।राजस्वइतिराजऽस्वः॥१३॥सधमाद
इतिसधऽमादः।शुष्मिनीः।आपः।एताः।अनाधृष्टाः।अपस्यः।वसानाः।पस्त्या
सु।चक्रे।वरुणः।सधस्थमितिसधऽस्थम्।अपाम्।शिशुः।मातृतमास्वितिमातृऽतमासु।अंतरिति।अंतः॥१४॥क्षत्रस्य।उल्बम्।जरायु।नाभिः।योनिः।
इंद्रस्य।वार्त्रघ्नमितिवार्त्रऽघ्नम्।असि।त्वया।अयम्।वृत्रम्।वध्यात्।मित्र
स्य।असि।वरुणस्य।असि॥१५॥त्वया।अयम्।वृत्रम्।वध्यात्।मित्र
स्य।असि।वरुणस्य।असि॥१५॥रुजा।दृवा।क्षुपा।पात।एनम्।प्राचम्

॥प॰॥
॥४॥

प्रत्यंचम्। तिर्यंचम्। दिग्भ्य इति दिक्ऽभ्यः। पात॥१५॥आविः। मर्याः। आवित्त इत्याऽ
वित्तः। अग्निः। गृहपतिरिति गृहऽपतिः। इंद्रः। वृद्धश्रवा इति वृद्धऽश्रवाः। पूषा। वि
श्ववेदा इति विश्वऽवेदाः। आवित्तौ इत्याऽवित्तौ। मित्रावरुणौ। धृतव्रताविति धृतऽ
व्रतौ। आवित्ते इत्याऽवित्ते। द्यावापृथिवी इति द्यावापृथिवी। विश्वशंभू इति वि
श्वऽशंभू। आवित्तेत्याऽवित्ता। अदितिः। उरुशर्मेत्युरुऽशर्मा॥१६॥अवेष्टा इत्य
वऽइष्टाः। दंदशूकाः। प्राचीम्। आ। रोह। गायत्री। त्वा। अवतु। रथंतरमिति रथम्ऽ
तरम्। साम। त्रिवृदिति त्रिऽवृत्। स्तोमः। वसंतः। ऋतुः। ब्रह्म। द्रविणम्॥१७॥

॥रा॰॥
॥४॥

दक्षिणाम्। आ। रोह। त्रिष्टुप्। त्रिस्तुबिति त्रिऽस्तुप्। त्वा। अवतु। बृहत्। साम। पंच
दश इति पंचऽदशः। स्तोमः। ग्रीष्मः। ऋतुः। क्षत्रम्। द्रविणम्॥१८॥प्रतीचीम्। आ।
रोह। जगती। त्वा। अवतु। वैरूपम्। साम। सप्तदश इति सप्तऽदशः। स्तोमः। वर्षाः।
ऋतुः। विट्। द्रविणम्॥१९॥उदीचीम्। आ। रोह। अनुष्टुप्। अनुस्तुबित्यनुऽस्तु
प्। त्वा। अवतु। वैराजम्। साम। एकविंश इत्येकऽविंशः। स्तोमः। शरत्।
ऋतुः। फलम्। द्रविणम्॥२०॥उर्ध्वाम्। आ। रोह। पंक्तिः। त्वा। अवतु। शाक्वर
रैवते इति शाक्वररैवते। सामनी इति सामनी। त्रिणवत्रयस्त्रिंशौ। त्रिनवत्रय

॥ य ॥
॥ ५ ॥

स्त्रिंशाइति त्रिनवत्रयस्त्रिंऽशौ। स्तोमौ। हेमंतशिशिरौ। ऋतूइत्यृतू। वर्चः। द्र
विणम्। प्रत्यस्तमिति प्रतिऽअस्तम्। नमुचेः। शिरः॥ १४॥ सोमस्य। त्विषिः। अ
सि। तवेवेति तवऽइव। मे। त्विषिः। भूयात्। मृत्योः। पाहि। ओजः। सहः। अमृत
म्। असि॥ १५॥ हिरण्यरूपाइति हिरण्यऽरूपौ। उषसः। विरोकइति विऽरोके।
उभौ। इंद्रौ। उत्। इतः। सूर्यः। च। आ। रोहतम्। वरुण। मित्र। गर्तम्। ततः। चक्षा
थाम्। अदितिम्। दितिम्। च। मित्रः। असि। वरुणः। असि॥ १६॥ सोमस्य।
त्वा। द्युम्नेन। अभि। सिंचामि। अग्नेः। भ्राजसा। सूर्यस्य। वर्चसा। इंद्रस्य।

॥ रा ॥
॥ ५ ॥

इंद्रियेण। मरुताम्। ओजसा। क्षत्राणाम्। क्षत्रपतिरिति क्षत्रऽपतिः। एधि। अ
ति। दिद्यून्। पाहि। आनराज्यायेति आनःऽराज्याय॥ १७॥ प्र। पर्वतस्य। वृषभ
स्य। पृष्ठात्। नावः। चरंति। स्वसिचइति स्वऽसिचः। इयानाः। ताः। आ। अवर
त्रन्। अधराक्। उदक्। ताः। अहिम्। बुध्न्यम्। अनु। रीयमाणाः। विष्णोः। विक्र
मणमिति विऽक्रमणम्। विक्रांतमिति विऽक्रांतम्। क्रांतम्। असि॥ १८॥ प्रजा
पतइति प्रजाऽपते। न। त्वत्। एतानि। अन्यः। विश्वा। रूपाणि। परि। ता। बभूव।
यत्कामाइति यत्ऽकामाः। ते। जुहुमः। तत्। नः। अस्तु। वयम्। स्याम। पतयः। र

यीणाम्॥२६॥रुद्र।यत्।ते।क्रवि।परम्।नाम।तस्मै।हुतम्।असि।अमेष्टमित्यमाः
इष्टम्।असि।स्वाहा॥२७॥इंद्रस्य।वज्रः।असि।मित्रावरुणयोः।त्वा।प्रशास्त्रोरि
तिप्रऽशास्त्रोः।प्रशिषा।प्रशिषेतिप्रऽशिषा।युनज्मि।अव्यथायै।त्वा।स्वधायै।त्वा।अ
रिष्टः।फल्गुनः।मरुताम्।प्रसवेनेतिप्रऽसवेन।जय।आपाम।मनसा।सम्।इं
द्रियेण॥२८॥मा।ते।इंद्र।ते।वयम्।तुराषाट्।अयुक्तासः।अब्रह्मता।वि।दसा
म।तिष्ठ।रथम्।अधि।यत्।वज्रहस्तेतिवज्रऽहस्त।आ।रश्मीन्।देव।युवसे
स्वश्वानितिसुऽअश्वान्॥२९॥अग्नये।गृहपतयइतिगृहऽपतये।स्वाहा।सो

माय।वनस्पतये।इंद्रस्य।इंद्रियाय।मरुताम्।ओजसे।पृथिवि।मातः।मा।मा।हिंसीः।
मोऽइतिमो।अहम्।त्वाम्॥३०॥हंसः।शुचिषत्।शुचिसदितिशुचिऽसत्।वसुः।अंतरिक्ष
सदित्यंतरिक्षऽसत्।होता।वेदिषत्।वेदिसदितिवेदिऽसत्।अतिथिः।दुरोणसदितिदु
रोणऽसत्।नृषत्।नृसदितिनृऽसत्।वरसदितिवरऽसत्।ऋतसदित्यृतऽसत्।व्योम
सदितिव्योमऽसत्।अब्जाइत्यप्ऽजाः।गोजाइतिगोऽजाः।ऋतजाइत्यृतऽजाः।अ
द्रिजाइत्यद्रिऽजाः।ऋतम्।बृहत्॥३१॥इयत्।असि।आयुः।असि।आयुः।मे।देहि।
युङ्।असि।वर्चः।असि।वर्चः।मे।देहि।ऊर्क्।असि।ऊर्जम्।मयि।धेहि।इंद्रस्य।वा

मा। बाहू इति बाहू। वीर्यकृता इति वीर्यऽकृता। उपावहरामि। उपऽअवहरामि॥ २२॥ ७॥
स्योना। असि। सुषदा। सुसदेति सुऽसदा। क्षत्रस्य। योनिः। असि। स्योनाम्। आ। सीद।
सुषदाम्। सुसदामिति सुऽसदाम्। क्षत्रस्य। योनिम्। आ। सीद॥ २३॥ नि। ससाद। धृत
व्रत इति धृतऽव्रतः। वरुणः। पस्त्यासु। आ। साम्राज्यायेति साम्ऽराज्याय। सुक्रतु
रिति सुऽक्रतुः॥ २४॥ अभिभूरित्यभिऽभूः। असि। अयानाम्। एताः। ते। पञ्च। दिशः। कल्पं
न्ताम्। ब्रह्मन्। त्वम्। ब्रह्मा। असि॥ २५॥ सविता। असि। सत्यप्रसव इति सत्यऽप्रसवः।
वरुणः। सत्यौजा इति सत्यऽओजाः। इन्द्रः। विश्वौजा इति विश्वऽओजाः। रुद्रः। सुशेव इति सुऽशेवः॥ २६॥

प्रियंकरेति प्रियम्ऽकर। श्रेयस्कर। श्रेयःकरेति श्रेयःऽकर। भूयस्कर। भूयःकरेति भूयःऽ
कर। इन्द्रस्य। वज्रः। असि। तेन। मे। रध्य॥ २७॥ अग्निः। पृथुः। धर्मणः। पतिः। जुषाणः।
अग्निः। पृथुः। धर्मणः। पतिः। आज्यस्य। हविषः। वेतु। स्वाहा। स्वाहाकृता इति स्वाहाऽ
कृताः। सूर्यस्य। रश्मिभिरिति रश्मिऽभिः। यतध्वम्। सजातानामिति सऽजातानाम्। ता४
मध्यमेष्ठ्याय। मध्यमेस्थ्यायेति मध्यमेऽस्थ्याय॥ २८॥ सवित्रा। प्रसवित्रेति
प्रऽसवित्रा। सरस्वत्या। वाचा। त्वष्ट्रा। रूपैः। पूष्णा। पशुभिरिति पशुऽभिः। इन्द्रेण।
तिः अस्मे॥ २९॥ बृहस्पतिना। ब्रह्मणा। वरुणेन। ओजसा। अग्निना। तेजसा। सोमेन।

राज्ञा। विष्णुना। देवतया। दक्षाभ्या। इमम्। यज्ञम्। विष्णुम्। आ। प्रवानि॥ ४०॥ अश्वि
भ्यामित्यश्वि ऽभ्याम्। पच्यस्व। सरस्वत्यै। इंद्राय। सुत्राम्णइति सुऽत्राम्णे। पच्य
स्व। वायोः। पूतः। पवित्रेण। प्रत्यङ्। सोमः। अतिस्रुतइत्यति ऽस्रुतः। इंद्रस्य। यु
ज्यः। सखा॥ ४१॥ कुवित्। अङ्ग। यवमंतइतियव ऽमंतः। यवम्। चित्। यथा। दां
ति। अनुपूर्वमित्यनु ऽपूर्वम्। वियूयेति वि ऽयूय। इहेहेतीह ऽइह। एषाम्। कृणुहि।
भोजनानि। ये। बर्हिषः। नमउक्तिमिति नमः ऽउक्तिम्। न। जग्मुः॥ अश्विभ्या
मित्यश्वि ऽभ्याम्। त्वा। सरस्वत्यै। इंद्राय। सुत्राम्णइतिसुऽत्राम्णे॥ ४२॥ युवम्।

सुरामम्। अश्विना। नमुचौ। आसुरे। सचा। विपिपानेति वि ऽपिपाना। शुभः। प
तीइतिपती। इदम्। कर्मस्वितिकर्म ऽसु। आ। वतम्॥ ४३॥ पुत्रमिवेति पुत्रम् ऽइव।
पितरौ। अश्विना। उभा। इंद्र। आवथुः। काव्यैः। दंऽसनाभिः। यत्। सुरामम्। वि।
अपिबः। शचीभिः। सरस्वती। त्वा। मघवन्निति मघ ऽवन्। अभिष्णक्॥ ४४॥
छ॥ इति शुक्लयजुः काण्वसंहितायां पदपाठे एकादशोऽध्यायः॥ छ॥ हरिः ॐ म्
युंजानः। प्रथमम्। मनः। तत्वाय। सविता। धियः। अग्नेः। ज्योतिः॥ निचाय्ये
ति निऽचाय्य। पृथिव्याः। अधि। आ। अभरत्॥ १॥ युक्तेन। मनसा। वयम्।

देवस्य। सवितुः। सवे। स्वर्ग्यायेति स्वःऽगेयाय। शक्त्या॥२॥ युक्त्वाय। सविता। देवान्
स्वः। यतः। धिया। दिवम्। बृहत्। ज्योतिः। करिष्यतः। सविता। प्र। सुवाति। तान्॥३॥
युंजतेगणान्त॥ युजे। वाम्। ब्रह्म। पूर्व्यम्। नमोभिरिति नमःऽभिः। वि। श्लोकः। एतु।
पथ्येवेति पथ्याऽइव। सूरेः। शृण्वन्तु। विश्वे। अमृतस्य। पुत्राः। आ। ये। धामानि।
दिव्यानि। तस्थुः॥४॥ यस्य। प्रयाणम्। प्रयानमिति प्रऽयानम्। अनु। अन्ये। इत्।
ययुः। देवाः। देवस्य। महिमानम्। ओजसा। यः। पार्थिवानि। विममऽइति विऽममे। सः।
एतशः। रजांसि। देवः। सविता। महित्वनेति महिऽत्वना॥५॥ देव। सवितरिति स

वितः। प्र। सुव। यज्ञम्। प्र। सुव। यज्ञपतिमिति यज्ञऽपतिम्। भगाय। दिव्यः। गंधर्वः। केत
पूरिति केतऽपूः। केतम्। नः। पुनातु। वाचः। पतिः। वाचम्। नः। स्वदतु॥६॥ इमम्। नः। देव।
सवितः। यज्ञम्। प्र। नय। देवाव्यमिति देवऽअव्यम्। सखिविदमिति सखिऽविदम्। स
त्राजितमिति सत्राऽजितम्। धनजितमिति धनऽजितम्। स्वर्जितमिति स्वःऽजितम्।
ऋचा। स्तोमम्। सम्। अर्द्धय। गायत्रेण। रथंतरमिति रथम्ऽतरम्। बृहत्। गायत्रवर्तनी
तिगायत्रऽवर्तनि। स्वाहा॥७॥ आ। ददे। गायत्रेण। छंदसा। अंगिरस्वत्। पृथिव्याः।
सधस्थादिति सधऽस्थात्। अग्निम्। पुरीष्यम्। अंगिरस्वत्। आ। भर। त्रैष्टुभेन। त्रै

स्तुभेनेति त्रैऽस्तुभेन । छंदसा । अंगिरस्वत् ॥८॥ अभ्रिः । असि । नारी । असि । त्वया । वयम्
अग्निम् । शकेम । खनितुम् । सधस्थ इति सधऽस्थे । आ । जागतेन । छंदसा । अंगिरस्वत् ।
॥९॥ हस्ते । आधायेत्याऽधाय । सविता । बिभ्रत् । अभ्रिम् । हिरण्ययीम् । अग्नेः । ज्योतिः ।
निचाय्येति निऽचाय्य । पृथिव्याः । अधि । आ । अभरत् । आनुष्टुभेन । आनुस्तुभेनेत्यानुऽ
स्तुभेन । छंदसा । अंगिरस्वत् ॥१०॥ प्रतूर्तमिति प्रऽतूर्तम् । वाजिन् । आ । द्रव । वरिष्ठा
म् । अनु । संवतमिति सम्ऽवतम् । दिवि । ते । जन्म । परमम् । अंतरिक्षे । तव । नाभिः ।
पृथिव्याम् । अधि । योनिः । इत् ॥११॥ युंजाथाम् । रासभम् । युवम् । अस्मिन् । यामे ।

वृषण्वसू इति वृषण्ऽवसू । अग्निम् । भरंतम् । अस्मयुमित्यस्मऽयुम् ॥१२॥ योगेयोग
इति योगेऽयोगे । तवस्तरमिति तवःऽतरम् । वाजेवाज इति वाजेऽवाजे । हवामहे । सखायः ।
इंद्रम् । ऊतये ॥१३॥ प्रतूर्वन्निति प्रऽतूर्वन् । आ । इहि । अवक्रामन्नित्यवऽक्रामन् । अप
स्तीः । रुद्रस्य । गाणपत्यमिति गाणऽपत्यम् । मयोभूरिति मयःऽभूः । आ । इहि । उरु । अं
तरिक्षम् । वि । इहि । स्वस्तिगव्यूतिरिति स्वस्तिऽगव्यूतिः । अभयानि । कृण्वन् । पूष्णा ।
सयुजेति सऽयुजा । सह ॥१४॥ पृथिव्याः । सधस्थादिति सधऽस्थात् । अग्निम् । पु
रीष्यम् । अंगिरस्वत् । आ । भर । अच्छ । इमः । भरिष्यामः ॥१५॥ अनु । अग्निः । उषसा

प॰ ११

म्।अग्रम्।अस्य।अनु।अहानि।प्रथमः।जातवेदा इति जातऽवेदाः।अनु।सूर्य
स्य।पुरुत्रेति पुरुऽत्रा।च।रश्मीन्।अनु।द्यावापृथिवी इति द्यावापृथिवी।आ।ततन्थ॥१६॥
आगत्येत्याऽगत्य।वाजी।अध्वानम्।सर्वाः।मृधः।वि।धूनुते।अग्निम्।सधस्थ इति
सधऽस्थे।महति।चक्षुषा।नि।चिकीषते॥१७॥आक्रम्येत्याऽक्रम्य।वाजिन्।पृथि
वीम्।अग्निम्।इच्छ।रुचा।त्वम्।भूमेः।वृत्वाय।नः।ब्रूहि।यतः।खनेम।तम्।वयम्॥
१८॥द्यौः।ते।पृष्ठम्।पृथिवी।सधस्थमिति सधऽस्थम्।आत्मा।अन्तरिक्षम्।स
मुद्रः।योनिः।विख्यायेति विऽख्याय।चक्षुषा।त्वम्।अभि।तिष्ठ।पृतन्यतः॥१९॥

रा॰ ११

उत्।क्राम।महते।सौभगाय।अस्मात्।आस्थानादित्याऽस्थानात्।द्रविणोदा इति द्रवि
णःऽदाः।वाजिन्।वयम्।स्याम।सुमताविति सुऽमतौ।पृथिव्याः।अग्निम्।खनन्तः।
उपस्थ इत्युपऽस्थे।अस्याः॥२०॥उत्।अक्रमीत्।द्रविणोदा इति द्रविणःऽदाः।वाजी।
अर्वा।अकरित्यकः।सः।लोकम्।सुकृतमिति सुऽकृतम्।पृथिव्याम्।ततः।खनेम।
सुप्रतीकमिति सुऽप्रतीकम्।अग्निम्।स्वरिति स्वः।रुहाणाः।अधि।नाकम्।उत्त
ममित्युत्ऽतमम्॥२१॥आ।त्वा।जिघर्मि।मनसा।घृतेन।प्रतिक्षियन्तमिति प्र
तिऽक्षियन्तम्।भुवनानि।विश्वा।पृथुम्।तिरश्चा।वयसा।बृहन्तम्।व्यचिष्ठम्।

पृ०॥
॥१२॥

अग्नेः। रभसम्। दंष्ट्रानम्॥२२॥ आ। विश्वतः। प्रत्यंचम्। जिघर्मि। अरक्षसा। मन
सा। तत्। जुषेत। मर्य्यश्रीरिति मर्य्यऽश्रीः। स्पृहयद्वर्ण इति स्पृहयत्ऽवर्णः। अग्निः।
न। अभिमृश इत्यभिऽमृशे। तन्वा। जर्भुराणः॥२३॥ परि। वाजपतिरिति वाजऽपतिः।
कविः। अग्निः। हव्यानि। अक्रमीत्। दधत्। रत्नानि। दाशुषे॥२४॥ परि। त्वा। अग्ने।
पुरम्। वयम्। विप्रम्। सहस्य। धीमहि। धृषद्वर्णमिति धृषत्ऽवर्णम्। दिवेदिव इति
दिवेऽदिवे। भेत्तारम्। भंगुरावताम्। भंगुरवतामिति भंगुरऽवताम्॥२५॥ त्वम्। अ
ग्ने। द्युभिरिति द्युऽभिः। आशुशुक्षणिः। अद्भ्य इत्यत्ऽभ्यः। अश्मनः। परि। वनेभ्यः।

॥रा०॥
॥१२॥

ओषधीभ्यः। नृणाम्। नृपत इति नृऽपते। जायसे। शुचिः॥२६॥ पृथिव्याः। सधस्था
दिति सधऽस्थात्। अग्निम्। पुरीष्यम्। अंगिरस्वत्। खनामि। ज्योतिष्मन्तम्। त्वा। अ
ग्ने। सुप्रतीकमिति सुऽप्रतीकम्। अजस्रेण। भानुना। दीद्यतम्। शिवम्। प्रजाभ्य इति
प्रऽजाभ्यः। अहिंसन्तम्। पृथिव्याः। सधस्थादिति सधऽस्थात्। अग्निम्। पुरी
ष्यम्। अंगिरस्वत्। खनामः॥२७॥ अपाम्। पृष्ठम्। असि। योनिः। अग्नेः। समुद्रम्
अभितः। पिन्वमानम्। वर्द्धमानः। महान्। आ। च। पुष्करे। दिवः। मात्रया। वरिम्णा।
प्रथस्व॥२८॥ शर्म। च। स्थः। वर्म। च। स्थः। अछिद्रे इत्यछिद्रे। बहुले इति बहुले।

प॰ ॥
॥ ६२ ॥

उभेऽइत्युभे। व्यचस्वतीऽइति व्यचस्वती। सम्। वसाथाम्। भर्तम्। अग्निम्। पुरीष्यम्॥२९॥
सम्। वसाथाम्। स्वर्विदेति स्वःऽविदा। समीचीऽइति समीची। उरसा। त्मना। अग्निम्। अं-
तः। भरिष्यन्तीऽइति भरिष्यन्ती। ज्योतिष्मन्तम्। अजस्रम्। इत्। पुरीष्यः। असि। विश्वभ-
राऽइति विश्वऽभराः। अथर्वा। त्वा। प्रथमः। निः। अमन्थत्। अग्ने॥३०॥ त्वाम्। अग्ने। पु-
ष्करात्। अधि। अथर्वा। निः। अमन्थत। मूर्ध्नः। विश्वस्य। वाघतः॥३१॥ तम्। उइत्युँ।
त्वा। दध्यङ्। ऋषिः। पुत्रः। ईधे। अथर्वणः। वृत्रहणम्। वृत्रहणमिति वृत्रऽहनम्। पुरन्दर-
मिति पुरम्ऽदरम्॥३२॥ तम्। उइत्युँ। त्वा। पाथ्यः। वृषा। सम्। ईधे। दस्युहन्तममिति द-

॥ रा॰ ॥
॥ ६२ ॥

स्युहन्ऽतमम्। धनंजयमिति धनम्ऽजयम्। रणेरणऽइति रणेऽरणे॥३३॥ सीद। होतरि-
ति होतः। स्वे। उइत्युँ। लोके। चिकित्वान्। सादय। यज्ञम्। सुकृतस्येति सुऽकृतस्य। यो-
नौ। देवावीरिति देवऽअवीः। देवान्। हविषा। यजासि। अग्ने। बृहत्। यजमाने। वयः।
धाः॥३४॥ नि। होता। होतृषदने। होतृसदनऽइति होतृऽसदने। विदानः। त्वेषः। दीदि-
वानिति दीदिऽवान्। असदत्। सुदक्षऽइति सुऽदक्षः। अदब्धव्रतप्रमतिरित्यदब्धव्र-
तऽप्रमतिः। वसिष्ठः। सहस्रम्भरऽइति सहस्रम्ऽभरः। शुचिजिह्वऽइति शुचिऽजिह्वः।
अग्निः॥३५॥ सम्। सीदस्व। महान्। असि। शोचस्व। देववीतमऽइति देवऽवीतमः।

विऽधूमम्। अग्ने। अरुषम्। मियेध्य। सृज। प्रशस्तेति प्रऽशस्त। दर्शतम्॥३६॥ ७॥
अपः। देवीः। उप। सृज। मधुमतीरिति मधुऽमतीः। अयक्ष्माय। प्रजाभ्य इति प्रऽजा
भ्यः। तासाम्। आस्थानादित्याऽस्थानात्। उत्। जिहताम्। ओषधयः। सुपिप्पलाः॥
३७॥ सम्। ते। वायुः। मातरिश्वा। दधातु। उत्तानायाः। हृदयम्। यत्। विकस्तमि-
ति विऽकस्तम्। यः। देवानाम्। चरसि। प्राणथेन। कस्मै। देव। वषट्। अस्तु। तुभ्य
म्॥३८॥ सुजात इति सुऽजातः। ज्योतिषा। सह। शर्म। वरूथम्। आ। असदः।
स्वरिति स्वः। वासः। अग्ने। विश्वरूपमिति विश्वऽरूपम्। सम्। व्ययस्व। विभावसो

इति विभाऽवसो॥३९॥ उत्। उँ इति। तिष्ठ। स्वध्वरेति सुऽअध्वर। अव। नः। देव्या।
धिया। दृशे। च। भासा। बृहता। सुशुक्वनिरिति सुऽशुक्वनिः। आ। अग्ने। याहि। सु
शस्तिभिरिति सुशस्तिऽभिः॥४०॥ ऊर्ध्वः। उँ इति। सु। नः। ऊतये। तिष्ठ। देवः।
न। सविता। ऊर्ध्वः। वाजस्य। सनिता। यत्। अञ्जिभिरित्यञ्जिऽभिः। वाघद्भिरि
ति वाघत्ऽभिः। विह्वयामह इति विऽह्वयामहे॥४१॥ सः। जातः। गर्भः। असि।
रोदस्योः। अग्ने। चारुः। विभृत इति विऽभृतः। ओषधीषु। चित्रः। शिशुः। परि।
तमांसि। अक्तून्। प्र। मातृभ्य इति मातृऽभ्यः। अधि। कनिक्रदत्। गाः॥४२॥

रा॰
१५

स्थिरः। भव। वीड्वंगइतिविळुऽअंगः। आशुः। भव। वाजी। अर्वन्। पृथुः। भव। सुषदः। सुसदइतिसुऽसदः। त्वम्। अग्नेः। पुरीषवाहनः। पुरीषवाहनइतिपुरीषऽवाहनः॥ ४३॥ शिवः। भव। प्रजाभ्यइतिप्रऽजाभ्यः। मानुषीभ्यः। त्वम्। अंगिरः। मा। द्यावापृथिवीइतिद्यावापृथिवी। अभि। शोचीः। मा। अंतरिक्षम्। मा। वनस्पतीन्॥ ४४॥ प्र। एतु। वाजी। कनिक्रदत्। नानदत्। रासभः। पत्वा। भरन्। अग्निम्। पुरीष्यम्। मा। पादि। आयुषः। पुरा॥ ४५॥ वृषा। अग्निम्। वृषणम्। भरन्। अपाम्। गर्भम्। समुद्रियम्। अग्ने। आ। याहि। वीतये॥ ऋतम्। सत्यम्। ऋतम्। सत्यम्। अ

॥ रा॰॥
॥ १५॥

ग्निम्। पुरीष्यम्। अंगिरस्वत्। भरामः॥ ४६॥ ओषधयः। प्रति। मोदध्वम्। अग्निम्। एतम्। शिवम्। आयंतमित्याऽयंतम्। अभि। अत्र। युष्माः। व्यस्यन्नितिविऽअस्यन्। विश्वाः। अनिराः। अमीवाः। निषीदन्। निसीदन्निति निऽसीदन्। नः। अप। दुर्मतिमितिदुःऽमतिम्। जहि॥ ४७॥ ओषधयः। प्रति। गृभ्णीत। पुष्पवतीरितिपुष्पऽवतीः। सुपिप्पलाइतिसुऽपिप्पलाः। अयम्। वः। गर्भः। ऋत्वियः। प्रत्नम्। सधस्थमितिसधऽस्थम्। आ। असदत्॥ ४८॥ वि। पाजसा। पृथुना। शोशुचानः। बाधस्व। द्विषः। रक्षसः। अमीवाः। सुशर्मणइतिसुऽशर्मणः। बृहतः। शर्म

गि। स्याम। अग्नेः। अहम्। सुहवस्येति सुऽहवस्य। प्रणीतौ। प्रनीताविति प्रऽनीतौ॥ ४९॥ ॥
आपः। हि। स्थ। मयोभुव इति मयःऽभुवः। ताः। नः। ऊर्जे। दधातन। महे। रणाय। चक्ष
से॥ ५०॥ यः। वः। शिवतम इति शिवऽतमः। रसः। तस्य। भाजयत। इह। नः। उशती
रिवेत्युशतीःऽइव। मातरः॥ ५१॥ तस्मै। अरम्। गमाम। वः। यस्य। क्षयाय। जिन्वथ।
आपः। जनयथ। च। नः॥ ५२॥ मित्रः। संसृज्येति सम्ऽसृज्य। पृथिवीम्। भूमिम्।
च। ज्योतिषा। सह। सुजातमिति सुऽजातम्। जातवेदसमिति जातऽवेदसम्। अय
क्ष्माय। त्वा। सम्। सृजामि। प्रजाभ्य इति प्रऽजाभ्यः॥ ५३॥ रुद्राः। संसृज्येति सम्ऽ

सृज्य। पृथिवीम्। बृहत्। ज्योतिः। सम्। ईधिर इति ईधिरे। तेषाम्। भानुः। अजस्रः। इत्। शुक्रः।
देवेषु। रोचते॥ ५४॥ संसृष्टामिति सम्ऽसृष्टाम्। वसुभिरिति वसुऽभिः। रुद्रैः।
धीरैः। कर्मण्याम्। मृदम्। हस्ताभ्याम्। मृद्वीम्। कृत्वा। सिनीवाली। कृणोतु। ताम्॥
५५॥ सिनीवाली। सुकपर्देति सुऽकपर्दा। सुकुरीरेति सुऽकुरीरा। स्वौपशेति सुऽओपशा।
सा। तुभ्यम्। अदिते। महि। आ। उखाम्। दधातु। हस्तयोः॥ ५६॥ उखाम्। कृणोतु।
शक्त्या। बाहुभ्यामिति बाहुऽभ्याम्। अदितिः। धिया। माता। पुत्रम्। यथा। उपस्थ इत्युप
ऽस्थे। सा। अग्निम्। बिभर्तु। गर्भे। आ॥ ५७॥ मखस्य। शिरः। असि। वसवः।

पु॰
१७

त्वा। कृण्वंतु। गायत्रेण। छंदसा। अंगिरस्वत्। ध्रुवा। असि। पृथिवी। असि। धारय। म
यि। प्रजामिति प्रऽजाम्। रायः। पोषम्। गौपत्यम्। सुवीर्य्यमिति सुऽवीर्य्यम्। सजा नि
ति सऽजातान्। यजमानाय। रुद्राः। त्रैष्टुभेन। त्रैस्तुभेनेति त्रैस्तुऽभेन। अंतरिक्षम्। आ
दित्याः। जागतेन। द्यौः। विश्वे। त्वा। देवाः। वैश्वानराः। कृण्वंतु। आनुष्टुभेन। आनुस्तु
भेनेत्यानुऽस्तुभेन। छंदसा। अंगिरस्वत्। ध्रुवा। असि। दिशः। असि। अदित्यै। रास्ना
असि। अदितिः। ते। बिलम्। गृभ्णातु। ५८। कृत्वाय। सा। महीम्। उखाम्। मृन्मयी
मिति मृत्ऽमयीम्। योनिम्। अग्नये। पुत्रेभ्यः। प्र। अछैयत्। अदितिः। श्रपयान्। इ

रा॰
१७

ति। ५९। वसवः। त्वा। धूपयंतु। गायत्रेण। छंदसा। अंगिरस्वत्। रुद्राः। त्रैष्टुभेन। त्रैस्तु
भेनेति त्रैस्तुऽभेन। आदित्याः। जागतेन। विश्वे। त्वा। देवाः। वैश्वानराः। धूपयंतु। आनु
ष्टुभेन। आनुस्तुभेनेत्यानुऽस्तुभेन। छंदसा। अंगिरस्वत्। इंद्रः। वरुणः। विष्णुः। त्वा।
धूपयतु। ६०। अदितिः। त्वा। देवी। विश्वदेव्यावती। विश्वदेव्यवतीति विश्वदेव्यऽ
वती। पृथिव्याः। सधस्थइति सधऽस्थे। अंगिरस्वत्। खनतु। अवट। ६१। देवा
नाम्। त्वा। पत्नीः। देवीः। विश्वदेव्यावतीः। विश्वदेव्यवतीरि विश्वदेव्यऽवतीः। पृथि
व्याः। सधस्थइति सधऽस्थे। अंगिरस्वत्। दधतु। उखे। धिषणाः। अभि। इंधताम्

ति

॥ द ॥
॥ ९८ ॥

वरत्रीः ॥ अपयंतु । ग्नाः । पचंतु । जनयः । अछिन्नपत्राऽस्य छिन्नऽपत्राः ॥ ६१ ॥ ७ ॥
मित्रस्य । चर्षणीधृतः । चर्षणिधृत इति चर्षणिऽधृतः । अवः । देवस्य । सानसि । द्युम्न
म् । चित्रश्रवस्तममिति चित्रश्रवःऽतमम् ॥ ६२ ॥ देवः । त्वा । सविता । उत् । वपतु । सु
पाणिरिति सुऽपाणिः । स्वंगुरिरिति सुऽअंगुरिः । सुबाहुरिति सुऽबाहुः । उत । शक्त्या
अव्यथमाना ॥ पृथिव्याम् । आशाः । दिशः । आ । पृण ॥ ६३ ॥ उत्थाय । बृहती ।
भव । उत । ऊं इति । तिष्ठ । ध्रुवा । त्वम् । मित्र । एताम् । त्वा । उखाम् । परि । ददामि । अ
भित्त्यै । एषा । मा । भेदि ॥ वसवः । त्वा । आ । छृंदंतु ॥ ६४ ॥ आकूतिमित्याऽकूतिम्

॥ रा ॥
॥ ९८ ॥

अग्निम् । प्रयुजमिति प्रऽयुजम् । स्वाहा । मनः । मेधाम् । चित्तम् । विज्ञातमिति विऽज्ञा
तम् । वाचः । विधृतिमिति विऽधृतिम् । अग्निम् । प्रयुजमिति प्रऽयुजम् । स्वाहा । प्र
जापतय इति प्रजाऽपतये । मनवे । अग्नये । वैश्वानराय ॥ ६५ ॥ विश्वोदेगणान्त्स
मा । सु । भित्थाः । मा । सु । रिषः । अंब । धृष्णु । वीरयस्व । सु । अग्निः । च । इदम् । करिष्य
थः ॥ ६६ ॥ दृंहस्व । देवि । पृथिवि । स्वस्तये । आसुरी । माया । स्वधया । कृता । अ
सि । जुष्टम् । देवेभ्यः । इदम् । अस्तु । हव्यम् । अरिष्टा । त्वम् । उत् । इहि । यज्ञे । अस्मि
न् ॥ ६७ ॥ द्रुन्न इति द्रुऽअन्नः । सर्पिरासुतिरिति सर्पिःऽआसुतिः । प्रत्नः । होता । व

॥ १९ ॥

रेण्यः। सहसः। पुत्रः। अद्भुतः॥६८॥ परस्याः। अधि। संवत इति सम्ऽवतः। अवरान्।
अभि। आ। तर। यत्र। अहम्। अस्मि। तान्। अव॥६९॥ परमस्याः। परावत इति प
राऽवतः। रोहिदश्व इति रोहित्ऽअश्वः। इह। आ। गहि। पुरीष्यः। पुरुप्रिय इति पुरुऽ
प्रियः। अग्ने। त्वम्। तर। मृधः॥७०॥ यत्। अग्ने। कानि। कानि। चित्। आ। ते। दा
रूणि। दध्मसि। सर्वम्। तत्। अस्तु। ते। घृतम्। तत्। जुषस्व। यविष्ठ्य॥७१॥ यत्। अ
त्ति। उपजिह्विकेत्युपऽजिह्विका। यत्। वम्रः। अतिसर्पतीत्यतिऽसर्पति। सर्वम्।
तत्। अस्तु। ते। घृतम्। तत्। जुषस्व। यविष्ठ्य॥७२॥ अहरहरित्यहःऽअहः। अप्र

॥ २ ॥

यावमित्यप्रऽयावम्। भरन्तः। अश्वायेवेत्यश्वायऽइव। तिष्ठते। घासम्। अस्मै। रायः। पोषे
ण। सम्। इषा। मदन्तः। अग्ने। मा। ते। प्रतिवेशा इति प्रतिऽवेशाः। रिषाम॥७३॥ नाभा। पृ
थिव्याः। समिधान इति सम्ऽइधाने। अग्नौ। रायः। पोषाय। बृहते। हवामहे। इरंमद
मितीरम्ऽमदम्। बृहदुक्थमिति बृहत्ऽउक्थम्। यजत्रम्। जेतारम्। अग्निम्। पृतना
सु। सासहिम्। ससहिमिति ससहिम्॥७४॥ याः। सेनाः। अभीत्वरीरित्यभिऽइत्वरीः।
आव्याधिनीरित्याऽव्याधिनीः। उगणाः। उत। ये। स्तेनाः। ये। च। तस्कराः। तान्। ते। अग्ने।
अपि। दधामि। आस्ये॥७५॥ दंष्ट्राभ्याम्। मलिम्लून्। जम्भ्यैः। तस्करान्। उत। हनुभ्याम्।

प॰ ॥२०॥

स्यं

मस्मसा

तिहनुऽभ्याम्। स्तेनान्। भगव इतिभगऽवः। तान्। त्वम्। खादा। सुखादितानितिसुऽखादितान्॥ ७६॥ ये। जनेषु। मलिम्लवः। स्तेनासः। तस्कराः। वने। ये। कक्षेषु। अघायवः। अघयव इत्यघऽयवः। तान्। ते। दधामि। जंभयोः॥ ७७॥ यः। अस्मभ्यम्। अरातीयात्। अरातियादित्यरातिऽयात्। यः। च। नः। द्वेषते। जनः। निंदात्। यः। अस्मान्। धिप्सात्। च। सर्वम्। तम्। भस्मसा। कुरु॥ ७८॥ संशितमितिसम्ऽशितम्। मे। ब्रह्म। संशितमितिसम्ऽशितम्। वीर्यम्। बलम्। संशितमितिसम्ऽशितम्। क्षत्रम्। जिष्णु। यस्य। अहम्। अस्मि। पुरोहितइतिपुरःऽहितः॥ ७९॥ उत्। एषाम्। बाहू इतिबाहू। अतिरम्। उत्। वर्चः। अथो इत्यथो। ब

य॰ ॥२०॥

लम्। क्षिणोमि। ब्रह्मणा। अमित्रान्। उत्। नयामि। स्वान्। अहम्॥ ८०॥ अन्नपत इत्यन्नऽपते। अन्नस्य। नः। देहि। अनमीवस्य। शुष्मिणः। प्रप्रेतिप्रऽप्र। दातारम्। तारिषः। ऊर्जम्। नः। धेहि। द्विपद इतिद्विऽपदे। चतुष्पदे। चतुःपद इतिचतुःऽपदे। विश्वकर्मण इतिविश्वऽकर्मणे। स्वाहा॥ ८१॥ पुनरितिपुनः। त्वा। आदित्याः। रुद्राः। वसवः। सम्। इंधताम्। पुनः। ब्रह्माणः। वसुनीथेतिवसुऽनीथ। यज्ञैः। घृतेन। त्वम्। तन्वम्। वर्द्धयस्व। सत्याः। संतु। यजमानस्य। कामाः। स्वाहा॥ ८२॥ ११॥ इतियजुःकाण्वसंहितायांपदपाठे एकादशोध्यायः॥ ११॥ हरिः ॐ॥ दृशानः। रुक्मः। उर्व्या। वि। अद्यौत्। दुर्मर्षमितिदुः

य २३

पर्षम्। आयुः। श्रिये। रुचानः। अग्निः। अमृतः। अभवत्। वयोभिरितिवयःऽभिः। यत्। एनम्।
द्यौः। अजनयत्। सुरेताइतिसुऽरेताः॥१॥ नक्तोषासा। नक्तोषसेतिनक्तोषसा। समनसे
तिसऽमनसा। विरूपइतिविऽरूपे। धापयेतेइतिधापयेते। शिशुम्। एकम्। समीचीसम्ऽ इति
ईची। द्यावाक्षामा। रुक्मः। अंतः। वि। भाति। देवाः। अग्निम्। धारयन्। द्रविणोदाइतिद्र
विणःऽदाः॥२॥ विश्वा। रूपाणि। प्रति। मुंचते। कविः। प्र। असावीत्। भद्रम्। द्विपदइति
द्विऽपदे। चतुष्पदे। चतुःपदइतिचतुःऽपदे। वि। नाकम्। अख्यत्। सविता। वरेण्यः। अ
नु। प्रयाणम्। प्रयानमितिप्रऽयानं। उषसः। वि। राजति॥३॥ सुपर्णइतिसुऽपर्णः।

॥रा०॥ २३॥

असि। गरुत्मान्। त्रिवृदितित्रिऽवृत्। ते। शिरः। गायत्रम्। चक्षुः। बृहद्रथंतरइ
तिबृहत्ऽरथंतरे। पक्षौ। स्तोमः। आत्मा। छंदांसि। अंगानि। यजूंषि। नाम। सा
म। ते। तनूः। वामदेव्यमितिवामऽदेव्यम्। यज्ञायज्ञियमितियज्ञाऽयज्ञियम्। पुछं।
धिष्ण्याः। शफाः॥४॥ सुपर्णइतिसुऽपर्णः। असि। गरुत्मान्। दिवम्। गछ। स्वरिति
स्वः। पत। विष्णोः। क्रमः। असि। सपत्नहेतिसपत्नऽहा। गायत्रम्। छंदः। आ। रोह।
पृथिवीम्। अनु। वि। क्रमस्व। अभिमातिहेत्यभिमातिऽहा। त्रैष्टुभम्। अंतरिक्षम्।
अरातीयतः। अरातियतइत्यरातियतः। हंता। जागतम्। दिवम्। शत्रूयतः। शत्रु

क्रमितिक्रमम्

यत इति त्रा॒त्रुऽयतः। हंता। आनुष्टुभम्। आनुस्तुभमित्यानुऽस्तुभम्। छंदः। आ।
रोह। दिशः। अनु। वि। क्रमस्व॥८॥ अक्रंदत्। अग्निः। स्तनयन्निवेतिस्तनयन्ऽइ
व। द्यौः। क्षाम। रेरिहत्। वीरुधः। समंजन्निति संऽअंजन्। सद्यः। जज्ञानः। वि।
हि। ई। इद्धः। अख्यत्। आ। रोदसीइति रोदसी। भानुना। भाति। अंतरित्यंतः।
॥७॥ अग्ने। अभ्यावर्तिन्नित्यभिऽआवर्तिन्। अभि। मा। नि। वर्तस्व। आयुषा। व
र्चसा। प्रजयेति प्रऽजया। धनेन। सन्या। मेधया। रय्या। पोषेण॥९॥ अग्ने। अं-
गिरः। शतम्। ते। संतु। आवृत इत्याऽवृतः। अध। पोषस्य। पोषेण। पुनः। नष्टम्

सहस्रं। ते। उपावृत इत्युपऽआवृतः। आ। कृधि। पुनः। नः। रयिम्। आ। कृधि॥१०॥
पुनः। ऊर्जा। नि। वर्तस्व। पुनः। अग्ने। इषा। आयुषा। पुनः। नः। पाहि। अंहसः॥
११॥ सह। रय्या। नि। वर्तस्व। अग्ने। पिन्वस्व। धारया। विश्वप्स्न्येति विश्वऽप्स्न्या। वि
श्वतः। परि॥११॥ आ। त्वा। अहार्षम्। अंतः। अभूः। ध्रुवः। तिष्ठ। अविचाचलि
रित्यविऽचाचलिः। विशः। सर्वाः। वांछंतु। मा। त्वत्। राष्ट्रं। अधि। भ्रशत्॥१२॥
उत्। उत्तममित्युत्ऽतमं। वरुण। पाशम्। अस्मत्। अव। अधमम्। वि। मध्यमम्।
श्रथाय। श्रथयेति श्रथय। अथ। वयम्। आदित्य। व्रते। तव। अनागसः। अदित

प०
२२

पे। स्याम॥१३॥ अग्ने। बृहन्। उषसाम्। ऊर्ध्वः। अस्थात्। निर्जगन्वानिति निः ऽ जगन्वा
न्। तमसः। ज्योतिषा। आ। अगात्। अग्निः। भानुना। रुशता। स्वंग इति सु ऽ अंगः।
आ। जातः। विश्वा। सद्मानि। अप्राः॥१४॥ सीद। त्वम्। मातुः। अस्याः। उपस्थ इ
त्युप ऽ स्थे। विश्वानि। अग्ने। वयुनानि। विद्वान्। मा। एनाम्। तपसा। मा। अर्चिषा।
अभि। शोचीः। अंतः। अस्याम्। शुक्रज्योतिरिति शुक्र ऽ ज्योतिः। वि। भाहि।
॥१५॥ अंतः। अग्ने। रुचा। त्वम्। उखायाः। सदने। स्वे। तस्याः। त्वम्। हरसा। तपन्।
जातवेद इति जात ऽ वेदः। शिवः। भव। शिवः। भूत्वा। मह्यं। अग्ने। अथो इत्यथो। सीद। शिवः।
॥१६॥

योनिम्। इह। आ। असदः॥१७॥ ७॥ दिवः। परि। प्रथमम्। जज्ञे। अस्मत्। द्वितीयम्। प
रि। जातवेदा इति जात ऽ वेदाः। तृतीयम्। अप्ऽस्विति अप्ऽसु। नृमणाः। नृमना इति नृ ऽ मनाः।
अजस्रम्। इंधानः। एनम्। जरते। स्वाधीरिति सु ऽ आधीः॥१८॥ विद्म। ते। अग्ने। त्रेधा।
त्रयाणि। विद्म। ते। धाम। विभृतेति वि ऽ भृता। पुरुत्रेति पुरु ऽ त्रा। विद्म। ते। नाम। परम्।
गुहा। यत्। विद्म। तम्। उत्सम्। आ। जगंथ॥१९॥ समुद्रे। त्वा। नृमणाः।
नृमना इति नृ ऽ मनाः। अप्ऽस्वित्यप्ऽसु। अंतः। नृचक्षा इति नृ ऽ चक्षाः। ईधे। दिवः।
अग्ने। ऊधन्। तृतीये। त्वा। रजसि। तस्थिवांसमिति तस्थि ऽ वांसम्। अपाम्।

अग्निः

यतः

प.
२४

उपस्थ इत्युपऽस्थे । महिषाः । अवर्धन् ॥ २० ॥ अक्रंदत् ॥ श्रीणाम् । उदार इत्युत्ऽआरः ।
धरुणः । रयीणाम् । मनीषाणाम् । प्रार्पण इति प्रऽअर्पणः । सोमगोपा इति सोमऽगोपाः ।
वसुः । सूनुः । सहसः । अप्स्वित्यप्ऽसु । राजा । वि । भाति । अग्रे । उषसाम् । इधानः ॥
२१ ॥ विश्वस्य । केतुः । भुवनस्य । गर्भः । आ । रोदसी इति रोदसी । अपृणात् । जाय
मानः ॥ वीळुम् । चित् । अद्रिम् । अभिनत् । परायन्निति पराऽयन् । जनाः । यत् । अ
ग्निम् । अयजंत । पंच ॥ २२ ॥ उशिक् । पावकः । अरतिः । सुमेधा इति सुऽमेधाः । म
र्तेषु । अग्निः । अमृतः । नि । धायि । इयर्ति । धूमम् । अरुषम् । भरिभ्रत् । उत् । शुक्रेण ।

रा.
२४

शोचिषा । द्याम् । इनक्षन् ॥ २३ ॥ दृशानः ॥ यः । ते । अद्य । कृणवत् । भद्रशोच इति भद्र
ऽशोचे । अपूपम् । देव । घृतवंतमिति घृतऽवंतम् । अग्ने । प्र । तम् । नय । प्रतरमिति
प्रऽतरम् । वस्यः । अच्छ । अभि । सुम्नम् । देवभक्तमिति देवऽभक्तम् । यविष्ठ ॥ २४ ॥ आ
तम् । भज । सौश्रवसेषु । अग्ने । उक्थउक्थ इत्युक्थेऽउक्थे । आ । भज । शस्यमाने ।
प्रियः । सूर्ये । प्रियः । अग्ना । भवाति । उत् । जातेन । भिनदत् । उत् । जनित्वैरिति
जनिऽत्वैः ॥ २५ ॥ त्वाम् । अग्ने । यजमानाः । अनु । द्यून् । विश्वा । वसु । दधिरे । वार्या
णि । त्वया । सह । द्रविणम् । इच्छमानाः । व्रजम् । गोमंतमिति गोऽमंतम् । उशिजः ।

१
२५

वि। वक्षुः॥२६॥ अस्त्वावि। अग्निः। नराम्। सुप्रीवइतिसुऽप्रीवः। वैश्वानरः। ऋषिभि
रित्यृषिऽभिः। सोमगोपाइतिसोमऽगोपाः। अद्वेषेइत्यद्वेषे। द्यावापृथिवीइतिद्या
वापृथिवी। हुवेम। देवाः। धत्त। रयिम्। अस्मेइत्यस्मे। सुवीरमितिसुऽवीरम्॥२७
७॥ समिधा। अग्निम्। उत। उरुष्य। त्वा। विश्वे। देवाः। अग्ने। भरन्तु। चित्तिभिरितिचि
त्तिऽभिः। सः। नः। भव। शिवः। त्वम्। सुप्रतीकइतिसुऽप्रतीकः। विभावसुरितिवि
भाऽवसुः॥२८॥ प्र। इत्। अग्ने। ज्योतिष्मान्। याहि। शिवेभिः। अर्चिभिरित्यर्चिः
भिः। त्वम्। बृहद्भिरितिबृहत्ऽभिः। भानुभिरितिभानुऽभिः। भासन्। मा। हिंसीः।

रा·
२५

तन्वाः। प्रजाइतिप्रऽजाः॥२९॥ अक्रन्दत्॥ प्रेप्रेतिप्रऽप्र। अयम्। अग्निः। भरतस्य।
शृण्वे। वि। यत्। सूर्यः। न। रोचते। बृहत्। भाः। अभि। यः। पूरुम्। पृतनासु। तस्थौ
दीदाय। दैव्यः। अतिथिः। शिवः। नः॥३०॥ आपः। देवीः। प्रति। गृभ्णीत। भस्म। ए
तत्। स्योने। कृणुध्वम्। सुरभौ। उऽइत्यू। लोके। तस्मै। नमन्ताम्। जनयः। सुपत्नीरि
तिसुऽपत्नीः। मातेवेतिमाताऽइव। पुत्रम्। बिभृत। अप्स्वित्यप्ऽसु। एनत्॥३१॥
अप्स्वित्यप्ऽसु। अग्ने। सधिः। तव। सः। ओषधीः। अनु। रुध्यसे। गर्भे। सन्। जा
यसे। पुनरितिपुनः॥३२॥ गर्भः। असि। ओषधीनाम्। गर्भः। वनस्पतीनाम्। गर्भः।

पु.
२५

विश्वस्य। भूतस्य। अग्ने। गर्भः। अपाम्। असि॥ ३७॥ प्रसद्येति प्रऽसद्य। भस्मना। यो
निम्। अपः। च। पृथिवीम्। अग्ने। संसृज्येति सम्ऽसृज्य। मातृभिरिति मातृऽभिः।
त्वम्। ज्योतिष्मान्। पुनः। आ। असदः॥ ३८॥ पुनः। आसद्येत्याऽसद्य। सदनम्। अ
पः। च। पृथिवीम्। अग्ने। शेषे। मातुः। यथा। उपस्थ इत्युपऽस्थे। अन्तः। अस्याम्। शिव
तम इति शिवऽतमः॥ ३९॥ पुनरूर्जा। सहरय्या॥ बोध। मे। अस्य। वचसः। यविष्ठ। मंहिष्ठ
स्य। प्रभृतस्येति प्रऽभृतस्य। स्वधाव इति स्वधाऽवः। पीयति। त्वः। अनु। त्वः। गृणाति।
वन्दारुः। ते। तन्वम्। वन्दे। अग्ने॥ ४२॥ सः। बोधि। सूरिः। मघवेति मघऽवा। वसुपत

रा.
॥ २६ ॥

इति वसुऽपते। वसुदावन्निति वसुऽदावन्। युयोधि। अस्मत्। द्वेषांसि॥ पुनस्त्वा॥
४४॥ अप। इत। वि। इत। वि। च। सर्पत। अतः। ये। अत्र। स्थ। पुराणाः। ये। च। नूतनाः।
अदात्। यमः। अवसानमित्यवऽसानम्। पृथिव्याः। अक्रन्। इमम्। पितरः। लोकम्।
अस्मै॥ ४५॥ संज्ञानमिति सम्ऽज्ञानम्। असि। कामधरणमिति कामऽधरणम्। मयि
ते। कामधरणमिति कामऽधरणम्। भूयात्। अग्नेः। भस्म। असि। अग्नेः। पुरीषम्।
असि। चितः। स्थ। परिचित इति परिऽचितः। ऊर्ध्वचित इत्यूर्ध्वऽचितः। श्रयध्वम्।
४६॥ अयम्। सः। अग्निः। यस्मिन्। सोमम्। इन्द्रः। सुतम्। दधे। जठरे। वावशानः।

ग॰
॥२७॥

सहस्रियम्।वाजम्।अत्यम्।न।सप्तिम्।ससवानितिससऽवान्।सन्।स्तूयसे।जातवे
दइतिजातऽवेदः॥५०॥अग्ने।यत्।ते।दिवि।वर्चः।पृथिव्याम्।यत्।ओषधीषु।अ
प्स्वित्यप्ऽसु।आ।यजत्र।येन।अंतरिक्षम्।उरु।आततंथेत्याऽततंथ।त्वेषः।सः।भानुः
अर्णवः।नृचक्षाइतिनृऽचक्षाः॥५१॥अग्ने।दिवः।अर्णम्।अच्छ।जिगासि।अच्छ
देवान्।उचिषे।धिष्ण्याः।ये।याः।रोचने।परस्तात्।सूर्यस्य।याः।च।अवस्तात्।उ
पतिष्ठतइत्युपऽतिष्ठंते।आपः॥५२॥पुरीष्यासः।अग्नयः।प्रावणेभिः।प्रवणेभि
रितिप्रऽवणेभिः।सजोषसइतिसऽजोषसः।जुषंताम्।यज्ञम्।अद्रुहः।अनमीवाः।

रा॰
२७

इषः।महीः॥५३॥इडाम्।अग्ने।पुरुदंसमितिपुरुऽदंसम्।सनिम्।गोः।शश्वत्तमममि
तिशश्वत्ऽतमम्।हवमानाय।साध।स्यात्।नः।सूनुः।तनयः।विजावेतिविजाऽ
वा।अग्ने।सा।ते।सुमतिरितिसुऽमतिः।भूतु।अस्मेइत्यस्मे॥५४॥चित्।असि।त
या।देवतया।अंगिरस्वत्।ध्रुवा।सीद।परिचिदितिपरिऽचित्।असि।तया।देवत
या।अंगिरस्वत्।ध्रुवा।सीद॥५५॥लोकम्।पृण।छिद्रम्।पृण।अथोइत्यथो।
सीद।ध्रुवा।त्वम्।इंद्राग्नीइतींद्राग्नी।त्वा।बृहस्पतिः।अस्मिन्।योनौ।असी
षदन्।असीसदन्नित्यसीसदन्॥५६॥ताः।अस्य।सूददोहसइतिसूदऽदोह

पं
॥२८॥

सः।सोमम्।श्रीणंति।पृश्नयः।जन्मन्।देवानाम्।विशः।त्रिषु।आ।रोचने।दिवः॥४७
इंद्रम्।विश्वाः।अवीवृधन्।समुद्रव्यचसमितिसमुद्रऽव्यचसम्।गिरः।रथीतम
म्।रथितममितिरथिऽतमम्।रथीनाम्।रथिनामितिरथिऽनाम्।वाजानाम्।
सत्पतिमितिसत्ऽपतिम्।पतिम्॥४८॥सम्।इतम्।सम्।कल्पेथाम्।संप्रियाइ
तिसम्ऽप्रियौ।रोचिष्णूइतिरोचिष्णू।सुमनस्यमानाइतिसुऽमनस्यमानौ।इषम्
ऊर्जम्।अभि।संवसानाइतिसम्ऽवसानौ॥४९॥सम्।वाम्।मनांसि।सम्।व्रता।
सम्।सउ।इत्यै।चित्तानि।आ।अकरम्।अग्ने।पुरीष्य।अधिपाइत्यधिऽपाः।भ

ना
रा०
॥२८॥

व।त्वम्।नः।इषम्।ऊर्जम्।यजमानाय।धेहि॥५०॥अग्ने।त्वम्।पुरीष्यः।रयिमा
निति रयिऽमान्।पुष्टिमानितिपुष्टिऽमान्।असि।शिवाः।कृत्वा।दिशः।सर्वाः
स्वम्।योनिम्।इह।आ।असदः॥५१॥मातेवेतिमाताऽइव।पुत्रम्।पृथिवी
पुरीष्यम्।अग्निम्।स्वे।योनौ।अभाः।उखा।ताम्।विश्वैः।देवैः।ऋतुभिरित्यृ
तुऽभिः।संविदानइतिसम्ऽविदानः।प्रजापतिरितिप्रजाऽपतिः।विश्वकर्मे
तिविश्वऽकर्मा।वि।मुंचतु॥५२॥छ॥असुन्वंतम्।अयजमानम्।इच्छ।स्तेनस्य
इत्याम्।अनु।इहि।तस्करस्य।अन्यम्।अस्मत्।इच्छ।सा।ते।इत्या।नमः।देवि।

निर्ऋतइतिनिःऽऋते। तुभ्यम्। अस्तु॥५३॥ नमः। सु। ते। निर्ऋतइतिनिःऽऋते। ति
ग्मतेजइतितिग्मऽतेजः। अयस्मयम्। वि। चृत। बंधम्। एतम्। यमेन। त्वम्। यम्या। सं
विदानेतिसम्ऽविदाना। उत्तमइत्युत्ऽतमे। नाके। अधि। रोहय। एनम्॥५४॥ यस्याः
ते। घोरे। आसन्। जुहोमि। एषाम्। बंधानाम्। अवसर्जनायेत्यवऽसर्जनाय। याम्।
त्वा। जनः। भूमिः। इति। प्रमंदतइतिप्रऽमंदते। निर्ऋतिमितिनिःऽऋतिम्। त्वा।
अहम्। परि। वेद। विश्वतः॥५५॥ यम्। ते। देवी। निर्ऋतिरितिनिःऽऋतिः। आ
बबंधेत्याऽबबंध। दाम। ग्रीवासु। अविचृत्यमित्यविऽचृत्यम्। तम्। ते। वि।

स्यामि। आयुषः। न। मध्यात्। अथ। एतम्। पितुम्। अद्धि। प्रसूतइतिप्रऽसूतः। नमः।
यै। या। इदम्। चकार॥५६॥ निवेशनइतिनिऽवेशनः। संगमनइतिसम्ऽगमनः। वसू
नाम्। विश्वा। रूपा। अभि। चष्टे। शचीभिः। देवइवेतिदेवःऽइव। सविता। सत्यधर्मे
तिसत्यऽधर्मा। इंद्रः। न। तस्थौ। समरइतिसम्ऽअरे। पथीनाम्॥५७॥ सीरा। यु
जंति। कवयः। युगा। वि। तन्वते। पृथक्। धीराः। देवेषु। सुम्नयेतिसुम्नऽया॥५८
युनक्त। सीरा। वि। युगा। तनुध्वम्। कृते। योनौ। वपत। इह। बीजम्। गिरा। च।
श्रुष्टिः। सभराइतिसऽभराः। असत्। नः। नेदीयः। इत्। सृण्यः। पक्वम्। आ। इ

प॰
१०

यात्॥६९॥ शुनम्। सु। फालाः। वि। कृषन्तु। भूमिम्। शुनम्। कीनाशाः। अभि। यन्तु
वाहैः। शुनासीरा। हविषा। तोशमाना। सुपिप्पला इति सुऽपिप्पलाः। ओषधीः। कृ
र्तम्। अस्मै इत्यस्मै॥७०॥ घृतेन। सीता। मधुना। सम्। अज्यताम्। विश्वैः। देवैः। अ
नुमतेत्यनुऽमता। मरुद्भिरिति मरुत्ऽभिः। ऊर्जस्वती। पयसा। पिन्वमाना। अ
स्मान्। सीते। पयसा। अभि। आ। ववृत्स्व॥७१॥ लांगलम्। पवीरवत्। सुशेव
मिति सुऽशेवम्। सोमपित्सर्विति सोमपित्ऽसरु। तत्। उत्। वपति। गाम्। अ
विम्। प्रफर्व्यमिति प्रऽफर्व्यम्। च। पीवरीम्। प्रस्थावदिति प्रस्थाऽवत्। रथवा

रा॰
३०

हनम्। रथवाहनमिति रथऽवाहनम्॥७२॥ कामम्। कामदुघ इति कामऽदुघे। धु
क्ष्व। मित्राय। वरुणाय। च। इन्द्राय। अश्विभ्यामित्यश्विऽभ्याम्। पूष्णे। प्रजाभ्य इ
ति प्रऽजाभ्यः। ओषधीभ्यः॥७३॥ वि। मुच्यध्वम्। अघ्न्याः। देवयाना इति देवऽया
नाः। अगन्म। तमसः। पारम्। अस्य। ज्योतिः। आपाम॥७४॥ सजूरिति सऽजूः।
अब्दः। अयवोभिरित्ययवःऽभिः। उषाः। अरुणीभिः। सजोषसा इति सऽजो
षसौ। अश्विना। दंसोभिरिति दंसःऽभिः। सूरः। एतशेन। वैश्वानरः। इडया
या। घृतेन। स्वाहा॥७५॥ ७॥ याः। ओषधीः। पूर्वाः। जाताः। त्रियुगमिति त्रिऽ देवेभ्यः

युगम्। पुरा। मन्नै। नु। बभ्रूणाम्। अहम्। शतम्। धामानि। सप्त। च॥ ६६॥ शतम्। वः।
अम्ब। धामानि। सहस्रम्। उत। वः। रुहः। अध। शतक्रत्वइति शतऽक्रत्वः। यूयम्।
इमम्। मे। अगदम्। कृत॥ ६७॥ ओषधीः। प्रति। गृभ्णीत। पुष्पवतीरिति पुष्पऽव
तीः। प्रसूवरीरिति प्रऽसूवरीः। अश्वाःइवेत्यश्वाःऽइव। सजित्वरीरिति सऽजित्वरीः
वीरुधः। पारयिष्णवः॥ ६८॥ ओषधीः। इति। मातरः। तत्। वः। देवीः। उप। ब्रुवे। सने
यम्। अश्वम्। गाम्। वासः। आत्मानम्। तव। पूरुष। पुरुषेति पुरुष॥ ६९॥ अश्वत्थे।
वः। निषदनम्। निसदनमिति निऽसदनम्। पर्णे। वः। वसतिः। कृता। गोभाजइति

गोऽभाजः। इत्। किल। असथ। यत्। सनवथ। पूरुषम्। पुरुषमिति पुरुषम्॥ ७०॥ यत्र।
ओषधीः। समग्मतेति सम्ऽअग्मत। राजानः। समिताविवेति समितौऽइव। विप्रः। सः।
उच्यते। भिषक्। रक्षोहेति रक्षःऽहा। अमीवचातनइत्यमीवऽचातनः॥ ७१॥ अश्वाव
तीम्। अश्वतीवेमित्यश्वेऽवतीम्। सोमावतीम्। सोमवतीमिति सोमऽवतीम्। ऊर्ज
यंतीम्। उदोजसमित्युत्ऽओजसम्। आ। अवित्सि। सर्वाः। ओषधीः। अस्मै। अरि
ष्टतातयइत्यरिष्टऽतातये॥ ७२॥ उत्। शुष्माः। ओषधीनाम्। गावः। गोष्ठादिव। गो
स्थादिवेति गोस्थात्ऽइव। ईरते। धनम्। सनिष्यंतीनाम्। आत्मानम्। तव। पूरुष। पु

।रुषेतिपूरुष॥७३॥इष्कृतिः।नाम।वः।माता।अथोइत्यथो।यूयम्।स्थ।निष्कृतीः।निः
कृतीरितिनिःऽकृतीः।सीराः।पतत्रिणीः।स्थन।यत्।आमयति।निः।कृथ॥७४॥
अति।विश्वाः।परिष्ठाः।परिस्थाइतिपरिऽस्थाः।स्तेनःइवेतिस्तेनःऽइव।व्रजम्।अ
क्रमुः।ओषधीः।प्र।अचुच्यवुः।यत्।किम्।च।तन्वः।रपः॥७५॥यत्।इमाः।वा
जयन्।अहम्।ओषधीः।हस्ते।आऽदधे।आऽदधे।आत्मा।यक्ष्मस्य।नश्यति।पुरा।
जीवगृभइतिजीवऽगृभः।यथा॥७६॥यस्य।ओषधीः।प्रसर्पथेतिप्रऽसर्पथ।अंगम्ऽअं
गमितिअंगम्ऽअंगम्।परुःऽपरुः।परुःपरुरितिपरुःऽपरुः।ततः।यक्ष्मम्।वि

बाधध्वे।उग्रः।मध्यमशीरिवेतिमध्यमशीःऽइव॥७७॥साकम्।यक्ष्म।प्र।पत।
चाषेण।किकिदीविना।साकम्।वातस्य।ध्राज्या।साकम्।नश्य।निहाकयेतिनिऽ
हाकया॥७८॥अन्या।वः।अन्याम्।अवतु।अन्या।अन्यस्याः।उप।अवत।ताः।
सर्वाः।संविदानाइतिसम्ऽविदानाः।इदम्।मे।प्र।अवत।वचः॥७९॥याः।फ
लिनीः।याः।अफलाः।अपुष्पाः।याः।च।पुष्पिणीः।बृहस्पतिप्रसूताइतिबृहस्प
तिऽप्रसूताः।ताः।नः।मुंचंतु।अंहसः॥८०॥मुंचंतु।मा।शपथ्यात्।अथो
इत्यथो।वरुण्यात्।उत।अथोइत्यथो।यमस्य।पड्बीशात्।सर्वस्मात्।देवकिल्बि

पादितिदिवः। किल्बिषात्॥ ८१॥ अवयतीरित्यवऽयतीः। सम्। अवदंत। दिवः। ओष
धयः। परि। यम्। जीवम्। अश्नवामहै। न। सः। रिष्याति। पूरुष॥ पुरुषइतिपूरुषः
८२॥ याः। ओषधीः। सोमराज्ञीरितिसोमऽराज्ञीः। बह्वीः। शतविचक्षणाइतिश
तऽविचक्षणाः। तासाम्। असि। त्वम्। उत्तमेत्युत्ऽतमा। अरम्। कामाय। शम्।
हृदे॥ ८३॥ विष्ठिताः। विस्थिताइतिविऽस्थिताः। पृथिवीम्। अनु। बृहस्पतिप्र
सूताइतिबृहस्पतिऽप्रसूताः। अस्यै। सम्। दत्त। वीर्यम्॥ ८४॥ याः। च। इदम्।
उपशृण्वंतीत्युपऽशृण्वंति। याः। च। दूरम्। परागताइतिपराऽगताः। सर्वाः। सं

गत्येतिसम्ऽगत्य। वीरुधः। अस्यै। सम्। दत्त। वीर्यम्॥ ८५॥ नाष्ट्रायित्री। बलासस्य।
अर्शसः। उपचितामित्युपऽचिताम्। असि। अथोइत्यथो। शतस्य। यक्ष्माणाम्।
पाकारोरितिपाकऽअरोः। असि। नाशनी॥ ८६॥ मा। वः। रिषत्। खनिता। यस्मै
च। अहम्। खनामि। वः। द्विपदितिद्विऽपत्। चतुष्पत्। चतुःपदितिचतुःऽपत्। अ
स्माकम्। सर्वम्। अस्तु। अनातुरम्॥ ८७॥ ओषधयः। सम्। वदंते। सोमेन। सह।
राज्ञा। यस्मै। कृणोति। ब्राह्मणः। तम्। राजन्। पारयामसि॥ ८८॥ त्वाम्। गंध
र्वाः। अखनन्। त्वाम्। इंद्रः। त्वाम्। बृहस्पतिः। त्वाम्। ओषधे। सोमः। राजा। विद्वा

अस्तु

न। यक्ष्मात्। अमुच्यत॥ ९९॥ त्वम्। उत्तमेत्युत्ऽतमा। असि। ओषधे। तव। वृक्षाः। उप
स्तयः। उपस्तिः। सः। अस्माकम्। यः। अस्मान्। अभिदासतीत्यभिऽदासति॥ १००॥
मा। मा। हिंसीत्। जनिता। यः। पृथिव्याः। यः। वा। दिवम्। सत्यधर्मेति सत्यऽधर्मा।
वि। आनट्। यः। च। अपः। चन्द्राः। प्रथमः। जजान। कस्मै। देवाय। हविषा। विधेम॥ १०
अभि। आ। वर्तस्व। पृथिवि। यज्ञेन। पयसा। सह। वपाम्। ते। अग्निः। इषितः। अरोहत्॥
॥ १०२॥ अग्ने। यत्। ते। शुक्रम्। यत्। चन्द्रम्। यत्। पूतम्। च। यज्ञियम्। तत्। देवेभ्यः। भरामसि।
॥ १०३॥ इषम्। ऊर्जम्। अहम्। इतः। आदम्। ऋतस्य। योनिम्। महिषस्य। धाराम्। आ

मा। गोषु। विशतु। आ। तनूषु। जहामि। सेदिम्। अनिराम्। अमीवाम्॥ १०४॥ अग्ने। तव।
श्रवः। वयः। महि। भ्राजन्ते। अर्चयः। विभावसो इति विभाऽवसो। बृहद्भानो इति बृहत्ऽ
भानो। शवसा। वाजम्। उक्थ्यम्। दधासि। दाशुषे। कवे॥ १०५॥ पावकवर्चा इति पाव
कऽवर्चाः। शुक्रवर्चा इति शुक्रऽवर्चाः। अनूनवर्चा इत्यनूनऽवर्चाः। उत्। इयर्षि। भानु
ना। पुत्रः। मातरा। विचरन्निति विऽचरन्। उप। अवसि। पृणक्षि। रोदसी इति रो
दसी। उभे इत्युभे॥ १०६॥ ऊर्जः। नपात्। जातवेद इति जातऽवेदः। सुशस्तिभिरिति सु
शस्तिऽभिः। मन्दस्व। धीतिभिरिति धीतिऽभिः। हितः। त्वे इति त्वे। इषः। सम्। दधुः।

भूरिवर्पसइतिभूरिऽवर्पसः। चित्रोतयइतिचित्रऽऊतयः। वामजाताइतिवामऽजाताः
॥१७॥ दीद्यन्। अग्ने। प्रथयस्व। जन्तुभिरितिजन्तुऽभिः। अस्मेइत्यस्मे। रायः। अम
र्त्य। सः। दर्शतस्य। वपुषः। वि। राजसि। पृणक्षि। सानसिम्। क्रतुम्॥१८॥ इष्कर्तार
म्। अध्वरस्य। प्रचेतसमितिप्रऽचेतसम्। क्षयन्तम्। राधसः। महः। रातिम्। वाम
स्य। सुभगामितिसुऽभगाम्। महीम्। इषम्। दधासि। सानसिम्। रयिम्॥१९॥ ऋ
तावानम्। ऋतवानमित्यृतऽवानम्। महिषम्। विश्वदर्शतमितिविश्वऽदर्शतम्।
अग्निम्। सुम्नाय। दधिरे। पुरः। जनाः। श्रुत्कर्णमितिश्रुत्ऽकर्णम्। सप्रथस्तममिति

सप्रथःऽतमम्। त्वा। गिरा। दैव्यम्। मानुषा। युगा॥२०॥ आ। प्यायस्व। सम्। एतु। ते। वि
श्वतः। सोम। वृष्ण्यम्। भव। वाजस्य। संगथइतिसम्ऽगथे॥१॥ सम्। ते। पयांसि। स
म्। उ। यन्तु। वाजाः। सम्। वृष्ण्यानि। अभिमातिषाहः। अभिमातिसहइत्यभिमा
तिऽसहः। आप्यायमानइत्याऽप्यायमानः। अमृताय। सोम। दिवि। श्रवांसि। उत्त
मानीत्युत्ऽतमानि। धिष्व॥२॥ आ। प्यायस्व। मदिन्तमेतिमदिन्ऽतम। सोम। विश्वेभिः।
अंशुभिरित्यंशुऽभिः। भव। नः। सप्रथस्तमइतिसप्रथःऽतम। सखा। वृधे॥३॥ आ
ते। वत्सः। मनः। यमत्। परमात्। चित्। सधस्थादितिसधऽस्थात्। अग्ने। त्वांकाम

यतिस्वाम्ऽक्कामया। गिरा॥ ४॥ तुभ्यम्। ताः। अंगिरस्तमेसंगिरःऽतम। विश्वाः। सुक्षि
तयऽइतिसुऽक्षितयः। पृथक्। अग्ने। कामाय। येमिरे॥ ५॥ अग्निः। प्रियेषु। धाम सुक्षि
धामःऽसु। कामः। भूतस्य। भव्यस्य। सम्राकितिसम्ऽराट्। एकः। वि। राजति॥ ६॥ ६॥
॥ ७॥ इतिशुक्लयजुःकाण्वसंहितायांपदेपाठेत्रयोदशोध्यायः॥ छ॥ नीलकंठ॥ छ
॥ हरिः ॐम्॥ मयि। गृह्णामि। अग्ने। अग्निम्। रायः। पोषाय। सुप्रजास्त्वायेतिसु
प्रजाःऽत्वाय। सुवीर्यायेतिसुऽवीर्याय। माम्। उ इति। देवताः। सचन्ताम्॥ १॥ ब्रह्म।
जज्ञानम्। प्रथमम्। पुरस्तात्। वि। सीमतः। सुरुचइतिसुऽरुचः। वेनः। आवरित्यावः।

सः। बुध्न्याः। उपमाइत्युपऽमाः। अस्य। विष्ठाः। विस्थाइतिविऽस्थाः। सतः। च। योनिम्। असतः।
च। विवरितिविवः॥ २॥ हिरण्यगर्भइतिहिरण्यऽगर्भः। सम्। अवर्तत। अग्ने। भूतस्य। जातः। प
तिः। एकः। आसीत्। सः। दाधार। पृथिवीम्। द्याम्। उत। इमाम्। कस्मै। देवाय। हविषा। विधेम
॥ ३॥ द्रप्सः। चस्कंद। पृथिवीम्। अनु। द्याम्। इमम्। च। योनिम्। अनु। यः। च। पूर्वः। समान
म्। योनिम्। अनु। संचरन्तम्। द्रप्सम्। जुहोमि। अनु। सप्त। होत्राः॥ ४॥ नमः। अस्तु। सर्पेभ्यः।
ये। के। च। पृथिवीम्। अनु। ये। अंतरिक्षे। ये। दिवि। तेभ्यः। सर्पेभ्यः। नमः॥ ५॥ याः। इषवः।
यातुधानानामितियातुऽधानानाम्। ये। वा। वनस्पतीन्। अनु। ये। वा। अवटेषु। शेरते।

तेभ्यः। सर्पेभ्यः। नमः॥ ६॥ ये। वा। अमीइत्यमी। रोचने। दिवः। ये। वा। सूर्यस्य। रश्मिषु। येषा
म्। अप्स्वित्यप्ऽसु। सदः। कृतम्। तेभ्यः। सर्पेभ्यः। नमः॥ ७॥ कृणुष्व। पाजः। प्रसितिमिति प्र
ऽसितिम्। न। पृथ्वीम्। याहि। राजेवेति राजाऽइव। अमवानित्यमऽवान्। इभेन। तृष्वीम्।
अनु। प्रसितिमिति प्रऽसितिम्। द्रूणानः। अस्ता। असि। विध्य। रक्षसः। तपिष्ठैः॥ ८॥ तव।
भ्रमासः। आशुयेत्याशुऽया। पतन्ति। अनु। स्पृश। धृषता। शोशुचानः। तपूंषि। अग्ने।
जुह्वा। पतङ्गान्। असंदित इत्यसम्ऽदितः। वि। सृज। विष्वक्। उल्काः॥ ९॥ प्रति। स्पशः।
वि। सृज। तूर्णितम इति तूर्णिऽतमः। भव। पायुः। विशः। अस्याः। अदब्धः। यः। नः। दूरे। अ

घशंस इत्यघऽशंसः। यः। अन्ति। अग्ने। माकिः। ते। व्यथिः। आ। दधर्षीत्॥ १०॥ उत्। अग्ने।
तिष्ठ। प्रति। आ। तनुष्व। नि। अमित्रान्। ओषतात्। तिग्महेत इति तिग्मऽहेते। यः। नः। अरा
तिम्। समिधानेति सम्ऽइधान। चक्रे। नीचा। तम्। धक्षि। अतसम्। न। शुष्कम्॥ ११॥
ऊर्ध्वः। भव। प्रति। विध्य। अधि। अस्मत्। आविः। कृणुष्व। दैव्यानि। अग्ने। अव। स्थिरा।
तनुहि। यातुजूनामिति यातुऽजूनाम्। जामिम्। अजामिम्। प्र। मृणीहि। शत्रून्॥ १२॥
अग्नेः। त्वा। तेजसा। सादयामि। इन्द्रस्य। त्वा। ओजसा। सादयामि॥ १३॥ भुवः। यज्ञस्य।
रजसः। च। नेता। यत्र। नियुद्भिरिति नियुत्ऽभिः। सचसे। शिवाभिः। दिवि। मूर्धानं

म्।दधिषे।स्वर्षाम्।स्वःसामितिस्वःऽसाम्।जिह्वाम्।अग्ने।चकृषे।हव्यवाहमितिहव्यऽवा
हम्।।१४।।ध्रुवा।असि।धरुणा।आस्तृतेत्याऽस्तृता।विश्वकर्मणेतिविश्वऽकर्मणा।मा
त्वा।समुद्रः।उत्।वधीत्।मा।सुपर्णइतिसुऽपर्णः।अव्यथमाना।पृथिवीम्।दृꣳह।।१५
प्रजापतिरितिप्रजाऽपतिः।त्वा।सादयतु।अपाम्।पृष्ठे।समुद्रस्य।एमन्।व्यचस्वतीम्
प्रथस्वतीम्।प्रथस्व।पृथिवी।असि।।१६।।भूः।भूमिः।अदितिः।विश्वधायाइतिवि
श्वऽधायाः।विश्वस्य।भुवनस्य।धर्त्री।पृथिवीम्।यच्छ।पृथिवीम्।दृꣳह।पृथिवीम्।
मा।हिꣳसीः।।१७।।विश्वस्मै।प्राणाय।अपानायेत्यपऽआनाय।व्यानायेतिविऽआ

नाय।उदानायेत्युत्ऽआनाय।प्रतिष्ठायै।प्रतिष्ठायाइतिप्रतिऽस्थायै।चरित्राय।अ
ग्निः।त्वा।अभि।पातु।मह्या।स्वस्त्या।छर्दिषा।शंतमेनेतिशम्ऽतमेन।तया।देवत
या।अंगिरस्वत्।ध्रुवा।सीद।।१८।।कांडात्कांडादितिकांडात्ऽकांडात्।प्ररोहंतीतिप्रऽ
रोहंती।परुषःपरुषइतिपरुषःऽपरुषः।परि।एव।नः।दूर्वे।प्र।तनु।सहस्रेण।शते
न।च।।१९।।या।शतेन।प्रतनोषीतिप्रऽतनोषि।सहस्रेण।विरोहसीतिविऽरोह
सि।तस्याः।ते।देवि।इष्टके।विधेम।हविषा।वयम्।।२०।।याः।ते।अग्ने।सूर्ये।रुचः।
दिवम्।आतन्वंतीत्याऽतन्वंति।रश्मिभिरितिरश्मिऽभिः।ताभिः।नः।अद्य।सर्वा

प॰
३९

भिः। रुचे। जनाय। नः। कृधि॥ २१॥ याः। वः। देवाः। सूर्ये। रुचः। गोषु। अश्वेषु। याः। रुचः। इं
द्राग्नी इतींद्राग्नी। ताभिः। सर्वाभिः। रुचम्। नः। धत्त। बृहस्पते॥ २२॥ विराडिति विऽराट्।
ज्योतिः। अधारयत्। स्वराडिति स्वऽराट्। ज्योतिः। अधारयत्। प्रजापतिरिति प्रजाऽपतिः।
त्वा। सादयतु। पृष्ठे। पृथिव्याः। ज्योतिष्मतीम्॥ २३॥ विश्वस्मै। प्राणाय। अपानायेत्यपऽ
आनाय। व्यानायेति विऽआनाय। विश्वम्। ज्योतिः। यच्छ। अग्निः। ते। अधिपतिरि
त्यधिऽपतिः। तया। देवतया। अंगिरस्वत्। ध्रुवा। सीद॥ २४॥ मधुः। च। माधवः। च।
वासंतिकौ। ऋतू इत्यृतू। अग्नेः। अंतःश्लेष इत्यंतःऽश्लेषः। असि। कल्पेताम्। द्यावा

रा
३९

पृथिवी इति द्यावापृथिवी। कल्पंताम्। आपः। ओषधयः। कल्पंताम्। अग्नयः। पृथक्।
मम। ज्यैष्ठ्याय। सव्रता इति सऽव्रताः। ये। अग्नयः। समनस इति सऽमनसः। अंतरा।
द्यावापृथिवी इति द्यावापृथिवी। इमे इतीमे। वासंतिकौ। ऋतू इत्यृतू। अभिकल्पमा
नाः इत्यभिऽकल्पमानाः। इंद्रमिवेतींद्रम्ऽइव। देवाः। अभिसंविशंत्वित्यभिऽसंविशं
तु। तया। देवतया। अंगिरस्वत्। ध्रुवे इति ध्रुवे। सीदतम्॥ २५॥ अषाढा। असि।
सहमाना। सहस्व। अरातीः। सहस्व। पृतनायत इति पृतनाऽयतः। सहस्रवीर्येति सह
स्रऽवीर्या। असि। सा। मा। जिन्व॥ २६॥ सहस्व। इमाः। अभिमातीरित्यभिऽमातीः। स

हस्व।पृतनायतइति पृतनाऽयतः।सहस्व।सर्वम्।पाप्मानम्।सहमाना।असि।ओषधे
२७॥ ७॥ मधु।वाताः।ऋतायते।ऋतयतइत्यृतऽयते।मधु।क्षरंति।सिंधवः।माध्वीः
नः।संतु।ओषधीः॥२८॥ मधु।नक्तम्।उत।उषसः।मधुमदिति मधुऽमत्।पार्थिवम्।
रजः।मधु।द्यौः।अस्तु।नः।पिता॥२९॥ मधुमानिति मधुऽमान्।नः।वनस्पतिः।
मधुमानिति मधुऽमान्।अस्तु।सूर्यः।माध्वीः।गावः।भवंतु।नः॥३०॥ अपाम्।गं
भन्।सीद।मा।त्वा।सूर्यः।अभि।ताप्सीत्।मा।अग्निः।वैश्वानरः।अच्छिन्नपत्राइ
त्यच्छिन्नऽपत्राः।प्रजाइति प्रऽजाः।अनुवीक्षस्वेत्यनुऽवीक्षस्व।अनु।त्वा।दिव्या।वृ

ष्टिः।सचताम्॥३१॥ त्रीन्।समुद्रान्।सम्।असृपत्।स्वर्गानिति स्वःऽगान्।अपाम्।
पतिः।वृषभः।इष्टकानाम्।पुरीषम्।वसानः।सुकृतस्येति सुऽकृतस्य।लोके।तत्र
गच्छ।यत्र।पूर्वे।परेताइति पराऽइताः॥३२॥ ध्रुवा।असि।धरुणा।इतः।जज्ञे।प्रथम
म्।एभ्यः।योनिभ्यइति योनिऽभ्यः।अधि।जातवेदाइति जातऽवेदाः।सः।गाय
त्र्या।त्रिष्टुभा।त्रिस्तुभेति त्रिऽस्तुभा।अनुष्टुभा।अनुस्तुभेत्यनुऽस्तुभा।च।देवेभ्यः
हव्यम्।वहतु।प्रजानन्निति प्रऽजानन्॥३३॥ इषे।राये।रमस्व।सहसे।द्युम्ने।ऊर्जे
अपत्याय।सम्राळिति सम्ऽराट्।असि।स्वराळिति स्वऽराट्।असि।सारस्वतौ।

॥प॥
॥४१॥

त्वा।उत्सौ।प्र।अवताम्॥३४॥अग्ने।युक्ष्व।हि।ये।तव।अश्वासः।देव।साधवः।अरम्।व
हंति।मन्यवे॥३५॥युक्ष्व।हि।देवहूतमानिति देवऽहूतमान्।अश्वान्।अग्ने।रथीरिवेति
रथीःऽइव।नि।होता।पूर्व्यः।सदः॥३६॥छा॥सम्यक्।स्रवंति।सरितः।न।धेनाः।अंतः।
हृदा।मनसा।पूयमानाः।घृतस्य।धाराः।अभि।चाकशीमि।हिरण्ययः।वेतसः।म
ध्ये।अग्नेः॥३७॥ऋचे।त्वा।रुचे।भासे।ज्योतिषे।त्वा।अभूत्।इदम्।विश्वस्य।भुव
नस्य।वाजिनम्।अग्नेः।वैश्वानरस्य।च॥३८॥अग्निः।ज्योतिषा।ज्योतिष्मान्।
रुक्मः।वर्चसा।वर्चस्वान्॥सहस्रदा इति सहस्रऽदाः।असि।सहस्राय।त्वा॥३९॥

॥रा॥
॥४१॥

आदित्यम्।गर्भम्।पयसा।सम्।अंग्धि।सहस्रस्य।प्रतिमामिति प्रतिऽमाम्।विश्वरूपमि
ति विश्वऽरूपम्।परि।वृङ्ग्धि।हरसा।मा।अभि।मंस्थाः।शतायुषमिति शतऽआयु
षम्।कृणुहि।चीयमानः॥४०॥वातस्य।जूतिम्।वरुणस्य।नाभिम्।अश्वम्।ज
ज्ञानम्।सरिरस्य।मध्ये।शिशुम्।नदीनाम्।हरिम्।अद्रिबुध्नमित्यद्रिऽबुध्नम्।अ
ग्ने।मा।हिंसीः।परमे।व्योमन्निति विऽओमन्॥४१॥अजस्रम्।इंदुम्।अरुषम्।
भुरण्युम्।अग्निम्।ईडे।पूर्वचित्तिमिति पूर्वऽचित्तिम्।नमोभिरिति नमःऽभिः।सः।
पर्वभिरिति पर्वऽभिः।ऋतुश इत्यृतुऽशः।कल्पमानः।गाम्।मा।हिंसीः।अदितिम्।

ति

॥ प॰ ॥
॥ ४२ ॥

विराजमिति वि॰राजम् ॥४२॥ वरूत्रीम् । त्वष्टुः । वरुणस्य । नाभिम् । अविम् । जज्ञानाम् । र
जसः । परस्मात् । महीम् । साहस्रीम् । असुरस्य । मायाम् । अग्ने । मा । हिंसीः । परमे । व्यो
मन्निति वि॰ओमन् ॥४३॥ यः । अग्निः । अग्नेः । अधि । अजायत । शोकात् । पृथिव्याः ।
उत । वा । दिवः । परि । येन । प्रजा इति प्र॰जाः । विश्वकर्मेति विश्व॰कर्मा । जजान । तम् ।
अग्ने । हेडः । परि । ते । वृणक्तु ॥४४॥ इमम् । मा । हिंसीः । द्विपादमिति द्वि॰पादम् । पशु
म् । सहस्राक्षेति सहस्र॰अक्ष । मेधाय । चीयमानः । मयुम् । पशुम् । मेधम् । अग्ने । जु
षस्व । तेन । चिन्वानः । तन्वः । नि । सीद । मयुम् । ते । शुक् । ऋच्छतु । यम् । द्विष्मः । तम् । ते ।

॥ रा॰ ॥
॥ ४२ ॥

शुक् । ऋच्छतु ॥४५॥ एकशफमित्येक॰शफम् । पशुम् । कनिक्रदम् । वाजिनम् । वाजिनेषु । गौर
म् । आरण्यम् । अनु । ते । दिशामि ॥४६॥ साहस्रम् । शतधारमिति शत॰धारम् । उत्सम्
व्यच्यमानमिति वि॰अच्यमानम् । सरिरस्य । मध्ये । घृतम् । दुहानाम् । अदितिम् । ज
नाय । गवयम् ॥४७॥ ऊर्णायुम् । वरुणस्य । नाभिम् । त्वचम् । पशूनाम् । द्विपदामिति
द्वि॰पदाम् । चतुष्पदाम् । चतुःपदामिति चतुः॰पदाम् । त्वष्टुः । प्रजानामिति प्र॰जानाम् ।
प्रथमम् । जनित्रम् । उष्ट्रम् ॥४८॥ अजः । हि । अग्नेः । अजनिष्ट । शोकात् । सः । अप
श्यत् । जनितारम् । अग्रे । तेन । देवाः । देवताम् । अग्रम् । आयन् । तेन । रोहम् । आयन् ।

उपामिध्यासः । पुरभम् ॥ ५१ ॥ त्वम् । अयविष्ठ । दाशुषः । नृन् । पाहि । श्रृणुधि । गिरः ।
रक्ष । तोकम् । उत । त्मना ॥ ५२ ॥ छ ॥ अपाम् । त्वा । एमन् । सादयामि । अप्मन् । भस्म
न् । ज्योतिषि । अयने । अर्णवे । समुद्रे । सरिरे । क्षये । सधिषि । सदने । सधस्थ इति सधऽ
स्थे । योनौ । पुरीषे । पाथसि । गायत्रेण । त्रैष्टुभेन । त्रैस्तुभेनेति त्रैऽस्तुभेन । जागतेन । आ
नुष्टुभेन । आनुस्तुभेनेत्यानुऽस्तुभेन । पाङ्क्तेन । त्वा । छंदसा । सादयामि ॥ ५३ ॥ छ ।
अयम् । पुरः । भुवः । तस्य । प्राणः । भौवायनः । वसंतः । प्राणायन इति प्राणऽआय
नः । गायत्री । वासंती ॥ ५४ ॥ गायत्र्यै । गायत्रम् । गायत्रात् । उपांशुरित्युपऽअंशुः ।

उपांशोरित्युपऽअंशोः । त्रिवृदिति त्रिऽवृत् । त्रिवृत इति त्रिऽवृतः । रथंतरमिति रथ
म्ऽतरम् । वसिष्ठः । ऋषिः । प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया । त्वया । प्राणम् ।
गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ॥ ५५ ॥ अयम् । दक्षिणा । विश्वकर्मेति विश्वऽकर्मा ।
तस्य । मनः । वैश्वकर्मणमिति वैश्वऽकर्मणम् । ग्रीष्मः । मानसः । त्रिष्टुप् । त्रिस्तुबि
ति त्रिऽस्तुप् । ग्रैष्मी ॥ ५६ ॥ त्रिष्टुभः । त्रिस्तुभ इति त्रिऽस्तुभः । स्वारम् । स्वारात् । अंत
र्याम इत्यंतःऽयामः । अंतर्यामात् इत्यंतःऽयामात् । पंचदश इति पंचऽदशः । पंचदशा
दिति पंचऽदशात् । बृहत् । भरद्वाज इति भरत्ऽवाजः । ऋषिः । प्रजापतिगृहीतयेति

॥ प ॥
॥ ४४ ॥

प्रजापतिऽगृहीतया। त्वया। मनः। गृण्हामि। प्रजाभ्यइतिप्रऽजाभ्यः॥५५॥ अयम्
पश्चात्। विश्वव्यचाइति विश्वऽव्यचाः। तस्य। चक्षुः। वैश्वव्यचसमितिवैश्वऽव्यचस
म्। वर्षाः। चाक्षुष्यः। जगती। वार्षी॥५६॥ जगत्याः। ऋक्सममित्यृक्ऽसमम्। ऋ
क्सममादित्यृक्ऽसमात्। शुक्रः। शुक्रात्। सप्तदशइतिसप्तऽदशः। सप्तदशादितिसप्तऽ
दशात्। वैरूपम्। जमदग्निरितिजमत्ऽअग्निः। ऋषिः। प्रजापतिगृहीतयेतिप्र
जापतिऽगृहीतया। त्वया। चक्षुः। गृण्हामि। प्रजाभ्यइतिप्रऽजाभ्यः॥५७॥ इदम्।
उत्तरात्। स्वरितिस्वः। तस्य। श्रोत्रम्। सौवम्। शरत्। श्रौत्री। अनुष्टुप्। अनुष्टु

॥ रा ॥
॥ ४४ ॥

त्रिणवत्रयस्त्रिंशपदवतः।

बित्यनुऽस्तुप्। शारदी॥५८॥ अनुष्टुभः। अनुष्टुभइत्यनुऽस्तुभः। ऐलम्। ऐलात्। मंथी।
मथिनः। एकविंशइत्येकऽविंशः। एकविंशादित्येकऽविंशात्। वैराजम्। विश्वामित्रः।
ऋषिः। प्रजापतिगृहीतयेतिप्रजापतिऽगृहीतया। त्वया। श्रोत्रम्। गृण्हामि। प्रजा
भ्यइतिप्रऽजाभ्यः॥५९॥ इयम्। उपरि। मतिः। तस्यै। वाक्। मात्या। हेमंतः। वाच्यः।
पंक्तिः। हैमंती॥६०॥ पंक्त्यै। निधनवदितिनिधनऽवत्। आग्रयणः। आग्रयणात्।
त्रिणवत्रयस्त्रिंशौ। त्रिनवत्रयत्रिंशाइतित्रिनवत्रयत्रिंशौ। त्रिणवत्रयस्त्रिं
शाभ्याम्। त्रिनवत्रयस्त्रिंशाभ्यामितित्रिनवत्रयस्त्रिंशाभ्याम्। शाक्वररैवते

य-य

इति शाश्वरैरैवते। विश्वकर्मेति विश्वऽकर्मा। ऋषिः। प्रजापतिगृहीतयेति प्रजापति
तिऽगृहीतया। त्वया। वाचम्। गृह्णामि। प्रजाभ्य इति प्रजाऽभ्यः। लोकम्। पृणा। ता ॥
अस्या। इंद्रम्। विश्वाः॥ ६१॥ ७॥ इति यजुः काण्वसंहितायां पदपाठे चतुर्दशो
ध्यायः॥ ७॥ हरिः ॐ॥ ध्रुवक्षितिरिति ध्रुवऽक्षितिः। ध्रुवयोनिरिति ध्रु
वऽयोनिः। ध्रुवा। असि। ध्रुवम्। योनिम्। आ। सीद। साधुयेति साधुऽया। उख्य
स्य। केतुम्। प्रथमम्। जुषाणा। अश्विना। अध्वर्यू इत्यध्वर्यू। सादयताम्। इह।
त्वा॥ १॥ कुलायिनी। घृतवतीति घृतऽवती। पुरंधिरिति पुरम्ऽधिः। स्योने।

सीद। सदने। पृथिव्याः। अभि। त्वा। रुद्राः। वसवः। गृणंतु। इमा। ब्रह्म। पीपिहि। सोभगाय।
२॥ स्वैः। दक्षैः। दक्षपितेति दक्षऽपिता। इह। सीद। देवानाम्। सुम्ने। बृहते। रणाय। पितृ
वेति पितृऽइव। एधि। सूनवे। आ। सुशेवेति सुऽशेवा। स्वावेशेति सुऽआवेशा। तन्वा।
सम्। विशस्व॥ २॥ पृथिव्याः। पुरीषम्। असि। अप्सः। नाम। ताम्। त्वा। विश्वे। अभि।
गृणंतु। देवाः। स्तोमपृष्ठेति स्तोमऽपृष्ठा। घृतवतीति घृतऽवती। इह। सीद। प्रजाव
दिति प्रजाऽवत्। अस्मे इत्यस्मे। द्रविणा। आ। यजस्व॥ ४॥ अदित्याः। त्वा। पृष्ठे।
सादयामि। अंतरिक्षस्य। धर्त्रीम्। विष्टंभनीम्। दिशाम्। अधिपत्नीम्। सऽधिः

पत्नीम्।भुवनानाम्।ऊर्मिः।द्रप्सः।अपाम्।असि।विश्वकर्मेति विश्वऽकर्मा।ते।ऋषिः।
शुक्रः।शुचिः।ग्रैष्मौ।ऋतू इत्यृतू॥५॥सजूरिति सऽजूः।ऋतुभिरित्यृतुऽभिः।वि
धाभिरिति विऽधाभिः।देवैः।देवैः।वयोनाधैरिति वयःऽनाधैः।अग्नये।वैश्वान
राय।वसुभिरिति वसुऽभिः।रुद्रैः।आदित्यैः।विश्वैः।देवैः॥६॥प्राणम्।मे।पा
हि।अपानमित्यपऽआनम्।व्यानमिति विऽआनम्।चक्षुः।मे।उर्व्या।वि।भाहि।
श्रोत्रम्।मे।श्लोकय॥७॥अपः।पिन्व।ओषधीः।जिन्व।द्विपादिति द्विऽपात्।
अव।चतुष्पात्।चतुःपादिति चतुःऽपात्।पाहि।दिवः।वृष्टिम्।आ।ईरय॥८॥

ता

७॥मूर्द्धा।वयः।प्रजापतिरिति प्रजाऽपतिः।छन्दः।क्षत्रम्।वयः।मयंदम्।विष्टम्भः।
अधिपतिरित्यधिऽपतिः।विश्वकर्मेति विश्वऽकर्मा।परमेष्ठी।परमेस्थीति परमेऽ
स्थी॥९॥बस्तः।विवलमिति विऽवलम्।वृष्णिः।विपालमिति विऽपालम्।पुरुषः।
तन्द्रम्।व्याघ्रः।अनाधृष्टम्॥१०॥सिंहः।छदिः।पष्ठवाडिति पष्ठऽवाट्।बृहती।
उक्षा।ककुप्।ऋषभः।सतोबृहतीति सतःऽबृहती॥११॥अनड्वान्।पङ्क्तिः।धेनुः।
जगती।त्र्यविरिति त्रिऽअविः।त्रिष्टुप्।त्रिस्तुबिति त्रिऽस्तुप्।दित्यवाडिति दित्यऽवा
ट्।विराडिति विऽराट्॥१२॥पञ्चाविरिति पञ्चऽअविः।गायत्री।त्रिवत्स इति त्रिऽ

त्रि

वत्सः। उष्णिक्। तुर्यवाळिति तुर्य्यऽवाट्। अनुष्टुप्। अनुस्त्बिति अनुऽस्तुप्। छंदः॥१३॥
इंद्राग्नी इतींद्राग्नी। अव्यथमानाम्। इष्टकाम्। दृंहतम्। युवम्। पृष्ठेन। द्यावापृथि
वी इति द्यावापृथिवी। अंतरिक्षम्। च। वि। बाधसे॥१४॥ विश्वकर्मेति विश्वऽकर्मा।
त्वा। सादयतु। अंतरिक्षस्य। अंतरिक्षम्। वायुः॥१५॥ राज्ञी। असि। प्राची। दिक्।
विराळिति विऽराट्। दक्षिणा। सम्राळिति सम्ऽराट्। प्रतीची। स्वराळिति स्वऽरा
ट्। उदीची। अधिपत्नीत्यधिऽपत्नी। असि। बृहती। दिक्। नभः। नभस्यः। वार्षि
कौ। इषः। ऊर्जः। शारदौ। ऋतू इत्यृतू॥१६॥ ७॥ आयुः। मे। पाहि। प्राणम्। अपान

मित्यपऽआनम्। व्यानमिति विऽआनम्। चक्षुः। श्रोत्रम्। वाचम्। पिन्व। मनः। जिन्व। आत्मा
नम्। पाहि। ज्योतिः। मे। यच्छ॥१७॥ मा। छंदः। प्रमेति प्रऽमा। प्रतिमेति प्रतिऽमा। अस्री
वयः। पंक्तिः। उष्णिक्॥१८॥ बृहती। अनुष्टुप्। अनुस्त्बिति अनुऽस्तुप्। विराळिति विऽरा
ट्। गायत्री। त्रिष्टुप्। त्रिस्त्बिति त्रिऽस्तुप्। जगती॥१९॥ पृथिवी। अंतरिक्षम्। द्यौः।
समाः। नक्षत्राणि। वाक्॥२०॥ मनः। कृषिः। हिरण्यम्। गौः। अजा। अश्वः। छंदः॥२१॥
अग्निः। देवता। वातः। सूर्यः। चंद्रमाः। वसवः। रुद्राः। आदित्याः। मरुतः। विश्वेदेवाः।
बृहस्पतिः। इंद्रः। वरुणः। देवता॥२२॥ ८॥ मूर्द्धा। असि। राट्। ध्रुवा। धरुणा। धर्त्री।

॥ प॰ ॥
॥ ४८ ॥

धरुणी। आयुषे। वर्चसे। कृष्यै। क्षेमाय॥ २३॥ यन्त्री। राट्। यन्त्री। यमनी। ध्रुवा। धरित्री।
इषे। ऊर्जे। रय्यै। पोषाय॥ त्वा॥ २४॥ आशुः। त्रिवृदिति त्रिऽवृत्। भान्तः। पञ्चदश इति
पञ्चऽदशः। व्योमेति विऽओमा। सप्तदश इति सप्तऽदशः। धरुणः। एकविंश इत्येकऽ
विंशः। प्रतूर्तिरिति प्रऽतूर्तिः। अष्टादश इत्यष्टाऽदशः। तपः। नवदश इति नवऽदशः।
अभीवर्तः। अभिवर्त इत्यभिऽवर्तः। सविंश इति सऽविंशः। वर्चः। द्वाविंशः। सं
भरण इति सम्ऽभरणः। त्रयोविंश इति त्रयःऽविंशः। योनिः। चतुर्विंश इति चतुःऽ
विंशः॥ २५॥ गर्भाः। पञ्चविंश इति पञ्चऽविंशः। ओजः। त्रिणवः। त्रिनव इति

॥ रा॰ ॥
॥ ४८ ॥

त्रिऽनवः। क्रतुः। एकत्रिंश इत्येकऽत्रिंशः। प्रतिष्ठा। प्रतिस्थेति प्रतिऽस्था। त्रयस्त्रिं
श इति त्रयःऽत्रिंशः। ब्रध्नस्य। विष्टपम्। चतुस्त्रिंश इति चतुःऽत्रिंशः। नाकः। षट्त्रिं
श इति षट्ऽत्रिंशः। विवर्त इति विऽवर्तः। अष्टाचत्वारिंश इत्यष्टाऽचत्वारिंशः।
धर्त्रम्। चतुष्टोमः। चतुस्तोम इति चतुःऽस्तोमः॥ २६॥ अग्नेः। भागः। असि। दीक्षा
याः। आधिपत्यमित्याधिऽपत्यम्। ब्रह्म। स्पृतम्। त्रिवृदिति त्रिऽवृत्। स्तोमः। इन्द्रस्य।
भागः। असि। विष्णोः। आधिपत्यमित्याधिऽपत्यम्। क्षत्रम्। स्पृतम्। पञ्चदश इति
पञ्चऽदशः। स्तोमः॥ २७॥ नृचक्षसामिति नृऽचक्षसाम्। भागः। असि। धातुः। आ

॥ प॰ ॥
॥ ४९ ॥

धिपत्यमित्याधिऽपत्यम्।जनित्रम्।स्पृतम्।सप्तदशइतिसप्तऽदशः।स्तोमः।मित्रस्य।
भागः।असि।वरुणस्य।आधिपत्यमित्याधिऽपत्यम्।दिवः।वृष्टिः।वातः।स्पृतः।एक
विंशइत्येकऽविंशः।स्तोमः।।२८।।वसूनाम्।भागः।असि।रुद्राणाम्।आधिपत्यमि
त्याधिऽपत्यम्।चतुष्पात्।चतुःपादितिचतुःऽपात्।स्पृतम्।चतुर्विंशइतिचतुः
ऽविंशः।स्तोमः।आदित्यानाम्।भागः।असि।मरुताम्।आधिपत्यमित्याधिऽपत्य
म्।गर्भाः।स्पृताः।पंचविंशइतिपंचऽविंशः।स्तोमः।।२९।।अदितेः।भागः।अ
सि।पूष्णः।आधिपत्यमित्याधिऽपत्यम्।ओजः।स्पृतम्।त्रिणवः।त्रिनवइतित्रिऽन

॥ रा॰ ॥
॥ ४९ ॥

बृहस्पतेः

वः।स्तोमः।देवस्य।सवितुः।भागः।असि।[illegible]।आधिपत्यमित्याधिऽपत्यम्।समी
चीः।दिशः।स्पृताः।चतुष्टोमः।चतुस्तोमइतिचतुःऽस्तोमः।स्तोमः।।३०।।यवाना
म्।भागः।असि।अयवानाम्।आधिपत्यमित्याधिऽपत्यम्।प्रजाइतिप्रऽजाः।स्पृ
ताः।चतुश्चत्वारिंशइतिचतुःऽचत्वारिंशः।स्तोमः।ऋभूणाम्।भागः।अ
सि।विश्वेषाम्।देवानाम्।आधिपत्यमित्याधिऽपत्यम्।भूतम्।स्पृतम्।त्रयस्त्रि
ंशइतित्रयःऽत्रिंशः।स्तोमः।सहः।सहस्यः।हैमंतिकौ।ऋतूइत्यृतू।।३१।।
छ।।एकया।अस्तुवत।प्रजाइतिप्रऽजाः।अधीयंत।प्रजापतिरितिप्रजाऽपतिः।

अधिपतिरित्यधिऽपतिः । आसीत् । तिसृभिरिति तिसृऽभिः । अस्तुवत । ब्रह्म । अस्
त । ब्रह्मणः । पतिः । अधिपतिरित्यधिऽपतिः । आसीत् । पंचभिरिति पंचऽभिः । अ
स्तुवत । भूतानि । असृज्यंत । भूतानाम् । पतिः । अधिपतिरित्यधिऽपतिः । आसी
त् । सप्तभिरिति सप्तऽभिः । अस्तुवत । सप्तऋषय इति सप्तऽऋषयः । असृज्यंत । धा
ता । अधिपतिरित्यधिऽपतिः । आसीत् ॥ २९ ॥ नवभिरिति नवऽभिः । अस्तुवत ।
पितरः । असृज्यंत । अदितिः । अधिपत्नीत्यधिऽपत्नी । आसीत् । एकादशभिरित्ये
कादशऽभिः । अस्तुवत । ऋतवः । असृज्यंत । आर्तवाः । अधिपतय इत्यधिऽपत

यः । आसन् । त्रयोदशभिरिति त्रयोदशऽभिः । अस्तुवत । मासाः । असृज्यंत । संवत्सरः ।
अधिपतिरित्यधिऽपतिः । आसीत् । पंचदशभिरिति पंचदशऽभिः । अस्तुवत । क्ष
त्रम् । असृज्यत । इंद्रः । अधिपतिरित्यधिऽपतिः । आसीत् ॥ ३० ॥ सप्तदशभिरि
ति सप्तदशऽभिः । अस्तुवत । ग्राम्याः । पशवः । असृज्यंत । बृहस्पतिः । अधि
पतिरित्यधिऽपतिः । आसीत् । नवदशभिरिति नवदशऽभिः । अस्तुवत । शूद्रा
र्यौ । असृज्येताम् । अहोरात्रे इत्यहोरात्रे । अधिपत्नी इत्यधिऽपत्नी । आस्ताम् ।
एकविंशत्या इत्येकविंशत्या । अस्तुवत । एकशफा इत्येकऽशफाः । पशवः ।

॥५७॥

असृज्यंत। वरुणः। अधिपतिरित्यधिऽपतिः। आसीत्। त्रयोविंꣳशत्येति त्रयः
विंꣳशत्या। अस्तुवत। क्षुद्राः। पशवः। असृज्यंत। पूषा। अधिपतिरित्यधिऽप
तिः। आसीत्। ३४। पंचविंꣳशत्येति पंचऽविंꣳशत्या। अस्तुवत। आरण्याः।
पशवः। असृज्यंत। वायुः। अधिपतिरित्यधिऽ आसीत्। सप्तविंꣳशत्ये
ति सप्तऽविंꣳशत्या। अस्तुवत। द्यावापृथिवी इति द्यावापृथिवी। वि। ऐताम्। व
सवः। रुद्राः। आदित्याः। अनुव्यायन्निति अनुऽव्यायन्। ते। एव। अधिपतय इत्य
धिऽपतयः। आसन्। नवविंꣳशत्येति नवऽविंꣳशत्या। अस्तुवत। वनस्पत

॥५७॥

यः। असृज्यंत। सोमः। अधिपतिरित्यधिऽपतिः। आसीत्। एकत्रिंꣳशतेत्येकऽ
त्रिंꣳशता। अस्तुवत। प्रजा इति प्रऽजाः। असृज्यंत। यवाः। च। अयवाः। च। अ
धिपतय इत्यधिऽपतयः। आसन्। त्रयस्त्रिंꣳशतेति त्रयःऽत्रिंꣳशता। अस्तुव
त। भूतानि। अशाम्यन्। प्रजापतिरिति प्रजाऽपतिः। परमेष्ठी। परमेस्थीति प
रमेऽस्थी। अधिपतिरित्यधिऽपतिः। आसीत्। ३५॥ छ॥ छ। इति यजुः
र्वसंहितायां पदपाठे पंचदशोध्यायः॥ छ॥ छ॥ हरिः ॐ॥ अग्ने। जातान्।
प्र। नुद। नः। सपत्नानिति सऽपत्नान्। प्रति। अजातान्। जातवेद इति जातऽवेदः॥

नुदस्व। अधि। नः। ब्रूहि। सुमना इति सुऽमनाः। अहेळमन्। तव। स्याम। शर्मन्। त्रिवरूथ
इति त्रिऽवरूथे। उभ्दाइत्युत्ऽभौ॥ १॥ सहसा। जातान्। प्र। नुद। नः। सपत्नानिति
सऽपत्नान्। प्रति। अजातान्। नुद। जातवेद इति जातऽवेदः। अधि। नः। ब्रूहि। सुम
नस्यमान इति सुऽमनस्यमानः। वयम्। स्याम। प्र। नुद। नः। सपत्नानिति सऽप
त्नान्। षोळशी। स्तोमः। ओजः। द्रविणम्। चतुश्चत्वारिंश इति चतुःऽचत्वारिं
शः। स्तोमः। वर्चः। द्रविणम्॥ २॥ अग्नेः। पुरीषम्। असि। अप्सः। नाम। ताम्।
त्वा। विश्वे। अभि। गृणन्तु। देवाः। स्तोमपृष्ठेति स्तोमऽपृष्ठा। घृतवतीति घृतऽव

ती। इह। सीद। प्रजावदिति प्रजाऽवत्। अस्मे इत्यस्मे। द्रविणा। आ। यजस्व॥ ३॥ एवः।
छंदः। वरिवः। शंभूरिति शम्ऽभूः। परिभूरिति परिऽभूः। आच्छदित्याऽछत्। मनः। व्य
चः॥ ४॥ सिंधुः। समुद्रम्। सरिरम्। ककुप्। त्रिककुबिति त्रिऽककुप्। काव्यम्। अंकु
पम्॥ ५॥ अक्षरपंक्तिरित्यक्षरऽपंक्तिः। पदपंक्तिरिति पदऽपंक्तिः। विष्टारपंक्तिः।
विष्टारपंक्तिरिति विष्टारऽपंक्तिः। क्षुरः। भ्रजः। आच्छदित्याऽछत्। प्रच्छदिति
प्रऽछत्। संयदिति सम्ऽयत्। वियदिति विऽयत्॥ ६॥ बृहत्। रथंतरमिति रथम्ऽ
तरम्। निकाय इति निऽकायः। विवध इति विऽवधः। गिरः। भ्रजः। संस्तुबिति सम्ऽ

।। प० ।।
।। ५३ ।।

स्तुप्।अनुष्टुप्।अनुष्टुबित्यनुऽस्तुप्।।७।।एवः।वरिवः।वयः।वयस्कृत्।वयःकृदि
तिवयःऽकृत्।विष्पर्द्धाः।विस्पर्द्धा इति विऽस्पर्द्धाः।विशालमिति विऽशालम्।छदिः
।दूरोहणमिति दुःऽरोहणम्।तंद्रम्।अंकांकमित्यंकऽअंकम्।छंदः।।९।।
रश्मिना।सत्याय।सत्यम्।जिन्व।प्रेतिनेति प्रऽइतिना।धर्मणा।धर्मम्।अन्वित्ये
त्यनुऽइत्या।दिवा।दिवम्।संधिनेति सम्ऽधिना।अंतरिक्षेण।अंतरिक्षम्।।
१०।।प्रतिधिनेति प्रतिऽधिना।पृथिव्या।पृथिवीम्।विष्टंभेन।वृष्ट्या।वृष्टिम्।प्र
वयेति प्रऽवया।अन्हा।अहः।अनुयेत्यनुऽया।रात्र्या।रात्रीम्।।१०।।उशिजा।व

।। रा० ।।
।। ५३ ।।

सुभ्य इति वसुऽभ्यः।वसून्।प्रचेतेनेति प्रऽचेतेन।आदित्येभ्यः।आदित्यान्।तंतुना।
रायः।पोषेण।रायः।पोषम्।संसर्पेणेति सम्ऽसर्पेण।श्रुताय।श्रुतम्।।११।।एडे
न।ओषधीभिः।ओषधीः।उत्तमेनेत्युत्ऽतमेन।तनूभिः।तनूः।वयोधसेति वयःऽ
धसा।आधीतेनेत्याऽधीतेन।आधीतमित्याऽधीतम्।अभिजितेत्यभिऽजि
ता।तेजसा।तेजः।जिन्व।।१२।।प्रतिपदिति प्रतिऽपत्।असि।प्रतिपद इति प्रदे। ति
त्वा।अनुपदित्यनुऽपत्।अनुपद इत्यनुऽपदे।संपदेइति सम्ऽपत्।संपद इति
सम्ऽपदे।तेजः।तेजसे।।१३।।त्रिवृदिति त्रिऽवृत्।त्रिवृत इति त्रिऽवृते।प्रवृ

॥ प॰ ॥
॥ ५७ ॥

दिति प्रऽवत्। प्रवत इति प्रऽवते। विवदिति विऽवत्। विवत इति विऽवते। सवदि
ति सऽवत्। सवत इति सऽवते॥१४॥ आक्रम इत्याऽक्रमः। आक्रमायेत्याऽक्रमाय।
संक्रम इति सम्ऽक्रमः। संक्रमायेति सम्ऽक्रमाय। उत्क्रम इत्युत्ऽक्रमः। उत्क्रमाये
त्युत्ऽक्रमाय। उत्क्रान्तिरित्युत्ऽक्रान्तिः। उत्क्रान्त्या इत्युत्ऽक्रान्त्यै। सा। अधिपति
नेत्यधिपतिना। ऊर्जा। ऊर्जम्। विषश्रीरिति विषऽश्रीः। क्षत्राय। क्षत्रम्। जिन्व॥
॥७॥१५॥ राज्ञी। असि। प्राची। दिक्। वसवः। ते। देवाः। अधिपतय इत्यधिऽप
तयः। अग्निः। हेतीनाम्। प्रतिधर्तेति प्रतिऽधर्ता॥१६॥ त्रिवृदिति त्रिऽवृत्। त्वा।

॥ रा ॥
॥ ५४ ॥

स्तोमः। पृथिव्याम्। श्रयतु। आज्यम्। उक्थम्। अव्यथायै। स्तभ्नातु। रथंतरमिति रथ
म्ऽतरम्। साम। प्रतिष्ठित्यै। प्रतिष्ठित्या इति प्रतिऽस्थित्यै। अंतरिक्षे॥१७॥ ऋष
यः। त्वा। प्रथमजा इति प्रथमऽजाः। देवेषु। दिवः। मात्रया। वरिम्णा। प्रथंतु। विध
र्तेति विऽधर्ता। च। अयम्। अधिपतिरित्यधिऽपतिः। च। ते। त्वा। सर्वे। संविदाना
इति सम्ऽविदानाः। नाकस्य। पृष्ठे। स्वर्ग इति स्वःऽगे। लोके। यजमानम्। च। साद
यंतु॥१८॥ विराडिति विऽराट्। असि। दक्षिणा। दिक्। रुद्राः। ते। देवाः। अधिप
तय इत्यधिऽपतयः। इंद्रः। हेतीनाम्। प्रतिधर्तेति प्रतिऽधर्ता॥१९॥ पंचदश।

॥प०॥
॥५५॥

इतिपंचऽदृशः।त्वा।स्तोमः।पृथिव्याम्।श्रयतु।प्रउगम्।उक्थम्।अव्यथायै।स्त
भ्नातु।बृहत्।साम।प्रतिष्ठित्यै।प्रतिस्थित्याऽइतिप्रतिऽस्थित्यै।अंतरिक्षे॥२०
सम्राळिति सम्ऽराट्।असि।प्रतीची।दिक्।आदित्याः।ते।देवाः।अधिपतयऽइत्य
धिऽपतयः।वरुणः।हेतीनाम्।प्रतिधर्तेतिप्रतिऽधर्त्ता॥२१॥सप्तदशऽइतिसप्त
दशः।त्वा।स्तोमः।पृथिव्याम्।श्रयतु।मरुत्वतीयम्।उक्थम्।अव्यथायै।स्त
भ्नातु।वैरूपम्।साम।प्रतिष्ठित्यै।प्रतिस्थित्याऽइतिप्रतिऽस्थित्यै।अंतरिक्षे॥
२२॥स्वराळितिस्वऽराट्।उदीची।दिक्।मरुतः।ते।देवाः।अधिपतयऽइत्यधि
असि

॥रा०॥
॥५५॥

पतयः।सोमः।हेतीनाम्।प्रतिधर्तेतिप्रतिऽधर्त्ता॥२३॥एकविंशऽइत्येकऽविंशः।
त्वा।स्तोमः।पृथिव्याम्।श्रयतु।निष्केवल्यम्।निःकेवल्यमितिनिःऽकेवल्यम्।
उक्थम्।अव्यथायै।स्तभ्नातु।वैराजम्।साम।प्रतिष्ठित्यै।प्रतिस्थित्याऽइतिप्रति
ऽस्थित्यै।अंतरिक्षे॥२४॥अधिपत्नीत्यधिऽपत्नी।असि।बृहती।दिक्।विश्वे।ते।
देवाः।अधिपतयऽइत्यधिऽपतयः।बृहस्पतिः।हेतीनाम्।प्रतिधर्तेतिप्रतिऽध
र्त्ता॥२५॥त्रिणवत्रयस्त्रिंशौ।त्रिनवत्रयस्त्रिंशाऽइतित्रिनवत्रयस्त्रिंशौ।
त्वा।स्तोमौ।पृथिव्याम्।श्रयताम्।वैश्वदेवाग्निमारुतेइतिवैश्वदेवाग्निमारुते।

॥ प· ॥
॥ ५६ ॥

उक्थे इत्युक्थे । अव्यथायै । स्तभ्नीनाम् । शाक्वररैवते इति शाक्वर रैवते । सामनी इति
सामनी । प्रतिष्ठित्यै । प्रतिस्थित्या इति प्रति ऽ स्थित्यै । अंतरिक्षे ॥ २६ ॥ अयम् । पुरः ।
हरिकेश इति हरि ऽ केशः । सूर्यरश्मिरिति सूर्य ऽ रश्मिः । तस्य । रथगृत्स इति रथ ऽ गृ
त्सः । रथौजा इति रथ ऽ ओजाः । च । सेनानीग्रामण्यौ । सेनानीग्रामण्याविति सेना
नीग्रामण्यौ । पुंजिकस्थलेति पुंजिक ऽ स्थला । च । क्रतुस्थलेति क्रतु ऽ स्थला । च । अ
प्सरसौ । दंक्ष्णवः । पशवः । हेतिः । पौरुषेयः । वधः । प्रहेतिरिति प्र ऽ हेतिः ॥ २७ ॥
तेभ्यः । नमः । अस्तु । ते । नः । मृडयंतु । ते । नः । अवंतु । ते । यम् । द्विष्मः । यः । च । नः ।

॥ रा· ॥
॥ ५६ ॥

द्वेष्टि । तम् । एषाम् । जंभे । दध्मः ॥ २८ ॥ अयम् । दक्षिणा । विश्वकर्मेति विश्व ऽ कर्मा । त
स्य । रथस्वन इति रथ ऽ स्वनः । रथेचित्र इति रथे ऽ चित्रः । मेनका । सहजन्येति सह ऽ जन्या ।
अप्सरसौ । यातुधाना इति यातु ऽ धानाः । हेतिः । रक्षांसि । प्रहेतिरिति प्र ऽ हेतिः ॥
२९ ॥ अयम् । पश्चात् । विश्वव्यचा इति विश्व ऽ व्यचाः । तस्य । रथप्रोत इति रथ ऽ प्रोतः ।
असमरथ इत्यसम ऽ रथः । प्रम्लोचंतीति प्र ऽ म्लोचंती । अनुम्लोचंतीत्यनु ऽ म्लोचं
ती । अप्सरसौ । व्याघ्राः । हेतिः । सर्पाः । प्रहेतिरिति प्र ऽ हेतिः ॥ ३० ॥ अयम् । उत्तरा
त् । संयद्वसुरिति संयत् ऽ वसुः । तस्य । तार्क्ष्यः । अरिष्टनेमिरित्यरिष्ट ऽ नेमिः । विश्वा

॥ प॰ ॥
॥ ५७ ॥

ची। घृताची। अप्सरसौ। आपः। हेतिः। वातः। प्रहेतिरिति प्रऽहेतिः॥ ३१॥ अयम्। उ
परि। अर्वाग्वसुरित्यर्वाक्ऽवसुः। तस्य। सेनजिदिति सेनऽजित्। सुषेणः। सुसेन इ
ति सुऽसेनः। उर्वशी। पूर्वचित्तिरिति पूर्वऽचित्तिः। अप्सरसौ। अवस्फूर्जन्नित्यवऽ
स्फूर्जन्। हेतिः। विद्युदिति विऽद्युत्। प्रहेतिरिति प्रऽहेतिः॥ ३२॥ ७॥ अयम्। अ
ग्निः। सहस्रिणः। वाजस्य। शतिनः। पतिः। मूर्द्धा। कविः। रयीणाम्॥ ३३॥ अ
बोधि। अग्निः। समिधेति सम्ऽइधा। जनानाम्। प्रति। धेनुमिवेति धेनुम्ऽइव।
आयतीमित्याऽयतीम्। उषासम्। उषसमित्युषसम्। यह्वा इवेति यह्वाःऽइ

॥ रा॰ ॥
॥ ५७ ॥

वा। प्र। वयाम्। उज्जिहाना इत्युत्ऽजिहानाः। प्र। भानवः। सिस्रते। नाकम्। अच्छ॥ ३४॥
अवोचाम। कवये। मेध्याय। वचः। वंदारु। वृषभाय। वृष्णे। गविष्ठिरः। नमसा। स्तो
मम्। अग्नौ। दिवीवेति दिविऽइव। रुक्मम्। उरुव्यंचमित्युरुऽव्यंचम्। अश्रेत्॥ ३५॥
जनस्य। गोपाः। अजनिष्ट। जागृविः। अग्निः। सुदक्ष इति सुऽदक्षः। सुविताय। न
व्यसा। घृतप्रतीक इति घृतऽप्रतीकः। बृहता। दिविस्पृशेति दिविऽस्पृशा। द्युमदि
ति द्युऽमत्। वि। भाति। भरतेभ्यः। शुचिः॥ ३६॥ त्वाम्। अग्ने। अंगिरसः। गुहा। हि
तम्। अनु। अविंदन्। शिश्रियाणम्। वनेवन इति वनेऽवने। सः। जायसे। मथ्यमा

नः। सहः। महत्। त्वाम्। आहुः। सहसः। पुत्रम्। अंगिरः ॥३७॥ सखायः। सम्। वः। सम्यं
चम्। इषम्। स्तोमम्। च। अग्नये। वर्षिष्ठाय। क्षितीनाम्। ऊर्जः। नप्त्रे। सहस्वते ॥३८॥
सम्ऽसमिति सम्ऽसम्। इत्। युवसे। वृषन्। अग्ने। विश्वानि। अर्यः। आ। इळः। पदे।
सम्। इध्यसे। सः। नः। वसूनि। आ। भर ॥३९॥ त्वाम्। अग्ने। हविष्मंतः। देवम्। मर्ता
सः। ईळते। मर्त्यं। सा। जातवेदसमिति जातऽवेदसम्। सः। हव्या। वक्षि। आनुषक्
॥४०॥ त्वाम्। चित्रश्रवस्तमेति चित्रश्रवःऽतम। हवंते। विक्षु। जंतवः। शोचिष्केश
म्। शोचिःकेशमिति शोचिःऽकेशम्। पुरुप्रियेति पुरुऽप्रिय। अग्ने। हव्याय। वो

ळ्हवे ॥४१॥ एना। वः। अग्निम्। नमसा। ऊर्जः। नपातम्। आ। हुवे। प्रियम्। चेतिष्ठम्। अर
तिम्। स्वध्वरमिति सुऽअध्वरम्। विश्वस्य। दूतम्। अमृतम् ॥४२॥ विश्वस्य। दूतम्। अ
मृतम्। सः। योजते। अरुषा। विश्वभोजसेति विश्वऽभोजसा। सः। दुद्रवत्। स्वाहुत इति
सुऽआहुतः ॥४३॥ सः। दुद्रवत्। स्वाहुत इति सुऽआहुतः। सुब्रह्मेति सुऽब्रह्मा। यज्ञः।
सुशमीति सुऽशमी। वसूनाम्। देवम्। राधः। जनानाम् ॥४४॥ अग्ने। वाजस्य। गोमत
इति गोऽमतः। ईशानः। सहसः। यहो इति यहो ॥ अस्मे इत्यस्मे। धेहि। जातवेद इति जा
तऽवेदः। महि। श्रवः ॥४५॥ सः। इधानः। वसुः। कविः। अग्निः। ईळेन्यः। गिरा। रेवत्।

॥ प॰ ॥
॥ ५९ ॥

अस्मभ्यम्। पुर्वणीक। पुर्वनीकेतिपुरुऽअनीक। दीदिहि॥ ४६॥ क्षपः। राजन्। उत। त्मना। अ
ग्ने। वस्तोः। उत। उषसः। सः। तिग्मजंभेति तिग्मऽजंभ। रक्षसः। दह। प्रति॥ ४७॥ भद्रः। नः।
अग्निः। आहुत इत्याऽहुतः। भद्रा। रातिः। सुभगेतिसुऽभग। भद्रः। अध्वरः। भद्राः। उत।
प्रशस्तय इति प्रऽशस्तयः॥ ४८॥ भद्राः। उत। प्रशस्तयःप्रऽशस्तयः। भद्रम्। मनः। कृणु इति
ष्व। वृत्रतूर्य इति वृत्रऽतूर्ये। येन। समत्स्विति समत्ऽसु। सासहः। ससह इति ससहः।
४९॥ येन। समत्स्विति समत्ऽसु। सासहः। ससह इति ससहः। अव। स्थिरा। तनुहि। भू
रि। शर्धताम्। वनेम। ते। अभिष्टिभिरित्यभिष्टिऽभिः॥ ५०॥ अग्निम्। तम्। मन्ये। यः।

॥ रा॰ ॥
॥ ५९ ॥

वसुः। अस्तम्। यम्। यंति। धेनवः। अस्तम्। अर्वंतः। आशवः। अस्तम्। नित्यासः। वाजि
नः। इषम्। स्तोतृभ्य इति स्तोतृऽभ्यः। आ। भर॥ ५१॥ सः। अग्निः। यः। वसुः। गृणे। स
म्। यम्। आयंतीत्याऽयंति। धेनवः। सम्। अर्वंतः। रघुद्रुव इति रघुऽद्रुवः। सम्। सु
जातास इति सुऽजातासः। सूरयः। इषम्। स्तोतृभ्य इति स्तोतृऽभ्यः। आ। भर॥ ५२॥
उभे इति। सुश्चंद्र। सुश्चंद्रेति सुऽचंद्र। सर्पिषः। दर्वी इति। श्रीणीषे। आसनि।
उतो इति। नः। उत्। पुपूर्याः। उक्थेषु। शवसः। पते। इषम्। स्तोतृभ्य इति स्तो
तृऽभ्यः। आ। भर॥ ५३॥ अग्ने। तम्। अद्य। अश्वम्। न। स्तोमैः। क्रतुम्। न। भद्रम्।

॥ प० ॥
॥ ६० ॥

हृदिस्पृशामितिहृदिऽस्पृशाम्। ऋध्याम। ते। ओहैः॥५४॥ अध। हि। अग्ने। क्रतोः। भ
द्रस्य। दक्षस्य। साधोः। रथीः। ऋतस्य। बृहतः। बभूथ॥५५॥ एभिः। नः। अर्कैः। भ
व। नः। अर्वाङ्। स्वः। न। ज्योतिः। अग्ने। विश्वेभिः। सुमनाइतिसुऽमनाः। अनी
कैः॥५६॥ अग्निम्। होतारम्। मन्ये। दास्वन्तम्। वसुम्। सूनुम्। सहसः। जातवेदस
मितिजातऽवेदसम्। विप्रम्। न। जातवेदसमितिजातऽवेदसम्। यः। ऊर्ध्वया। स्व
ध्वरइतिसुऽअध्वरः। देवः। देवाच्या। कृपा। घृतस्य। विभ्राष्टिमितिविऽभ्राष्टिम्।
अनु। वष्टि। शोचिषा। आजुह्वानस्येत्याऽजुह्वानस्य। सर्पिषः॥५७॥७॥ येन।

पि

॥ रा० ॥
॥ ६० ॥

स्तीर्णं ऽर्हिष
तम्
आ

ऋषयः। तपसा। सत्रम्। आयन्। इन्धानाः। अग्निम्। स्वः। आभरन्तइत्याऽभरन्तः। तस्मि
न्। अहम्। नि। दधे। नाके। अग्निम्। यम्। आहुः। मनवः। स्तीर्णबर्हिषमितिस्तीर्णऽब
र्हिषम्॥५८॥ तम्। पत्नीभिः। अनु। गच्छेम। देवाः। पुत्रैः। भ्रातृभिरितिभ्रातृऽभिः।
उत। वा। हिरण्यैः। नाकम्। गृभ्णानाः। सुकृतस्येतिसुऽकृतस्य। लोके। तृतीये। पृष्ठे।
अधि। रोचने। दिवः॥५९॥ आ। वाचः। मध्यम्। अरुहत्। भुरण्युः। अयम्। अग्निः।
सत्पतिरितिसत्ऽपतिः। चेकितानः। पृष्ठे। पृथिव्याः। निहितइतिनिऽहितः। दवि
द्युतत्। अधस्पदम्। अधःपदमित्यधःऽपदम्। कृणुताम्। ये। पृतन्यवः॥६०॥

॥६१॥

अयम्।अग्निः।वीरत्तम इति वीरऽतमः।वयोधा इति वयःऽधाः।सहस्रियः।द्योतताम्।
अप्रयुच्छन्नित्यप्रऽयुच्छन्।विभ्राजमान इति विऽभ्राजमानः।सरिरस्य।मध्ये।उप।
प्र।याहि।दिव्यानि।धाम॥६१॥संप्रच्यवध्वमिति सम्ऽप्रच्यवध्वम्।उप।संप्रया
तेति सम्ऽप्रयात।अग्ने।पथः।देवयानानिति देवऽयानान्।कृणुध्वम्।पुनरि
ति पुनः।कृण्वाना।पितरा।युवाना।अन्वातांसीदित्यनुऽआतांसीत्।त्वयि।
तंतुम्।एतम्॥६२॥उत्।बुध्यस्व।अग्ने।प्रति।जागृहि।त्वम्।इष्टापूर्ते इती
ष्टापूर्ते।सम्।सृजेथाम्।अयम्।च।अस्मिन्।सधस्थ इति सधऽस्थे।अधि।

ना पितरो युवाना जागृहि त्वम् आताꣳसीत्

॥६१॥

उत्तरस्मिन्नित्युत्ऽतरस्मिन्।विश्वे।देवाः।यजमानः।च।सीदत॥६३॥येन।वह
सि।सहस्रम्।येन।अग्ने।सर्ववेदसमिति सर्वऽवेदसम्।तेन।इमम्।यज्ञम्।नः।
नय।स्वः।देवेषु।गन्तवे॥६४॥तपः।तपस्यः।प्रो।प्रियो।परमेष्ठी।दिवः।सूर्यः
॥६५॥प्रोथत्।अश्वः।न।यवसे।अविष्यन्।यदा।महः।संवरणादिति सम्ऽव
रणात्।वि।अस्थात्।आत्।अस्य।वातः।अनु।वाति।शोचिः।अध।स्म।
ते।व्रजनम्।कृष्णम्।अस्ति॥६६॥आयोः।त्वा।सदने।सादयामि।अवतः।
छायायाम्।समुद्रस्य।हृदये।रश्मीवतीम्।रश्मिवतीमिति रश्मिऽवतीम्।

॥ पू ॥
॥ ६२ ॥

भास्वतीम्। आ। या। द्याम्। भासि। आ। पृथिवीम्। आ। उरु। अन्तरिक्षम्॥ दिवम्।
६७॥ सहस्रस्य। प्रमेतिप्रऽमा। प्रतिमेतिप्रतिऽमा। उन्मेत्युत्ऽमा। साहस्रः। अ
सि। सहस्राय। त्वा॥ ६८॥ ७॥ इतियजुःकाण्वसंहितायांपदपाठेषोडशोध्या
यः॥ ७॥ हरिःॐ॥ नमः। ते। रुद्र। मन्यवे। उतोइत्युतो। ते। इषवे। नमः। बा
हुभ्यामितिबाहुऽभ्याम्। उत। ते। नमः॥ १॥ या। ते। रुद्र। शिवा। तनूः। अघो
रा। अपापकाशिनीत्यपापऽकाशिनी। तया। नः। तन्वा। शंतमयेतिशम्ऽत
मया। गिरिशंतेतिगिरिऽशंत। अभि। चाकशीहि॥ २॥ याम्। इषुम्। गिरि

॥ रा ॥
॥ ६२ ॥

शंतेतिगिरिऽशंत। हस्ते। बिभर्षि। अस्तवे। शिवाम्। गिरित्रेतिगिरिऽत्र। ताम्। कुरु। मा।
हिंसीः। पुरुषम्। जगत्॥ ३॥ शिवेन। वचसा। त्वा। गिरिशेतिगिरिऽश। अच्छ। वदा
मसि। यथा। नः। सर्वम्। इत्। जगत्। अयक्ष्मम्। सुमनाइतिसुऽमनाः। असत्॥ ४॥
अधि। अवोचत्। अधिवक्तेत्यधिऽवक्ता। प्रथमः। दैव्यः। भिषक्। अहीन्। च। सर्वा
न्। जम्भयन्। सर्वाः। च। यातुधान्यइतियातुऽधान्यः। अधराचीः। परा। सुव॥ ५॥
असौ। यः। ताम्रः। अरुणः। उत। बभ्रुः। सुमङ्गलइतिसुऽमङ्गलः। ये। च। एनम्। रुद्राः।
अभितः। दिक्षु। श्रिताः। सहस्रशइतिसहस्रऽशः। अव। एषाम्। हेडः। ईमहे॥ ६॥

प॰
६३

असौ। यः। अवसर्पतीत्यवऽसर्पति। नीलग्रीवइति नीलऽग्रीवः। विलोहित इति विऽलोहि
तः। उत। एनम्। गोपाः। अदृश्रन्। अदृश्रन्। उदहार्यइत्युद्ऽहार्यः। सः। दृष्टः। मृडया
ति। नः॥ ७॥ नमः। अस्तु। नीलग्रीवायेति नीलऽग्रीवाय। सहस्राक्षायेति सहस्रऽअ
क्षाय। मीढुषे। अथो इत्यथो। ये। अस्य। सत्वानः। अहम्। तेभ्यः। अकरम्। नमः॥ ८॥
प्र। मुंच। धन्वनः। त्वम्। उभयोः। आर्त्न्योः। ज्याम्। याः। च। ते। हस्ते। इषवः। परा। ताः।
भगव इति भगऽवः। वप॥ ९॥ विज्यमिति विऽज्यम्। धनुः। कपर्दिनः। विशल्य इति
ति विऽशल्यः। बाणवानिति बाणऽवान्। उत। अनेशन्। अस्य। याः। इषवः। आभुः।

रा॰
६३

अस्य। निषंगधिरिति निषंगऽधिः॥ १०॥ परि। ते। धन्वनः। हेतिः। अस्मान्। वृणक्तु।
विश्वतः। अथो इत्यथो। यः। इषुधिरितीषुऽधिः। तव। आरे। अस्मत्। नि। धेहि। तम्॥
११॥ या। ते। हेतिः। मीढुष्टम। मीढुस्तमेति मिढुःऽतम। हस्ते। बभूव। ते। धनुः। त
या। अस्मान्। विश्वतः। त्वम्। अयक्ष्मया। परि। भुज॥ १२॥ अवतत्येत्यवऽतत्य।
धनुः। त्वम्। सहस्राक्षेति सहस्रऽअक्ष। शतेषुध इति शतऽइषुधे। निशीर्येति
स्वराडिति स्वऽराट्। भामः। मोदाः। प्रमोदा इति प्रऽमोदाः। अंगुलीः। अंगा
नि। मित्रम्। मे। सहः॥ ९५॥ बाहू इति बाहू। मे। बलम्। इंद्रियम्। हस्तौ। मे। क
र्म। वीर्यम्। आत्मा। क्षत्रम्। उरः। मम॥ ९६॥ पृष्ठीः। मे। राष्ट्रम्। उदरम्। अं

त ३

॥ रा० ॥
॥ १५ ॥

सौ। ग्रीवाः। च। श्रोणी इति श्रोणी। ऊरू इत्यूरू। अरत्नी इत्यरत्नी। जानु
नी इति जानुनी। विशः। मे। अंगानि। सर्वतः॥ ९७॥ नाभिः। मे। चित्तम्।
विज्ञानमिति विऽज्ञानम्। पायुः। मे। अपचितिरित्यपऽचितिः। भसत्।
आनंदनंदौ। आंडौ। मे। भगः। सौभाग्यम्। पसः॥ ९८॥ जंघाभ्याम्। पद्भ्या
मिति पत्ऽभ्याम्। धर्मः। अस्मि। विशि। राजा। प्रतिष्ठितः। प्रतिस्थित
इति प्रतिऽस्थितः। प्रति। क्षत्रे। प्रति। तिष्ठामि। राष्ट्रे। अश्वेषु। गोषु॥ ९९॥
अंगेषु। आत्मन्। प्राणेषु। पुष्टे। द्यावापृथिव्योः। यज्ञे॥ १००॥ त्रयाः। देवाः।

॥प॰॥
१६

एकादश।त्रयस्त्रिंशाइतित्रयः ऽत्रिंशाः।सुराधसइतिसुऽराधसः।बृह
स्पतिपुरोहिताइतिबृहस्पतिऽपुरोहिताः।देवस्य।सवितुः।सवे।देवाः।देवैः।
अवंतु।मा॥१०१॥प्रथमाः।द्वितीयैः।द्वितीयाः।तृतीयैः।तृतीयाः।सत्येन।
सत्यम्।यज्ञेन।यज्ञः।यजुर्भिरितियजुःऽभिः।यजूंषि।सामभिरितिसामऽ
भिः॥१०२॥सामानि।ऋग्भिरित्यृक्ऽभिः।ऋचः।पुरोनुवाक्याभिरितिपुरः
अनुवाक्याभिः।पुरोनुवाक्याइतिपुरःऽअनुवाक्याः।याज्याभिः।याज्याः।
वषट्कारैरितिवषट्ऽकारैः।वषट्काराइतिवषट्ऽकाराः।आहुतिभिरित्याहुतिऽ

॥रा॥
॥१६॥

भिः।आहुतयइत्याऽहुतयः।मे।कामान्।सम्।अर्द्धयंतु।भूः।स्वाहा॥१०३॥लोमा
नि।प्रयतिरितिप्रऽयतिः।मम।त्वक्।मे।आनतिरित्याऽनतिः।आगतिरित्याऽ
गतिः।मांसम्।मे।उपनतिरित्युपऽनतिः।वसु।अस्थि।मज्जा।मे।आनति
रित्याऽनतिः॥१०४॥छ॥छ॥इतिशुक्लयजुःकाण्वसंहितायांपदपाठएक
विंशतितमोध्यायः॥छ॥हरिःॐम्॥यत्।देवाः।देवहेडनमितिदेवऽहेडनम्।
देवासः।चकृम।वयम्।अग्निः।मा।तस्मात्।एनसः।विश्वात्।मुंचतु।अंं
हसः॥१॥यदि।दिवा।यदि।नक्तम्।एनांसि।चकृम।वयम्।वायुः।मा।तस्मा

॥प॰॥
॥१७॥

त्।एनसः।विश्वात्।मुंचतु।अंहसः॥ ३॥यदि।जाग्रत्।यदि।स्वप्ने।एनांसि।च
कृम।वयम्।सूर्यः।मा।तस्मात्।एनसः।विश्वात्।मुंचतु।अंहसः॥ ३॥शूद्रे।अर्ये।
एकस्य।अधि।धर्मणि।तस्य।अवयजनमित्यवऽयजनम्।असि।यत्।आपः।
एनः।अयक्षि॥ ४॥द्रुपदादिवेतिद्रुपदात्ऽइव।मुमुचानः।स्विन्नः।स्नातः।मला
दिवेतिमलात्ऽइव।पूतम्।पवित्रेणेवेतिपवित्रेणऽइव।आज्यम्।आपः।शुंधं
तु।मा।एनसः॥ ५॥उत्।वयम्।तमसः।परि।स्वरितिस्वः।पश्यंतः।उत्तरमि
त्युत्ऽतरम्।दिवम्।देवत्रेतिदेवऽत्रा।सूर्यम्।अगन्म।ज्योतिः।उत्तममित्युत्ऽ

॥रा॥
॥१७॥

तमम्॥ ६॥अपः।अद्य।अनु।अचारिषम्।रसेन।सम्।असृक्ष्महि।पयस्वान्।
अग्ने।आ।अगमम्।तम्।मा।सम्।सृज।वर्चसा।प्रजयेतिप्रऽजया।च।धने
न।च।एधः।असि।एधिषीमहि।समिदितिसम्ऽइत्।असि।तेजः।असि।ते
जः।मयि।धेहि॥ ७॥समाववर्तीतिसम्ऽआववर्ति।पृथिवी।सम्।उषाः।
सम्।उं इति।सूर्यः।सम्।उं इति।विश्वम्।इदम्।जगत्॥ ८॥वैश्वानरज्यो
तिरितिवैश्वानरऽज्योतिः।भूयासम्।विभून्इतिविऽभून्।कामान्।विऽअ
श्नवै।भूः।स्वाहा॥ ९॥अभि।आ।दधामि।समिधमितिसम्ऽइधम्।अग्ने।

अग्ने। व्रतपतइतिव्रतऽपते। त्वयि। व्रतम्। च। श्रद्धाम्। च। उप। एमि। इंधे। त्वा। दी
क्षितः। अहम्॥ ९॥ यत्र। ब्रह्म। च। क्षत्रम्। च। सम्यंचौ। चरतः। सह। तम्। लोकम्।
पुण्यम्। प्र। ज्ञेषम्। यत्र। देवाः। सह। अग्निना॥ १०॥ यत्र। इंद्रः। च। वायुः। च। स
म्यंचौ। चरतः। सह। तम्। लोकम्। पुण्यम्। प्र। ज्ञेषम्। यत्र। सेदिः। न। विद्यते।
॥ ११॥ अंशुना। ते। अंशुः। पृच्यताम्। परुषा। परुः। गंधः। ते। सोमम्।
अवतु। मदाय। रसः। अच्युतः॥ १२॥ सिंचंति। परि। सिंचंति। उत्। सिंचं
ति। पुनंति। च। सुरायै। बभ्रवे। मदे। किंत्वः। वदति। किंत्वः॥ १३॥ धानावंतमि

ति धानाऽवंतम्। करंभिणम्। अपूपवंतमित्यपूपऽवंतम्। उक्थिनम्। इंद्र। प्रातः।
जुषस्व। नः॥ १४॥ बृहत्। इंद्राय। गायत। मरुतः। वृत्रहंतममिति वृत्रहम्ऽतमम्
येन। ज्योतिः। अजनयन्। ऋतावृधः। ऋतवृधइति ऋतऽवृधः। देवम्। देवाय।
जागृवि॥ १५॥ अध्वर्यो इत्यध्वर्यो। अद्रिभिरित्यद्रिऽभिः। सुतम्। सोमम्। प
वित्रे। आ। नय। पुनीहि। इंद्राय। पातवे॥ १६॥ छ॥ यः। भूतानाम्। अधिपति
रित्यधिऽपतिः। यस्मिन्। लोकाः। अधि। श्रिताः। यः। ईशे। महतः। महान्। ते
न। गृह्णामि। त्वाम्। अहम्। मयि। गृह्णामि। त्वाम्। अहम्॥ १७॥ छ॥ प्राणपा

म२

तिप्राण॰पाः। मे। अपानपाइत्यपान॰पाः। चक्षुष्पाः। चक्षुः॰पाइतिचक्षुः॰पाः। श्रो
त्रपाइतिश्रोत्र॰पाः। च। मे। वाचः। मे। विश्वभेषजइतिविश्व॰भेषजः। मनसः।
असि। विलायकइतिवि॰लायकः॥ १८॥ अश्विनकृतस्येत्यश्विन॰कृतस्य।
ते। सरस्वतिकृतस्येतिसरस्वति॰कृतस्य। इंद्रेण। सुत्राम्णेतिसु॰त्राम्णा। कृत
स्य। उपहूतइत्युप॰हूतः। उपहूतस्येत्युप॰हूतस्य। भक्षयामि॥ १९॥ ६॥ स
मिद्धइतिसम्॰इद्धः। इंद्रः। उषसाम्। अनीके। पुरोरुचेतिपुरः॰रुचा। पूर्वकृ
दितिपूर्व॰कृत्। वावृधानः। ववृधानइतिववृधानः। त्रिभिरितित्रि॰भिः। दे

वैः। त्रिंशता। वज्रबाहुरितिवज्र॰बाहुः। जघान। वृत्रम्। वि। दुरः। ववार॥ २०॥
नराशंसः। प्रति। शूरः। मिमानः। तनूनपादितितनू॰नपात्। प्रति। यज्ञस्य।
धाम। गोभिः। वपावानितिवपा॰वान्। मधुना। समंजन्नितिसम्॰अंजन्। हि
रण्यैः। चंद्री। यजति। प्रचेताइतिप्र॰चेताः॥ २१॥ ईडितः। देवैः। हरिवानिति
हरि॰वान्। अभिष्टिः। आजुह्वानइत्या॰जुह्वानः। हविषा। शर्द्धमानः। पुरंद
रइतिपुरम्॰दरः। गोत्रभिदितिगोत्र॰भित्। वज्रबाहुरितिवज्र॰बाहुः। आ
यातु। यज्ञम्। उप। नः। जुषाणः॥ २२॥ जुषाणः। बर्हिः। हरिवानिति हरि॰वा

तिः

नः। इंद्रः। प्राचीनम्। सीदत्। प्रदिशेति प्रऽदिशा। पृथिव्याः। उरुप्रथा इत्युरुऽप्रथाः।
प्रथमानम्। स्योनम्। आदित्यैः। अक्तम्। वसुभिरिति वसुऽभिः। सजोषा इति सऽ
जोषाः॥२३॥ इंद्रम्। दुरः। कवष्यः। धावमानाः। वृषाणम्। यंतु। जनयः। सुपत्नी
रिति सुऽपत्नीः। द्वारः। देवीः। अभितः। वि। श्रयंताम्। सुवीरा इति सुऽवीराः। वी
ति३ रम्। प्रथमानाः। महोभिरिंमहःऽभिः॥२४॥ उषासानक्ता। उषसानक्तेत्युष
सानक्ता। बृहती इति बृहती। बृहंतम्। पयस्वती इति पयस्वती। सुदुघे इति सु
ततम् दुघे। शूरम्। इंद्रम्। तन्तुम्। पेशसा। संवयन्ती इति सम्ऽवयंती। देवानाम्। देवम्।

यजतः। सुरुक्मे इति सुऽरुक्मे॥२५॥ दैव्या। मिमाना। मनुषः। पुरुत्रेति पुरुऽत्रा। होता
रौ। इंद्रम्। प्रथमा। सुवाचेति सुऽवाचा। मूर्द्धन्। यज्ञस्य। मधुना। दधाना। प्राची
नम्। ज्योतिः। हविषा। वृधातः॥२६॥ तिस्रः। देवीः। हविषा। वर्द्धमानाः। इंद्रं
जुषाणाः। जनयः। न। पत्नीः। अच्छिन्नम्। तंतुम्। पयसा। सरस्वती। इडा।
देवी। भारती। विश्वतूर्तिरिति विश्वऽतूर्तिः॥२७॥ त्वष्टा। दधत्। शुष्मम्।
इंद्राय। वृष्णे। अपाकः। अचिष्टुः। यशसे। पुरूणि। वृषा। यजन्। वृषणम्।
भूरिरेता इति भूरिऽरेताः। मूर्द्धन्। यज्ञस्य। सम्। अनक्तु। देवान्॥२८॥ व

पृ॰
॥२१॥

नस्पतिः।अवस्पृदित्यवऽस्पृत्।न।पापौः।त्मन्या।समंजन्नितिसम्ऽअंज
न्।पापिता।न।देवः।इंद्रस्य।हव्यैः।जठरम्।पृणानः।स्वदाति।यज्ञम्।म
धुना।घृतेन॥२९॥स्तोम्ना।नाम्।इंद्रम्।प्रति।शूरः।इंद्रः।वृषायमाणः।वृ
षयमाणइतिवृषऽयमाणः।वृषभः।तुराषाट्।घृतप्रुषेतिघृतऽप्रुषा।मन
सा।मोदमानाः।स्वाहा।देवाः।अमृताः।मादयंताम्॥३०॥आ।यातु।इं
द्रः।अवसे।उप।नः।इह।स्तुतः।सधमादितिसधऽमात्।अस्तु।शूरः।
वावृधानः।ववृधानइतिववृधानः।तविषीः।यस्य।पूर्वीः।द्यौः।नाक्ष

रा॰
॥२१॥

त्रम्।अभिभूतीत्यभिऽभूति।पुष्यात्॥३१॥आ।नः।इंद्रः।दूरात्।आ।नः।आ
सात्।अभिष्टिकृदित्यभिष्टिऽकृत्।अवसे।यासत्।उग्रः।ओजिष्ठेभिः।नृ
पतिरितिनृऽपतिः।वज्रबाहुरितिवज्रऽबाहुः।संगइतिसम्ऽगे।समत्स्वि
तिसमत्ऽसु।तुर्वणिः।पृतन्यून्॥३२॥आ।नः।इंद्रः।हरिभिरितिहरिऽभिः
यातु।अच्छ।अर्वाचीनः।अवसे।राधसे।च।तिष्ठाति।वज्री।मघवेतिम
घऽवा।विरप्शीतिविऽरप्शी।इमम्।यज्ञम्।अनु।नः।वाजसाताविति वा
जऽसातौ॥३३॥त्रातारम्।इंद्रम्।अवितारम्।इंद्रम्।हवेहवइतिहवेऽह

॥ पू ॥
॥ २२ ॥

ति

वा। सुहवमिति सुऽहवम्। शूरम्। इंद्रम्। ह्वयामि। शक्रम्। पुरुहूतमिति पुरुऽहूतं।
इंद्रम्। स्वस्ति। नः। मघवेति मघऽवा। धातु। इंद्रः॥ ४७॥ इंद्रः। सुत्रामेति सुऽ
त्रामा। स्ववानिति स्वऽवान्। अवोभिरित्यवःऽभिः। सुमृळीक इति सुऽमृळीकः। भ
वतु। विश्ववेदा इति विश्वऽवेदाः। बाधताम्। द्वेषः। अभयम्। कृणोतु। सुवीर्य
स्येति सुऽवीर्यस्य। पतयः। स्याम॥ ४८॥ तस्य। वयम्। सुमताविति सुऽम
तौ। यज्ञियस्य। अपि। भद्रे। सौमनसे। स्याम। सः। सुत्रामेति सुऽत्रामा। स्व
वानिति स्वऽवान्। इंद्रः। अस्मे इत्यस्मे। आरात्। चित्। द्वेषः। सनुतः। युयोतु॥

॥ रा ॥
॥ २२ ॥

४९॥ आ। मंद्रैः। इंद्र। हरिभिरिति हरिऽभिः। याहि। मयूररोमभिरिति मयूररो
मऽभिः। मा। त्वा। के। चित्। नि। यमन्। विम्। न। पाशिनः। अति। धन्वेवेति ध
न्वऽइव। ता। तान्। इहि॥ ५०॥ एव। इत्। इंद्रम्। वृषणम्। वज्रबाहुमिति वज्रऽ
बाहुम्। वसिष्ठासः। अभि। अर्चंति। अर्कैः। सः। नः। वीरवदिति वीरऽवत्। धा
तु। गोमदिति गोऽमत्। यूयम्। पात। स्वस्तिभिरिति स्वस्तिऽभिः। सदा। नः॥ ५
१॥ समिद्ध इति सम्ऽइद्धः। अग्निः। अश्विना। तप्तः। घर्मः। विराडिति विऽरा
ट्। सुतः। दुहे। धेनुः। सरस्वती। सोमम्। शुक्रम्। इह। इंद्रियम्॥ ५२॥ तनूपेति त

स्तुतः।

नृऽपा। भिषजा। सुते। अश्विना। उभा। सरस्वती। मध्वा। रजांसि। इंद्रियम्। इंद्राय। पथिभिरितिपथिऽभिः। वहान्। ॥४१॥ इंद्राय। इंदुम्। सरस्वती। नराशंसेन। न
ग्नहुम्। अधाताम्। अश्विना। मधु। भेषजम्। भिषजा। सुते ॥४२॥ आजुह्वाने
त्याऽजुह्वाना। सरस्वती। इंद्राय। इंद्रियाणि। वीर्यम्। इळाभिः। अश्विनौ। इष
सम् षम्। ऊर्जम्। सम्। रयिम्। दधुः ॥४३॥ अश्विना। नमुचेः। सुतम्। सोमम्। शु
क्रम्। परिस्रुतेतिपरिऽस्रुता। सरस्वती। तम्। आ। अभरत्। बर्हिषा। इंद्राय।
पातवे ॥४४॥ कवष्यः। न। व्यचस्वतीः। अश्विभ्यामित्यश्विऽभ्याम्। न। दुरः।

दिशः। इंद्रः। न। रोदसीइतिरोदसी। उभेइत्युभे। दुहे। कामान्। सरस्वती ॥४५॥ उषा
सानक्तम्। उषसानक्तमित्युषसानक्तम्। अश्विना। दिवा। इंद्रम्। सायम्। इंद्रियैः।
संजानानेइतिसम्ऽजानाने। सुपेशसेतिसुऽपेशसा। सम्। अंजातेइत्यंजाते।
सरस्वत्या ॥४६॥ पातम्। नः। अश्विना। दिवा। पाहि। नक्तम्। सरस्वती। दैव्या।
होतारा। भिषजा। पातम्। इंद्रम्। सचा। सुते ॥४७॥ तिस्रः। त्रेधा। सरस्वती। अ
श्विना। भारती। इळा। तीव्रम्। परिस्रुतेति। परिऽस्रुता। सोमम्। इंद्राय। सुषुवुः।
सुसुवुरितिसुसुवुः। मदम् ॥४८॥ अश्विना। भेषजम्। मधु। भेषजम्। नः। सर

स्वती। इंद्र। त्वष्टा। यशः। श्रियम्। रूपंऽरूपमिति रूपम्ऽरूपम्। अधुः। सुते॥ ४९॥
ऋतुथेत्यृतुऽथा। इंद्रः। वनस्पतिः। शशमानः। परिस्रुतेति परिऽस्रुता। कीलालम्।
अश्विभ्यामित्यश्विऽभ्याम्। मधु। दुहे। धेनुः। सरस्वती॥ ५०॥ गोभिः। न। सो
मम्। अश्विना। मासरेण। परिस्रुतेति परिऽस्रुता। सम्। अधातम्। सरस्वत्या।
स्वाहा। इंद्रे। सुतम्। मधु॥ ५१॥ अश्विना। हविः। इंद्रियम्। नमुचेः। धिया। सर
स्वती। आ। शुक्रम्। आसुरात्। वसु। मघम्। इंद्राय। जभ्रिरे॥ ५२॥ यम्। अश्वि
ना। सरस्वती। हविषा। इंद्रम्। अवर्द्धयन्। सः। बिभेद। वलम्। मघम्। नमुचौ।

आसुरे। सचा॥ ५३॥ तम्। इंद्रम्। पशवः। सचा। अश्विना। उभा। सरस्वती। द
धानाः। अभि। अनूषत। हविषा। यज्ञे। इंद्रियैः॥ ५४॥ य। इंद्रे। इंद्रियम्। दधुः। सवि
ता। वरुणः। भगः। सः। सुत्रामेति सुऽत्रामा। हविष्पतिः। हविःपतिरिति हविःऽ
पतिः। यजमानाय। सश्चत॥ ५५॥ सविता। वरुणः। दधत्। यजमानाय। दाशु
षे। आ। अदत्त। नमुचेः। वसु। सुत्रामेति सुऽत्रामा। बलम्। इंद्रियम्॥ ५६॥ वरुणः।
क्षत्रम्। इंद्रियम्। भगेन। सविता। श्रियम्। सुत्रामेति सुऽत्रामा। यशसा। बलम्।
दधानाः। यज्ञम्। आशत॥ ५७॥ अश्विना। गोभिः। इंद्रियम्। अश्वेभिः। वीर्यम्।

बलम्। हविषा। इंद्रम्। सरस्वती। यजमानम्। अवर्द्धयन्॥ ५८॥ ता। नासत्या। सुपे
शसेति सुऽपेशसा। हिरण्यवर्तनी इति हिरण्यऽवर्तनी। नरा। सरस्वती। हविष्मती।
इंद्र। कर्मस्विति कर्मऽसु। नः। अवत॥ ५९॥ ता। भिषजा। सुकर्मणेति सुऽकर्मणा।
सा। सुदुघेति सुऽदुघा। सरस्वती। सः। वृत्रहेति वृत्रऽहा। शतक्रतुरिति शतऽक्रतुः।
इंद्राय। दधुः। इंद्रियम्॥ ६०॥ युवम्। सुरामम्। अश्विना। नमुचौ। आसुरे। सचा।
विपिपाना इति विऽपिपानाः। सरस्वति। इंद्रम्। कर्मस्विति कर्मऽसु। आवत॥ ६१॥
यस्मिन्। अश्वासः। ऋषभासः। उक्षणः। वशाः। मेषाः। अवसृष्टास इत्यवऽसृ

ष्टासः। आहुता इत्याऽहुताः। कीलालप इति कीलालऽपे। सोमपृष्ठायेति सोमऽपृष्ठा
य। वेधसे। हृदा। मतिम्। जनय। चारुम्। अग्नये॥ ६२॥ अहावि। अग्ने। हविः। आ
स्ये। ते। स्रुचीवेति स्रुचिऽइव। घृतम्। चम्वीवेति चम्विऽइव। सोमः। वाजसनि
मिति वाजऽसनिम्। रयिम्। अस्मे इत्यस्मे। सुवीरमिति सुऽवीरम्। प्रशस्तमिति
प्रऽशस्तम्। धेहि। यशसम्। बृहंतम्॥ ६३॥ अश्विना। तेजसा। चक्षुः। प्राणेन।
सरस्वती। वीर्य्यम्। वाचा। इंद्रः। बलेन। इंद्राय। दधुः। इंद्रियम्॥ ६४॥ गोमदि
ति गोऽमत्। ऊ इत्यूँ। सु। नासत्या। अश्वावत्। अश्ववदित्यश्वऽवत्। यातम्। अ

॥ पू ॥
॥ २६ ॥

श्विना। वर्तिः। रुद्रा। नृपाय्यमितिनृऽपाय्यम्॥ ६५॥ न। यत्। परः। न। अंतरः। आदधर्षत्। वृषण्वसूऽइतिवृषण्ऽवसू। दुःपांऽसऽइतिदुःपांऽसः। मर्त्यः। रिपुः॥ ६६॥ ता। नः। आ। वोढम्। अश्विना। रयिम्। पिशंगसंदृशमितिपिशंगऽसंदृशम्। धिष्ण्या। वरिवोविदमितिवरिवःऽविदम्॥ ६७॥ पावका। नः। सरस्वती। वाजेभिः। वाजिनीवतीतिवाजिनीऽवती। यज्ञम्। वष्टु। धियावसुरितिधियाऽवसुः॥ ६८॥ चोदयित्री। सूनृतानाम्। चेतंती। सुमतीनामितिसुऽमतीनाम्। यज्ञम्। दधे। सरस्वती॥ ६९॥ महः। अर्णः। सरस्वती। प्र। चेतयति। के

॥ रा ॥
॥ २६ ॥

३ शुभावतः। [illegible]

तुना। धियः। विश्वाः। वि। राजति॥ ७०॥ इंद्र। आ। याहि। चित्रभानोऽइतिचित्रऽभानो। सुताः। इमे। त्वायवऽइतित्वाऽयवः। अण्वीभिः। तना। पूतासः॥ ७१॥ धिया। इषितः। विप्रजूतऽइतिविप्रऽजूतः। उप। ब्रह्माणि। वाघतः॥ ७२॥ तूतुजानः। उप। ब्रह्माणि। हरिवऽइतिहरिऽवः। सुते। दधिष्व। नः। चनः॥ ७३॥ अश्विना। पिबताम्। मधु। सरस्वत्या। सजोषसेतिसऽजोषसा। इंद्रः। सुत्रामेतिसुऽत्रामा। वृत्रहेतिवृत्रऽहा। जुषंताम्। सोम्यम्। मधु॥ ७४॥ छ॥ छ॥ इतिशुक्लयजुःकाण्वसंहितायांपदपाठेत्रयोविंशतिमोध्यायः॥ २३॥ छ

॥षृ॥
॥२७॥

हरिः ऽॐ॥ इमम्। मे। वरुण। श्रुधि। हवम्। अद्य। च। मृळय। त्वाम्। अवस्युः। आ। चके॥१॥ त्वम्। नः। अग्ने। वरुणस्य। विद्वान्। देवस्य। हेळः। अव। यासिसीष्ठाः। यजिष्ठः। वह्निऽतमः इति वह्निऽतमः। शोशुचानः। विश्वा। द्वेषांसि। प्र। मुमुग्धि। अस्मत्॥२॥ सः। त्वम्। नः। अग्ने। अवमः। भव। ऊती। नेदिष्ठः। अस्याः। उषसः। व्युष्टौ इति विऽउष्टौ। अव। यक्ष्व। नः। वरुणम्। रराणः। वीहि। मृळीकम्। सुऽहवः इति सुऽहवः। नः। एधि॥३॥ महीम्। ऊं इति। सु। मातरम्। सुऽव्रतानामिति सुऽव्रतानाम्। ऋतस्य। पत्नीम्। अवसे। हुवेम। तुविऽक्षत्राम्

॥रा॥
॥२७॥

॥षृ॥ सुत्रामाणमिति सुऽत्रामाणं। पृथिवीम्। द्याम्। अनेहसम्। सुशर्माणमिति सुऽशर्माणं। अदितिम्। सुप्रणीतिमिति सुऽप्रणीतिम्॥ ×

मिति तुविऽक्षत्राम्। अजरन्तीम्। उरूचीम्। सुशर्माणमिति सुऽशर्माणम्। अदितिम्। सुप्रणीतिम्। सुप्रनीतिमिति सुऽप्रनीतिम्। दैवीम्। नावम्। स्वरित्रामिति सुऽअरित्राम्। अनागसम्। अस्रवन्तीम्। आ। रुहेम। स्वस्तये॥६॥ सुनावमिति सुऽनावम्। आ। रुहेयम्। अस्रवन्तीम्। अनागसम्। शतारित्रामिति शतऽअरित्राम्। स्वस्तये॥७॥ आ। नः। मित्रावरुणा। घृतैः। गव्यूतिम्। उक्षतम्। मध्वा। रजांसि। सुक्रतू इति सुऽक्रतू॥८॥ प्र। बाहवा। सिसृतम्। जीवसे। नः। आ। नः। गव्यूतिम्। उक्षतम्। घृतेन। आ। मा। जने। श्रवयतम्। युवाना। श्रुतम्। मे। मित्रावरुणा। हवा। इमा॥९॥ ७॥

समिद्ध इति सम्ऽइद्धः। अग्निः। समिधेति सम्ऽइधा। सुसमिद्ध इति सुऽसमिद्धः। व
रेण्यः। गायत्री। छंदः। इंद्रियम्। त्र्यविरिति त्रिऽअविः। गौः। वयः। दधुः॥११॥ तनूनं
पादिति तनूऽनपात्। शुचिव्रत इति शुचिऽव्रतः। तनूपा इति तनूऽपाः। च। सरस्वती।
उष्णिहा। छंदः। इंद्रियम्। दित्यवाडिति दित्यऽवाट्। गौः। वयः। दधुः॥१२॥ इडाभिः।
अग्निः। ईड्यः। सोमः। देवः। अमर्त्यः। अनुष्टुप्। अनुस्तुबित्यनुऽस्तुप्। छंदः। इंद्रि
यम्। पंचाविरिति पंचऽअविः। गौः। वयः। दधुः॥१३॥ सुबर्हिरिति सुऽबर्हिः। अ

ग्निः। पूषण्वानिति पूषण्ऽवान्। स्तीर्णबर्हिरिति स्तीर्णऽबर्हिः। अमर्त्यः। बृहती। छंदः।

इंद्रियम्। त्रिवत्स इति त्रिऽवत्सः। गौः। वयः। दधुः॥१४॥ दुरः। देवीः। दिशः। महीः। ब्र
ह्मा। देवः। बृहस्पतिः। पंक्तिः। छंदः। इह। इंद्रियम्। तुर्यवाडिति तुर्यऽवाट्। गौः। वयः।
दधुः॥१५॥ उषे इत्युषे। यह्वी इति यह्वी। सुपेशसेति सुऽपेशसा। विश्वे। देवाः। अ
मर्त्याः। त्रिष्टुप्। त्रिस्तुबिति त्रिऽस्तुप्। छंदः। इह। इंद्रियम्। पष्ठवाडिति पष्ठऽवा
ट्। गौः। वयः। दधुः॥१६॥ दैव्या। होतारा। भिषजा। इंद्रेण। सयुजेति सऽयुजा। यु
जा। जगती। छंदः। इंद्रियम्। अनड्वान्। गौः। वयः। दधुः॥१७॥ तिस्रः। इडा। सरस्व
ती। भारती। मरुतः। विशः। विराडिति विऽराट्। छंदः। इह। इंद्रियम्। धेनुः। गौः। न।

१
२९

वयः। दधुः॥१६॥ त्वष्टा। तुरीपः। अद्भुतः। इंद्राग्नी इतींद्राग्नी। पुष्टिवर्द्धनेति पु
ष्टि ऽ वर्द्धना। द्विपदेति द्वि ऽ पदा। छंदः। इंद्रियम्। उक्षा। गौः। वयः। दधुः॥१७॥
शमिता। नः। वनस्पतिः। सविता। प्रसुवन्निति प्र ऽ सुवन्। भगम्। ककुप्। छं
दः। इह। इंद्रियम्। वशा। वेहत्। वयः। दधुः॥१८॥ स्वाहा। यज्ञम्। वरुणः। सु
क्षत्र इति सु ऽ क्षत्रः। भेषजम्। करत्। अतिछंदा इत्यति ऽ छंदाः। इंद्रियम्।
बृहत्। ऋषभः। गौः। वयः। दधुः॥१९॥ छ॥ वसंतेन। ऋतुना। देवाः। वसवः।
त्रिवृतेति त्रि ऽ वृता। स्तुताः। रथंतरेणेति रथम्। तरेण। तेजसा। हविः। इंद्रे

न२

रा
२९

वयः। दधुः॥२०॥ ग्रीष्मेण। ऋतुना। देवाः। रुद्राः। पंचदशा इति पंच ऽ दशे। स्तु
ताः। बृहता। यशसा। बलम्। हविः। इंद्रे। वयः। दधुः॥२१॥ वर्षाभिः। ऋतुना।
आदित्याः। स्तोमे। सप्तदश इति सप्त ऽ दशे। स्तुताः। वैरूपेण। विशा। ओजसा।
हविः। इंद्रे। वयः। दधुः॥२२॥ शारदेन। ऋतुना। देवाः। एकविंश इत्येक ऽ विं
शे। ऋभवः। स्तुताः। वैराजेन। श्रिया। श्रियम्। हविः। इंद्रे। वयः। दधुः॥२३॥
हेमंतेन। ऋतुना। देवाः। त्रिणवे। त्रिनव इति त्रि ऽ नवे। मरुतः। स्तुताः। बलेन।
शक्वरीः। सहः। हविः। इंद्रे। वयः। दधुः॥२४॥ शैशिरेण। ऋतुना। देवाः। त्रय

।।प॰।।
।।३०।।

स्त्रिंशा इति त्रयःऽत्रिंशाः । अमृताः । स्तुताः । सखेन । रेवतीः । क्षत्रम् । हविः ।
इंद्रे । वयः । दधुः ।। २५ ।। छ ।। होता । यक्षत् । समिधेति सम्ऽइधा । अग्निम् ।
इळः । पदे । अश्विना । इंद्रम् । सरस्वतीम् । अजः । धूम्रः । न । गोधूमैः । कुवलैः ।
भेषजम् । मधु । शष्पैः । न । तेजः । इंद्रियम् । पयः । सोमः । परिस्रुतेति परिऽ
स्रुता । घृतम् । मधु । व्यंतु । आज्यस्य । होतः । यज ।। २६ ।। तनूनपादिति तनूऽ
नपात् । सरस्वतीम् । अविः । मेषः । न । भेषजम् । पथा । मधुमतेति मधुऽम
ता । भरन् । अश्विना । इंद्राय । वीर्यम् । बदरैः । उपवाकाभिरित्युपऽवाकाभिः ।

।।रा।।
।।३०।।

भेषजम् । तोक्मभिरिति तोक्मऽभिः । पयः ।। २७ ।। नराशंसम् । न । नग्नहुम् । पतिं
सुरया । भेषजम् । मेषः । सरस्वती । भिषक् । रथः । न । चंद्री । अश्विनोः । वपाः । इंद्रस्य
वीर्यम् । बदरैः । उपवाकाभिरित्युपऽवाकाभिः । भेषजम् । तोक्मभिरिति तोक्मऽ
भिः । पयः ।। २८ ।। इळा । ईळितः । आजुह्वान इत्याऽजुह्वानः । सरस्वतीम् । इंद्रं ।
बलेन । वर्द्धयन् । ऋषभेण । गवा । इंद्रियम् । अश्विना । इंद्राय । भेषजम् । यवैः ।
कर्कंधुभिरिति कर्कंधुऽभिः । मधु । लाजैः । न । मासरम् । पयः ।। २९ ।। बर्हिः । ऊ
र्णम्रदा इत्यूर्णऽम्रदाः । भिषक् । नासत्या । भिषजा । अश्विना । अश्वा । शिशुम

तीतिपिशुंऽमती। भिषक्। धेनुः। सरस्वती। भिषक्। दुहे। इंद्राय। भेषजम्। प
यः॥३०॥ दुरः। दिशः। कवष्यः। न। व्यचस्वतीः। अश्विभ्यामित्यश्विऽभ्याम्
न। दुरः। दिशः। इंद्रः। न। रोदसी इति रोदसी। दुघे इति दुघे। दुहे। धेनुः। सरस्व
ती। अश्विना। इंद्राय। भेषजम्। शुक्रम्। न। ज्योतिः। इंद्रियम्। पयः॥३१॥ सुपे
शसेतिसुऽपेशसा। उषे इत्युषे। नक्तम्। दिवा। अश्विना। सम्। अंजाते इत्यं
जाते। सरस्वत्या। त्विषिम्। इंद्रे। न। भेषजम्। श्येनः। न। रजसा। हृदा। श्रि
या। न। मासरम्। पयः॥३२॥ दैव्या। होतारा। भिषजा। अश्विना। इंद्रं। न।

जागृवि। दिवा। नक्तम्। न। भेषजैः। शूषम्। सरस्वती। भिषक्। सीसेन। दुहे। इंद्रि
यम्। पयः॥३३॥ तिस्रः। देवीः। न। भेषजम्। त्रयः। त्रिधातव इति त्रिऽधातवः।
अपसः। रूपम्। इंद्रे। हिरण्ययम्। अश्विना। इडा। न। भारती। वाचा। सरस्व
ती। महः। इंद्राय। दुहे। इंद्रियम्। पयः॥३४॥ सुरेतसमिति सुऽरेतसम्। ऋषभ
म्। नर्यापसमिति नर्यऽअपसम्। त्वष्टारम्। इंद्रम्। अश्विना। भिषजम्। न।
सरस्वतीम्। ओजः। न। जूतिः। इंद्रियम्। वृकः। न। रभसः। भिषक्। यशः। सु
रया। भेषजम्। श्रिया। न। मासरम्। पयः॥३५॥ वनस्पतिम्। शमितारम्।

शातक्रतुमितिशात॰क्रतुम्।भीमम्।न।मन्युम्।राजानम्।व्याघ्रम्।नमसा।अ
श्विना।भामम्।सरस्वती।भिषक्।इंद्राय।दुहे॥इंद्रियम्।पयः॥३६॥अग्नि
म्।स्वाहा।आज्यस्य।स्तोकानाम्।मेदसाम्।पृथक्।छागम्।अश्विभ्यामि
त्यश्वि॰भ्याम्।मेषम्।सरस्वत्यै।ऋषभम्।इंद्राय।सिंहाय।सहसे।इंद्रिय
म्।अग्निम्।न।भेषम्।सोमम्।इंद्रियम्।इंद्रम्।सुत्रामाणमितिसु॰त्रामाणं
सवितारम्।वरुणम्।भिषजाम्।पतिम्।वनस्पतिम्।प्रियम्।पाथः।न।भेष
जम्।देवाः।आज्यपा।इत्याज्य॰पाः।जुषाणः।अग्निः।भेषजम्।पयः।सोमः

परिस्रुतेतिपरि॰स्रुता।घृतम्।मधु।व्यंतु।आज्यस्य।होतः।यज॥३७॥७॥अश्वि
नौ।छागस्य।वपायाः।मेदसः।जुषताम्।हविः।होतः।यज।सरस्वतीम्।मेष
स्य।वपायाः।मेदसः।जुषताम्।हविः।होतः।यज॥इंद्रं।ऋषभस्य।वपाया।
मेदसः।जुषताम्।हविः।होतः।जेये॥३८॥अश्विनौ।सरस्वतीम्।इंद्रं।सुत्रा
माणमितिसु॰त्रामाणम्।इमे।सोमाः।सुरामाणः।छागैः।न।मेषैः।ऋषभैः।
सुताः।शष्पैः।न।तोक्मभिरिति।तोक्म॰भिः।लाजैः।महस्वंतः।मदाः।मास
रेण।परिष्कृताः।परिस्रुता।इतिपरि॰स्रुताः।शुक्राः।पयस्वंतः।अमृताः

॥ पू ॥
॥ ३२ ॥

प्रस्थिताऽइतिप्रऽस्थिताः । वः । मधुश्च्युतऽइतिमधुऽश्च्युतः । तान् । अश्विना
सरस्वती । इंद्रः । सुत्रामेतिसुऽत्रामा । वृत्रहेतिवृत्रऽहा । जुषंताम् । सोम्यम्
मधु । पिबंतु । मदंतु । व्यंतु । होतः । यज ॥ ३९ ॥ अश्विनौ । छागस्य । हविषः
आत्ताम् । अद्य । मध्यतः । मेदः । उद्भृतमित्युत्ऽभृतम् । पुरा । द्वेषोभ्यऽइति
द्वेषःऽभ्यः । पुरा । पौरुषेय्याः । गृभः । घस्ताम् । नूनम् । घासेअज्राणामिति
घासेऽअज्राणाम् । यवसप्रथमानामितियवसऽप्रथमानाम् । सुमत्क्षरा
णामितिसुमत्ऽक्षराणाम् । शतरुद्रियाणामितिशतऽरुद्रियाणाम् । अग्निष्वा

ति

॥ रा ॥
॥ ३२ ॥

त्तानाम् । अग्निष्वात्तानामित्यग्निऽस्वात्तानाम् । पीवोपवसनानामितिपीवःऽउप
वसनानाम् । पार्श्वतः । श्रोणितः । शितामतः । उत्सादतऽइत्युत्ऽसादतः । अंगा
दंगादित्यंगात्ऽअंगात् । अवत्तानाम् । करतः । एव । अश्विना । जुषेताम् । हविः
होतः । यज ॥ सरस्वतीम् । मेषस्य । हविषः । आवयत् । घसत् । करत् । एवम् । देवी । सर
स्वती । जुषताम् । हविः । होतः । यज ॥ इंद्रम् । ऋषभस्य ॥ हविषः । आवयत् । घसत्
करत् । एवम् । इंद्रः । जुषताम् । हविः । होतः । यज ॥ ४० ॥ वनस्पतिम् । अभि । हि
पिष्टतमयेतिपिष्टऽतमया । रभिष्ठया । रशनया । अधित । यत्र । अश्विनोः ।

छागस्य। हविषः। प्रिया। धामानि। सरस्वत्याः। मेषस्य। इंद्रस्य। ऋषभस्य। अग्नेः।
सोमस्य। इंद्रस्य। सुत्राम्णः इति सुऽत्राम्णः। सवितुः। वरुणस्य। वनस्पतेः। प्रिया।
पाथांसि। देवानाम्। आज्यपानाम् इत्याज्यऽपानाम्। यत्र। अग्नेः। होतुः। प्रिया।
धामानि। तत्र। एतान्। प्रस्तुत्येवेति प्रस्तुत्यऽइव। उपस्तुत्येवेत्युपस्तुत्यऽइव।
उपावस्रक्षत् इत्युपऽअवस्रक्षत्। रभीयसऽइवेति रभीयसःऽइव। कृत्वी। करत्।
एवम्। देवः। वनस्पतिः। जुषताम्। हविः। होतः। यज॥ ४१॥ अग्निम्। स्विष्टकृ-
तमिति स्विष्टऽकृतम्। अयाट्। अग्निः। यक्षत्। स्वम्। महिमानम्। आ। यजतां।

एज्याः इत्याऽइज्याः। इषः। वृणोतु। सः। अध्वरा। जातवेदाः इति जातऽवेदाः। जु-
षताम्। हविः। होतः। यज॥ ४२॥ ७॥ देवम्। बर्हिः। सरस्वती। सुदेवमिति सुऽ-
देवम्। इंद्रे। अश्विना। तेजः। न। चक्षुः। अक्ष्योः। बर्हिषा। दधुः। इंद्रियम्। वसु-
वन इति वसुऽवने। वसुधेयस्येति वसुऽधेयस्य। व्यंतु। यज॥ ४३॥ देवीः।
द्वारः। अश्विना। भिषजा। इंद्रे। सरस्वती। प्राणम्। न। वीर्य्यम्। नसि। द्वारः।
दधुः। इंद्रियम्। वसुवन इति वसुऽवने॥ ४४॥ देवी इति देवी। उषासा। उष-
साऽइत्युषसा। अश्विना। सुत्रामेति सुऽत्रामा। इंद्रे। सरस्वती। बलम्। न। वा-

चम्। आस्ये। उपाभ्याम्। दधुः। इंद्रियम्। वसुवनइतिवसुऽवने॥४५॥ देवीइतिदे
वी। जोष्ट्रीइतिजोष्ट्री। सरस्वती। अश्विना। इंद्रम्। अवर्द्धयन्। श्रोत्रम्। न। कर्ण
योः। यशः। जोष्ट्रीभ्याम्। दधुः। इंद्रियम्। वसुवनइतिवसुऽवने॥४६॥ देवीइति
देवी। ऊर्जाहुतीइत्यूर्जाऽआहुती। दुघेइतिदुघे। सुदुघेतिसुऽदुघा। इंद्रे। सरस्व
ती। अश्विना। भिषजा। अवतः। शुक्रम्। न। ज्योतिः। स्तनयोः। न। आहुतीइत्या
हुती। धत्तः। इंद्रियम्। वसुवनइतिवसुऽवने॥४७॥ देवा। देवानाम्। भिषजा।
होतारौ। इंद्रम्। अश्विना। वषट्कारैरितिवषट्ऽकारैः। सरस्वती। त्विषिम्। न।

हृदये। मतिम्। होतृभ्यामितिहोतृऽभ्याम्। दधुः। इंद्रियम्। वसुवनइतिवसुऽव
ने॥४८॥ देवीः। तिस्रः। तिस्रः। देवीः। अश्विना। इडा। सरस्वती। शूषम्। न।
मध्ये। नाभ्याम्। इंद्राय। दधुः। इंद्रियम्। वसुवनइतिवसुऽवने॥४९॥ देवः। इंद्रः।
नराशंसः। त्रिवरूथइतित्रिऽवरूथः। सरस्वत्या। अश्विभ्यामित्यश्विऽभ्यां
ईयते। रथः। रेतः। न। रूपम्। अमृतम्। जनित्रम्। इंद्राय। त्वष्टा। दधत्। इंद्रा
णि। वसुवनइतिवसुऽवने॥५०॥ देवः। देवैः। वनस्पतिः। हिरण्यपर्णइतिहि
रण्यऽपर्णः। अश्विभ्यामित्यश्विऽभ्याम्। सरस्वत्या। सुपिप्पलइतिसुऽ

प.
३६

पिप्पलः। इंद्राय। पच्यंते। मधु। ऊजः। न। ऊतिः। ऋषभः। न। भामम्। वनस्पतिः।
नः। दधत्। इंद्रियाणि। वसुवन इति वसुऽवने॥५१॥ देवम्। बर्हिः। वारितीनाम्।
अध्वरे। स्तीर्णम्। अश्विभ्यामित्यश्विऽभ्याम्। ऊर्णम्रदा इत्यूर्णऽम्रदाः। सरस्व
त्याः। स्योनम्। इंद्र। ते। सदः। ईशायै। मन्युम्। राजानम्। बर्हिषा। दधुः। इंद्रियम्।
वसुवन इति वसुऽवने॥५२॥ देवः। अग्निः। स्विष्टकृदिति स्विष्टऽकृत्। देवा
न्। यक्षत्। यथायथमिति यथाऽयथम्। होतारौ। इंद्रम्। अश्विना। वाचा।
वाचम्। सरस्वतीम्। अग्निम्। सोमम्। स्विष्टकृदिति स्विष्टऽकृत्। स्विष्ट

राम
३६

इति सुऽइष्टः। इंद्रः। सुत्रामेति सुऽत्रामा। सविता। वरुणः। भिषक्। इष्टः। देवः।
वनस्पतिः। स्विष्टा इति सुऽइष्टाः। देवाः। आज्यपा इत्याज्यऽपाः। स्विष्ट इ
ति सुऽइष्टः। अग्निः। अग्निना। होता। होत्रे। स्विष्टकृदिति स्विष्टऽकृत्। य
शः। न। दधत्। इंद्रियम्। ऊर्जम्। अपचितिमित्यपऽचितिम्। स्वधाम्। व
सुवन इति वसुऽवने। वसुधेयस्येति वसुऽधेयस्य। व्यंतु। यज॥५३॥ अ
ग्निम्। अद्य। होतारम्। अवृणीत। अयम्। यजमानः। पचन्। पक्तीः। प
चन्। पुरोडाशान्। बध्नन्। अश्विभ्यामित्यश्विऽभ्याम्। छागम्। सरस्व

पू॰ ॥
॥ ३७ ॥

स्यै। भिषम्। इंद्राय। ऋषभम्। सुन्वन्। अश्विभ्यामित्यश्वि॰भ्याम्। सरस्वत्यै। इं
द्राय। सुत्राम्ण इति सु॰त्राम्णे। सुरासोमानिति सुरा॰सोमान्॥ ५४॥ सूपस्था
इति सु॰उपस्थाः। अद्य। देवः। वनस्पतिः। अभवत्। अश्विभ्यामित्यश्वि॰
भ्याम्। छागेन। सरस्वत्यै। भिषेण। इंद्राय। ऋषभेण। अक्षन्। तान्। मेदस्तः।
प्रति। पचत। अगृभीषत। अवीवृधंत। पुरोडाशैः। अपुः। अश्विना। सर
स्वती। इंद्रः। सुत्रामेति सु॰त्रामा। सुरासोमानिति सुरा॰सोमान्॥ ५५॥ त्वाम्।
अद्य। ऋषे। आर्षेय। ऋषीणाम्। नपात्। अवृणीत। अयम्। यजमानः।

॥ रा॰ ॥
॥ ३७

बहुभ्य इति बहु॰भ्यः। आ। संगतेभ्य इति सम्॰गतेभ्यः। एषः। मे। देवेषु। वसु। वारि।
आ। यक्ष्यते। इति। ता। या। देवाः। देव। दानानि। अदुः। तानि। अस्मै। आ। च। शा
स्व। आ। च। गुरस्व। इषितः। च। होतः। असि। भद्रवाच्यायेति भद्र॰वाच्याय।
प्रेषित इति प्र॰इषितः। मानुषः। सूक्तवाकायेति सूक्त॰वाकाय। सूक्तेति सु॰उ
क्ता। ब्रूहि॥ ५६॥ छ॥ छ॥ इति शुक्लयजुः काण्वसंहितायां पदपाठे त्रयोविंश
तिमोध्यायः॥ २३॥ छ॥ छ॥ हरिः॰ओम्॥ तेजः। असि। शुक्रम्। अमृतम्।
आयुष्पाः। आयुः पा इत्यायुः॰पाः। आयुः। मे। पाहि। आ। इंद्रे॥ १॥ इमाम्

॥३८॥

अगृभ्णन्।रश्मानाम्।ऋतस्य।पूर्वी।आयुषि।विदथेषु।कव्या।सा।नः।अस्मिन्।
सुते।आ।बभूव।ऋतस्य।सामन्।सरम्।आरपंतीस्याऽरपंती॥२॥अभिधाइ
त्यभिऽधाः।असि।भुवनम्।यंता।धर्ता।सः।त्वम्।अग्निम्।वैश्वानरम्।सप्रथ
समितिसऽप्रथसम्।गछ।स्वाहाकृतइतिस्वाहाऽकृतः।स्वगेतिस्वऽगा।त्वा।
देवेभ्यः॥३॥प्रजापतयइतिप्रजाऽपतये।ब्रह्मन्।अश्वम्।भंत्स्यामि।देवे
भ्यः।प्रजापतयइतिप्रजाऽपतये।तेन।राध्यासम्।तम्।बधान।देवेभ्यः।
प्रजापतयइतिप्रजाऽपतये।तेन।राधुहि।प्रजापतयइतिप्रजाऽपतये।त्वा।

॥३८॥

जुष्टम्।प्र।उक्षामि।इंद्राग्निभ्यामितींद्राग्निऽभ्याम्।वायवे।विश्वेभ्यः।स
र्वेभ्यः।त्वा।देवेभ्यः।जुष्टम्।प्र।उक्षामि।[illegible]॥४॥यः।अर्वंतम्।जिघांस
ति।तम्।अभि।अमीति।वरुणः।परः।मर्तः।परः।श्वा॥५॥६॥अग्नये।
स्वाहा।सोमाय।अपाम्।मोदाय।सवित्रे।वायवे।विष्णवे।इंद्राय।बृहस्प
तये।मित्राय।वरुणाय॥६॥हिंकारायेतिहिम्ऽकाराय।हिंकृतायेतिहि
म्ऽकृताय।क्रंदते।अवक्रंदायेत्यवऽक्रंदाय।प्रोथते।प्रप्रोथायेतिप्रऽप्रो
थाय।गंधाय।घ्राताय॥७॥निविष्टायेतिनिऽविष्टाय।उपविष्टायेत्य

॥ पू० ॥
॥ ३९ ॥

पविष्टाय। संहितायेति सम्ऽहिताय। वल्गते। आसीनाय। शयानाय। स्वपते। जाग्रते॥ ८॥ कूजते। प्रबुद्धायेति प्रऽबुद्धाय। विजृम्भमाणायेति विऽजृम्भमाणाय। विचृत्तायेति विऽचृत्ताय। संहानायेति सम्ऽहानाय। उपस्थितायेत्युप ऽस्थिताय। आयनायेत्याऽअयनाय। प्रायणाय। प्रायनायेति प्रऽअयनाय॥ ९॥ यते। धावते। उद्द्रावायेत्युत्ऽद्रावाय। उद्द्रुतायेत्युत्ऽद्रुताय। शूकाराय। शूकृताय। निषण्णाय॥ निसन्नायेति निऽसन्नाय। उत्थिताय॥ १०॥ जवाय। बलाय। विवर्तमानायेति विऽवर्तमान। विवृत्तायेति विऽवृत्ताय।

॥ राम ॥
॥ ३९ ॥

॥ ११ ॥

विधून्वानायेति विऽधून्वानाय। विधूतायेति विधूताय। शुश्रूषमाणाय। शृण्वते। ईक्षमाणाय। ईक्षिताय। वीक्षितायेति विऽईक्षिताय। निमेषायेति निऽमेषाय। यत्। अत्ति। तस्मै। पिबति। मूत्रम्। करोति। कुर्वते। कृताय॥ १२॥ छ॥ तत्सवितुः ७ हिरण्यपाणिमिति हिरण्यऽपाणिम्। ऊतये। सवितारम्। उप। ह्वये। सः। चेत्ता। देवता। पदम्॥ १३॥ देवस्य। चेततः। महीम्। प्र। सवितुः। हवामहे। सुमतिमिति सुऽमतिम्। सत्यराधसमिति सत्यऽराधसम्॥ १४॥ सुष्टुतिम्। सुस्तुतिमिति सुऽस्तुतिम्। सुमतीवृधः। सुमतिवृध इति सुमतिऽवृधः। रातिम्।

॥४०॥

सवितुः। ईमहे। प्र। देवाय। मती। विदे। मतिविद इति मतिऽविदे ॥१५॥ रातिम्। स
त्पतिमिति सत्ऽपतिम्। महे। सवितारम्। उप। ह्वये। आसवमित्याऽसवम्। देव
वीतय इति देवऽवीतये ॥१६॥ देवस्य। सवितुः। मतिम्। आसवमित्याऽसवम्।
विश्वदेव्यमिति विश्वऽदेव्यम्। धिया। भगम्। मनामहे ॥१७॥ अग्निम्। स्तो
मेन। बोधय। समिधान इति सम्ऽइधानः। अमर्त्यम्। हव्या। देवेषु। नः। दध
त् ॥१८॥ सः। हव्यवाळिति हव्यऽवाट्। अमर्त्यः। उशिक्। दूतः। चनोहित इति

चनःऽहितः। अग्निः। धिया। सम्। ऋण्वति ॥१९॥ नम्। त्वा। घृतस्नो इति घृतऽ
स्नो। ईमहे। चित्रभानो इति चित्रऽभानो। स्वर्विदमिति स्वःऽविदम्। देवान्।
आ। वीतये। वह ॥२०॥ अग्निम्। दूतम्। पुरः। दधे। हव्यवाहमिति हव्यऽवा
हम्। उप। ब्रुवे। देवान्। आ। सादयात्। इह ॥२१॥ अजीजनः। हि। पवमा
न। सूर्यम्। विधार इति विऽधारे। पाकमना। पयः। गोजीरयेति गोऽजीर
या। रंहमाणः। पुरंध्येति पुरम्ऽध्या ॥२२॥ विभूरिति विऽभूः। मात्रा। प्र

पू॰
४१

भूरितिप्र॰भूः।पित्रा।अश्वः।असि।हयः।अत्यः।मयः।अर्वा।सप्तिः।वाजी।
वृषा।नृमणाः।नृमना इति नृ॰मनाः।ययुः।शिशुः।नाम।असि।आदित्या
नाम्।पत्वा।अनु।इहि।।२३।।देवाः।आशापालाइत्याशा॰पालाः।एतम्
देवेभ्यः।अश्वम्।मेधाय।प्रोक्षितमितिप्र॰उक्षितम्।रक्षत।।२४।।इह।
रंतिः।इह।रमताम्।इह।धृतिः।इह।स्वधृतिरितिस्व॰धृतिः।स्वाहा।।
२५।।काय।कस्मै।कतमस्मै।आधिमित्या॰धिम्।आधीतायेत्या॰धीता

रा
४१

य।मनः।प्रजापतयइतिप्रजा॰पतये।चित्तम्।विज्ञातायेतिवि॰ज्ञाताय।।
२६।।अदित्यै।मह्यै।सुमृळीकायाइतिसुमृ॰ळीकायै।सरस्वत्यै।पावकायै।
बृहत्यै।।२७।।पूष्णे।प्रपथ्यायेतिप्र॰पथ्याय।नरंधिषाय।त्वष्ट्रे।तुरीपाय।
पुरुरूपायेतिपुरु॰रूपाय।विष्णवे।निभूयपायेतिनिभूय॰पाय।शिपिवि
ष्टायेतिशिपि॰विष्टाय।।२८।।१।।आ।ब्रह्मन्।ब्राह्मणः।ब्रह्मवर्चसीति
ब्रह्म॰वर्चसी।जायताम्।आ।राष्ट्रे।राजन्यः।शूरः।इषव्यः।अतिव्याधी

स्वतिऽव्याधी। महारथ इति महाऽरथः। जायताम्॥२९॥ दोग्ध्री। धेनुः। वो
ळ्हा। अनड्वान्। आशुः। सप्तिः। पुरंधिरिति पुरम्ऽधिः। योषा। जिष्णुः। रथेष्ठाः।
रथेस्था इति रथेऽस्थाः। सभेयः। युवा। आ। अस्य। यजमानस्य। वीरः। जाय
ताम्॥३०॥ निकामेनिकाम इति निकामेऽनिकामे। नः। पर्जन्यः। वर्षतु। फल
वत्य इति फलऽवत्यः। नः। ओषधयः। पच्यन्ताम्। योगक्षेम इति योगऽक्षेमः।
नः। कल्पताम्॥३१॥ प्राणाय। अपानायेत्यपऽआनाय। व्यानायेति विऽ

आनाय। चक्षुषे। श्रोत्राय। वाचे। मनसे॥३२॥ प्राच्यै। दिशे। अर्वाच्यै। दक्षि
णायै। प्रतीच्यै। उदीच्यै। ऊर्ध्वायै। अवाच्यै। अर्वाच्यै। दिशे॥३३॥ अद्भ्य
इत्यप्ऽभ्यः। वार्भ्य इति वाःऽभ्यः। उदकाय। तिष्ठंतीभ्यः। स्रवंतीभ्यः। स्यं
दमानाभ्यः। कूप्याभ्यः। सूद्याभ्यः। धार्याभ्यः। अर्णवाय। समुद्राय। सरि
राय॥३४॥ वाताय। धूमाय। अभ्राय। मेघाय। विद्योतमानायेति वि
द्योतमानाय। स्तनयते। अवस्फूर्जत इत्यवऽस्फूर्जते। वर्षते। अवर्षत इ

स्रवऽवर्षते। उग्यम्। घृणिग्रम्। उद्धन्वतऽस्तनऽगृण्हते। उद्गृहीतायेस्तऽग्र
हीताय। दृश्नते। घृणिकायते। पृष्वाभ्यः। ह्रादुनीभ्यः। नीहाराय॥ ३५॥ अग्न
ये। सोमाय। इंद्राय। पृथिव्यै। अंतरिक्षाय। दिवे। दिग्भ्यइतिदिक्ऽभ्यः।
आशाभ्यः। उर्व्यै। अर्वाच्यै। दिशे॥ ३६॥ नक्षत्रेभ्यः। नक्षत्रियेभ्यः। अ
होरात्रेभ्यः। अर्द्धमासेभ्येऽस्यर्द्धऽमासेभ्यः। मासेभ्यः। ऋतुभ्यऽस्यतुऽभ्यः
आर्तवेभ्यः। संवत्सराय। द्यावापृथिवीभ्याम्॥ ३७॥ चंद्राय। सूर्याय। रश्मि

भ्यइतिरश्मिऽभ्यः। वसुभ्यइतिवसुऽभ्यः। रुद्रेभ्यः। आदित्येभ्यः। मरुद्भ्य
इतिमरुत्ऽभ्यः। विश्वेभ्यः। देवेभ्यः॥ ३८॥ मूलेभ्यः। शाखाभ्यः। वनस्प
तिभ्यइतिवनस्पतिऽभ्यः। पुष्पेभ्यः। फलेभ्यः। ओषधीभ्यः॥ ३९॥ पृथिव्यै
अंतरिक्षाय। दिवे। सूर्याय। चंद्राय। नक्षत्रेभ्यः। अप्सुइत्सत्ऽभ्यः। ओ
षधीभ्यः। वनस्पतिभ्यइतिवनस्पतिऽभ्यः। परिप्लवेभ्यइतिपरिप्लवे
भ्यः। चराचरेभ्यः। सरीसृपेभ्यइतिसरीसृऽपेभ्यः। सवे। विभुवइतिवि

ऐं। वसवे

भुवे। विवस्वते। गणश्रिय इति गणऽश्रिये। गणपतय इति गणऽपतये। अभिभु
य इत्यभिऽभुवे। अधिपतय इत्यधिऽपतये॥ ४०॥ भूषाय। सꣳसर्पायेति सम्ऽ
सर्पाय। चंद्राय। ज्योतिषे। मलिम्लुचाय। दिवा। पतयते॥ ४१॥ मधवे। माध
वाय। शुक्राय। शुचये। नभसे। नभस्याय। इषाय। ऊर्जाय। सहसे। सहस्याय।
तपसे। तपस्याय। अꣳहसस्पतय इत्यꣳहसःऽपतये॥ ४२॥ वाजाय। प्रस
सवायेति प्रऽसवाय। अपिजाय इत्यपिऽजाय। क्रतवे। स्वः। मूर्ध्ने। व्यश्नुविन इ
अꣳहसस्पतये

ति विऽअश्नुविने। आंत्याय। आंत्यायनायेत्यांत्यऽआयनाय। भौवनाय। भुव
नस्य। पतये। अधिपतय इत्यधिऽपतये। प्रजापतय इति प्रजाऽपतये॥ ४३॥
आयुः। यज्ञेन। कल्पताम्। प्राणः। अपान इत्यपऽआनः। व्यान इति विऽआनः।
उदान इत्युत्ऽआनः। समान इति समऽआनः। चक्षुः। श्रोत्रम्। वाक्। मनः।
आत्मा। पृष्ठम्। ब्रह्मा। यज्ञः। ज्योतिः। स्वः। यज्ञेन। कल्पताम्॥ ४४॥ एक
स्मै। द्वाभ्याम्। शताय। एकशतायेत्येकऽशताय। व्युष्ट्या इति विऽउष्ट्यै। स्व

गयेतिस्वः ऽगाय। स्वाहा॥ ४५॥ ७॥ ७॥ इतिशुक्लयजुः काण्वसंहितायांपद
पाठेचतुर्विंशतिमोध्यायः॥ २४॥ ७॥ हरिः ॐ॥ हिरण्यगर्भः सम्॥ प्रजा
पतयइतिप्रजाऽपतये। त्वा। जुष्टम्। गृह्णामि। एषः। ते। योनिः। सूर्यः। ते। महि
मा। यः। ते। अहन्। संवत्सरे। महिमा। संबभूवेतिसम्ऽबभूव। वायौ। अंतरिक्षे।
दिवि। सूर्ये। तस्मै। ते। महिम्ने। प्रजापतयइतिप्रजाऽपतये। स्वाहा। देवेभ्यः।
१। यः। प्राणतः। निमिषतइतिनिऽमिषतः। महित्वेतिमहिऽत्वा। एकः। इत्।

राजा। जगतः। बभूव। यः। ईशे। अस्य। द्विपदइतिद्विऽपदः। चतुष्पदः। चतुःपदइ
तिचतुःऽपदः। कस्मै। देवाय। हविषा। विधेम॥ २॥ चंद्रमाः। ते। महिमा। यः। ते। रा
त्रौ। संवत्सरे। महिमा। संबभूवेतिसम्ऽबभूव। पृथिव्याम्। अग्नौ। नक्षत्रेषु। चंद्रम
सि। तस्मै। ते। महिम्ने। प्रजापतयइतिप्रजाऽपतये। देवेभ्यः। स्वाहा॥ ३॥ युंजंति।
ब्रध्नम्। अरुषम्। चरंतम्। परि। तस्थुषः। रोचंते। रोचना। दिवि॥ ४॥ युंजंति।
अस्य। काम्या। हरीइतिहरी। विपक्षसेतिविऽपक्षसा। रथे। शोणा। धृष्णूइति

॥प॥
॥४६॥

धृष्णु । स्वाहेसेतिन्ऽस्वाहेसा ॥५॥ यत् । वातः । अपः । अगनीगन् । प्रिया
म् । इंद्रस्य । तन्वम् । एतम् । स्तोतः । अनेन । पथा । पुनः । अश्वम् । आ । वर्तया
सि । नः ॥६॥ वसवः । त्वा । अंजंतु । गायत्रेण । छंदसा । रुद्राः । त्रैष्टुभेन । त्रै
ष्टुभेनेति त्रैष्टुऽभेन । आदित्याः । जागतेन ॥७॥ भूः । भुवः । स्वः । लाजीन्
शाचीन् । यव्ये । गव्ये । एतत् । अन्नम् । अत्त । देवाः । एतत् । अन्नम् । अद्धि ।
प्रजापत इति प्रजाऽपते ॥८॥ कः । स्वित् । एकाकी । चरति । कः । उइत्युँ ।

॥रा॥
॥४६॥

स्वित् । जायते । पुनरिति पुनः । किम् । स्वित् । हिमस्य । भेषजम् । किम् । उइत्युँ ।
आवपनमित्याऽवपनम् । महत् ॥९॥ सूर्य्यः । एकाकी । चरति । चंद्रमाः । जा
यते । पुनरिति पुनः । अग्निः । हिमस्य । भेषजम् । भूमिः । आवपनमित्याऽ
वपनम् । महत् ॥१०॥ का । स्वित् । आसीत् । पूर्वचित्तिरिति पूर्वऽचित्तिः । कि
म् । स्वित् । आसीत् । बृहत् । वयः । का । स्वित् । आसीत् । पिलिप्पिला । का ।
स्वित् । आसीत् । पिशंगिला ॥११॥ द्यौः । आसीत् । पूर्वचित्तिरिति पूर्वऽ

॥प॥
॥४७॥

चित्तिः। अश्वः। आसीत्। बृहत्। वयः। अविः। आसीत्। पिलिप्पिला। रात्रिः।
आसीत्। पिशंगिला॥१२॥ वायुः। त्वा। पचतैः। अवतु। असितग्रीव इत्य
सितऽग्रीवः। छागैः। न्यग्रोधः। चमसैः। शल्मलिः। वृद्ध्या॥१३॥ एषः। स्यः।
राथ्यः। वृषा। पड्भिरिति पड्ऽभिः। चतुर्भिरिति चतुःऽभिः। आ। इत्। अग
न्। ब्रह्मा। अकृष्णः। च। नः। अवतु। नमः। अग्नये॥१४॥ संशित इति
सम्ऽशितः। रश्मिना। रथः। संशित इति सम्ऽशितः। रश्मिना। हयः।

॥रा॥
॥४७॥

संशित इति सम्ऽशितः। अप्सुज इत्यप्सुऽजाः। ब्रह्मा। सो
मपुरोगव इति सोमऽपुरोगवः॥१५॥ स्वयम्। वाजिन्। तन्वम्। कल्पयस्व।
स्वयम्। यजस्व। स्वयम्। जुषस्व। महिमा। ते। अन्येन। न। संनश इति सम्ऽ
नशे॥१६॥ न। वै। ऊँ इति। एतत्। म्रियसे। न। रिष्यसि। देवान्। इत्। एषि। प
थिभिरिति पथिऽभिः। सुगेभिरिति सुऽगेभिः। यत्र। आसते। सुकृत इति
सुऽकृतः। यत्र। ते। ययुः। तत्र। त्वा। देवः। सविता। दधातु॥१७॥ अग्निः।

प॰ ॥ ५८ ॥

पशुः। आसीत्। तेन। अयजंत। सः। एतम्। लोकम्। अजयत्। यस्मिन्।
अग्निः। सः। ते। लोकः। भविष्यति। तम्। जेष्यसि। पिब। एताः। अपः। वा
युः। सूर्यः॥१८॥७॥ अंबे। अंबिके। अंबालिके। न। मा। नयति। कः। चन।
ससस्ति। अश्वकः। सुभद्रिकामिति सुऽभद्रिकाम्। कांपीलवासिनीमि
ति कांपीलऽवासिनीम्॥१९॥ गणानाम्। त्वा। गणपतिमिति गणऽप
तिम्। हवामहे। प्रियाणाम्। प्रियपतिमिति प्रियऽपतिम्। निधीनामिति

॥ रा॰ ॥ ५८ ॥

निऽधीनाम्। निधिपतिमिति निधिऽपतिम्। हवामहे। वसो इति वसो। मम॥
२०॥ आ। अहम्। अजानि। गर्भधमिति गर्भऽधम्। आ। त्वम्। अजासि। गर्भ
धमिति गर्भऽधम्। तौ। उभौ। चतुरः। पदः। संप्रसारयावेति सम्ऽप्रसारया
व। स्वर्गे इति स्वःऽगे। लोके। प्र। ऊर्णुवाथाम्। वृषा। वाजी। रेतोधा इति रेतःऽधाः।
रेतः। दधातु॥२१॥ उत्सक्थ्या इत्युत्ऽसक्थ्याः। अव। गुदम्। धेहि। सम्। अं
जिम्। चारय। वृषन्। यः। स्त्रीणाम्। जीवभोजन इति जीवऽभोजनः॥२२॥

॥ पु॰ ॥
॥ ४१ ॥

यका। असकौ। पाकुंतिका। आहलक्। इति। वंचति। आ। हंति। गभे। पसः। नि।
गल्गलीति। धारका॥ २३॥ यकः। असकौ। पाकुंतकः। आहलक्। इति। वंचति।
विवक्षतइवेतिविवक्षतःऽइव। ते। मुखम्। अध्वर्यो इत्यध्वर्यो। मा। नः। त्वम्।
अभि। भाषथाः॥ २४॥ माता। च। ते। पिता। च। ते। अग्रम्। वृक्षस्य। रोहतः।
प्रतिलामि। इति। ते। पिता। गभे। मुष्टिम्। अतंसयत्॥ २५॥ माता। च। ते।
पिता। च। ते। अग्रे। वृक्षस्य। क्रीळतः। विवक्षतइवेतिविवक्षतःऽइव। ते। मु

॥ रा॰ ॥
॥ ४९ ॥

खम्। ब्रह्मन्। मा। त्वम्। वदः। बहु॥ २६॥ ऊर्ध्वाम्। एनाम्। उत्। श्रापय। गिरौ। भारम्।
हरन्निवेतिहरन्ऽइव। अथ। अस्यै। मध्यम्। एधताम्। शीते। वाते। पुनन्निवेतिपु
नन्ऽइव॥ २७॥ ऊर्ध्वम्। एनम्। उत्। श्रयतात्। गिरौ। भारम्। हरन्निवेतिहरन्ऽ
इव। अथ। अस्य। मध्यम्। एजतु। शीते। वाते। पुनन्निवेतिपुनन्ऽइव॥ २८॥
यत्। अस्याः। अंहुभेद्या इत्यंहुऽभेद्याः। कृधु। स्थूलम्। उपातसदित्युपऽ
अतसत्। मुष्कौ। इत्। अस्याः। एजतः। गोशफे इति गोऽशफे। शकुलाविव

पं. ॥

॥ ५० ॥

तिप्राकुलेति । इवा ॥ २९ ॥ यत् । देवासः । ललामगुमिति ललामऽगुम् । प्र । विष्टीमिन
म् । आ । विषुः । सक्थ्ना । देदिश्यते । नारी । सत्यस्य । अक्षिभुव इत्यक्षिऽभुवः । यथा
॥ ३० ॥ यत् । हरिणः । यवम् । अत्ति । न । पुष्टम् । पशु । मन्यते । शूद्रा । यत् । अर्य्यजा
रेत्यर्यऽजारा । न । पोषाय । धनायति ॥ ३१ ॥ यत् । हरिणः । यवम् । अत्ति । न ।
पुष्टम् । बहु । मन्यते । शूद्रः । यत् । अर्यायै । जारः । न । पोषम् । अनु । मन्यते ॥ ३२ ॥
दधिक्राव्ण इति दधिऽक्राव्णः । अकारिषम् । जिष्णोः । अश्वस्य । वाजिनः । सु

॥ रा ॥
॥ ५० ॥

रभि । नः । मुखा । करत् । प्र । नः । आयूंषि । तारिषत् ॥ ३२ ॥ छ ॥ गायत्री । त्रिष्टुबिति
त्रिऽस्तुप् । जगती । अनुष्टुप् । अनुस्तुबित्यनुऽस्तुप् । पंक्त्या । सह । बृहती । उष्णिहा । क
कुप् । सूचीभिः । शम्यन्तु । त्वा ॥ ३३ ॥ द्विपदा इति द्विऽपदाः । याः । चतुष्पदाः । चतुःपद
इति चतुःऽपदाः । त्रिपदा इति त्रिऽपदाः । याः । च । षट्पदा इति षट्ऽपदाः । विछंदा इ
ति विऽछंदाः । याः । च । सछंदा इति सऽछंदाः । सूचीभिः । शम्यन्तु । त्वा ॥ ३४ ॥ महा
नाम्न्य इति महाऽनाम्न्यः । रेवत्यः । विश्वाः । आशाः । प्रभूवरीरिति प्रऽभूवरीः । मेघीः ।

त्रिष्टुप् १

॥ प.॥
॥ ५१॥

विद्युत इति विऽद्युतः। वाचः। सूचीभिः। शम्यंतु। त्वा॥ ३५॥ नार्यः। ते। पत्न्यः। लोम। वि।
चिन्वंतु। मनीषया। देवानाम्। पत्न्यः। दिशः। सूचीभिः। शम्यंतु। त्वा॥ ३६॥ रजताः। ह
रिणीः। सीसाः। युजः। युज्यंते। कर्मभिरिति कर्मऽभिः। अश्वस्य। वाजिनः। त्वचि।
सिमाः। शम्यंतु। शम्यंतीः॥ ३७॥ कः। त्वा। आ। छ्यति। कः। त्वा। वि। शास्ति। कः। ते।
गात्राणि। शम्यति। कः। ऊं इति। ते। शमिता। कविः॥ ३८॥ ऋतवः। ते। ऋतुथेत्यृतुऽथा।
पर्व। शमितारः। वि। शासतु। संवत्सरस्य। तेजसा। शमीभिः। शम्यंतु। त्वा॥ ३९॥

॥ रा॥
॥ ५१५

अर्द्धमासा इत्यर्द्धऽमासाः। परूंषि। ते। मासाः। आ। छ्यंतु। शम्यंतः। अहोरात्राणि।
मरुतः। विलिष्टमिति विऽलिष्टम्। सूदयंतु। ते॥ ४०॥ दैव्याः। अध्वर्यवः। त्वा।
आ। छ्यंतु। वि। च। शासतु। गात्राणि। पर्वशा इति पर्वऽशः। ते। सिमाः। कृ
ण्वंतु। शम्यंतीः॥ ४१॥ द्यौः। ते। पृथिवी। अंतरिक्षम्। वायुः। छिद्रम्। पृ
णातु। ते। सूर्यः। ते। नक्षत्रैः। सह। लोकम्। कृणोतु। साधुयेति साधुऽया।
४२॥ शम्। ते। परेभ्यः। गात्रेभ्यः। शम्। अस्तु। अवरेभ्यः। शम्। अस्थभ्यः

॥ प॰ ॥
॥ ५२ ॥

स्यस्थऽभ्यः। मज्जभ्य इति मज्जऽभ्यः। धाम। उरस्यं। अस्तु। तन्वे। तव॥ ४३॥
किम्। स्वित्। सूर्यसममिति सूर्यऽसमम्। ज्योतिः। किम्। समुद्रसममिति समु
द्रऽसमम्। सरः। किम्। स्वित्। पृथिव्यै। वर्षीयः। कस्य। मात्रा। न। विद्यते॥ ४४
ब्रह्म। सूर्यसममिति सूर्यऽसमम्। ज्योतिः। द्यौः। समुद्रसममिति समुद्रऽस
मम्। सरः। इंद्रः। पृथिव्यै। वर्षीयान्। गोः। तु। मात्रा। न। विद्यते॥ ४५॥ पृ
च्छामि। त्वा। चितये। देवसखेति देवऽसख। यदि। त्वम्। अत्र। मनसा। जगं

॥ रा ॥
॥ ५२ ॥

थ। येषु। विष्णुः। त्रिषु। पदेषु। एष्टइत्याऽइष्टः। तेषु। विश्वम्। भुवनम्। आ।
विवेश॥ ४६॥ अपि। तेषु। त्रिषु। पदेषु। अस्मि। येषु। विश्वम्। भुवनम्। आविवे
शेत्याऽविवेश। सद्यः। परि। एमि। पृथिवीम्। उत। द्याम्। एकेन। अंगेन।
दिवः। अस्य। पृष्ठम्॥ ४७॥ केषु। अंतः। पुरुषः। आ। विवेश।
कानि। अंतः। पुरुषे। अर्पितानि। एतत्। ब्रह्मन्। उप। वल्हाम
सि। त्वा। किम्। स्वित्। नः। प्रति। वोचासि। अत्र॥ ४८॥ पंच स्विति पं

प॰ ॥ ५३

चऽसु। अंतरित्यंतः। पुरुषः। आ। विवेश। तानि। अंतरित्यंतः। पुरुषे। अर्पिता
नि। एतत्। त्वा। अत्र। प्रतिमन्वान इति प्रतिऽमन्वानः। अस्मि। न। मायया। भव
सि। उत्तर इत्युत्ऽतरः। मत्॥४९॥ छ॥ का। ईम्। अरे। पिशंगिला। का। ईम्।
कुरुपिशंगिलेति कुरुऽपिशंगिला। कः। ईम्। आस्कंदमित्याऽस्कंदम्। अर्ष
ति। कः। ईम्। पंथाम्। वि। सर्पति॥५०॥ अजा। अरे। पिशंगिला। श्वावित्।
श्वविदिति श्वऽवित्। कुरुपिशंगिलेति कुरुऽपिशंगिला। शशः। आस्कंदमि

रा॰ ॥ ५३

त्याऽस्कंदम्। अर्षति। अहिः। पंथाम्। वि। सर्पति॥५१॥ कति। अस्य। विष्ठाः।
विस्था इति विऽस्थाः। कति। अक्षराणि। कति। होमासः। कतिधा। समिद्ध इति
सम्ऽइद्धः। यज्ञस्य। त्वा। विदथा। पृच्छम्। अत्र। कति। होतारः। ऋतुश इत्यृतुऽ
शः। यजंति॥५२॥ षट्। अस्य। विष्ठाः। विस्था इति विऽस्थाः। शतम्। अक्षरा
णि। अशीतिः। होमाः। समिध इति सम्ऽइधः। ह। तिस्रः। यज्ञस्य। ते। विद
था। प्र। ब्रवीमि। सप्त। होतारः। ऋतुश इत्यृतुऽशः। यजंति॥५३॥ कः। अ

॥प०॥
॥५४॥

स्य। विद्। भुवनस्य। नाभिम्। कः। द्यावापृथिवी इति द्यावापृथिवी। अंतरि
क्षम्। कः। सूर्यस्य। वेद। बृहतः। जनित्रम्। कः। वेद। चंद्रमसम्। यतोजा इ
ति यतःऽजाः॥ ५४॥ वेद। अहम्। अस्य। भुवनस्य। नाभिम्। वेद। द्यावापृ
थिवी इति द्यावापृथिवी। अंतरिक्षम्। वेद। सूर्यस्य। बृहतः। जनित्रम्।
अथो इत्यथो। वेद। चंद्रमसम्। यतोजा इति यतःऽजाः॥ ५५॥ पृच्छामि।
त्वा। परम्। अंतम्। पृथिव्याः। पृच्छामि। यत्र। भुवनस्य। नाभिः। पृच्छा

॥रा०॥
॥५५॥

मि। त्वा। वृष्णः। अश्वस्य। रेतः। पृच्छामि। वाचः। परमम्। व्योमेति विऽओम।
५६॥ इयम्। वेदिः। परः। अंतः। पृथिव्याः। अयम्। यज्ञः। भुवनस्य। नाभिः।
अयम्। सोमः। वृष्णः। अश्वस्य। रेतः। ब्रह्मा। अयम्। वाचः। परमम्। व्यो
मेति विऽओम॥ ५७॥ सुभूरिति सुऽभूः। स्वयंभूरिति स्वयम्ऽभूः। प्रथमः।
अंतः। महति। अर्णवे। दधे। ह। गर्भम्। ऋत्वियम्। यतः। जातः। प्रजाप
तिरिति प्रजाऽपतिः॥ ५८॥ होता। यक्षत्। प्रजापतिमिति प्रजाऽपतिम्।

सोमस्य। महिम्नः। जुषताम्। पिबतु। सोमम्। होतः। यज॥ ५९॥ छ॥ इति शु
क्लयजुः काण्वसंहितायां पदपाठे पंचविंशतितमोऽध्यायः॥ २५॥ छ॥ हरिःऽ
ॐ॥ अश्वः। तूपरः। गोमृग इति गोऽमृगः। ते। प्राजापत्या इति प्राजाऽ
पत्याः। कृष्णग्रीव इति कृष्णऽग्रीवः। आग्नेयः। रराटे। पुरस्तात्। सारस्वती।
मेषी। अधस्तात्। हन्वोः॥ १॥ आश्विनौ। अधोरामाविति अधःऽरामौ। बा
ह्वोः। सोमापौष्णः। श्यामः। नाभ्याम्। सौर्ययामौ। श्वेतः। च। कृष्णः। च। पा

र्श्वयोः॥ २॥ त्वाष्ट्रौ। लोमशसक्थाविति लोमशऽसक्थौ। सक्थ्योः। वायव्यः।
श्वेतः। पुच्छे। इन्द्राय। स्वपस्यायेति सुऽअपस्याय। वेहत्। वैष्णवः। वामनः। रो
हितः। धूम्ररोहित इति धूम्रऽरोहितः। कर्कन्धुरोहित इति कर्कन्धुऽरोहितः। ते
सौम्याः। बभ्रुः। अरुणबभ्रुरित्यरुणऽबभ्रुः। शुकबभ्रुरिति शुकऽबभ्रुः। ते
वारुणाः॥ ३॥ शितिरन्ध्र इति शितिऽरन्ध्रः। अन्यतःशितिरन्ध्र इत्यन्य
तःऽशितिरन्ध्रः। समन्तशितिरन्ध्र इति समन्तऽशितिरन्ध्रः। ते। सावित्राः।

॥प॰॥
॥५६॥

शितिबाहुरितिशितिऽबाहुः।अन्यतःशितिबाहुरित्यन्यतःऽशितिबाहुः।स
मंतशितिबाहुरितिसमंतऽशितिबाहुः।ते।बार्हस्पत्याः।पृषती।क्षुद्रपृष
तीतिक्षुद्रऽपृषती।स्थूलपृषतीतिस्थूलऽपृषती।ताः।मैत्रावरुण्यः।।४।।
शुद्धवालइतिशुद्धऽवालः।सर्वशुद्धवालइतिसर्वशुद्धऽवालः।मणिवाल
इतिमणिऽवालः।ते।आश्विनाः।श्येतः।श्येताक्षइतिश्येतऽअक्षः।अ
रुणः।ते।रुद्राय।पशुपतयइतिपशुऽपतये।कर्णाः।यामाः।।५।।अव

॥रा॰॥
॥५६॥

लिप्ताइत्यवऽलिप्ताः।रौद्राः।नभोरूपाइतिनभःऽरूपाः।पार्जन्याः।पृ
श्निः।तिरश्चीनपृश्निरितितिरश्चीनऽपृश्निः।ऊर्ध्वपृश्निरित्यूर्ध्वऽपृ
श्निः।ते।मारुताः।।६।।फल्गूः।लोहितोर्णीतिलोहितऽऊर्णी।पलक्षी।
ताः।सारस्वत्यः।प्लीहाकर्णइतिप्लीहाऽकर्णः।शुण्ठाकर्णइतिशुण्ठाऽकर्णः।
अध्यालोहकर्णइत्यध्यालोहऽकर्णः।ते।त्वाष्ट्राः।।७।।कृष्णग्रीवइतिकृ
ष्णऽग्रीवः।शितिकक्षइतिशितिऽकक्षः।अञ्जिसक्थइत्यञ्जिऽसक्थः।

॥ पु० ॥
॥ ५७ ॥

ते । ऐंद्राग्नाः । कृष्णांजिरिति कृष्णऽअंजिः । अल्पांजिरित्यल्पऽअंजिः । महां
जिरिति महाऽअंजिः । ते । उषस्याः ॥ ८ ॥ शिल्पाः । वैश्वदेव्य इति वैश्वऽदेव्यः ।
रोहिण्यः । त्र्यवय इति त्रिऽअवयः । वाचे । अविज्ञाता इत्यविऽज्ञाताः । अदि
त्यै । सरूपा इति सऽरूपाः । धात्रे । वत्सतर्यः । देवानाम् । पत्नीभ्यः ॥ ९ ॥ कृष्ण
ग्रीवा इति कृष्णऽग्रीवाः । आग्नेयाः । शितिभ्रव इति शितिऽभ्रवः । वसूना
म् । रोहिताः । रुद्राणाम् । श्वेताः । अवरोकिण इत्यवऽरोकिणः । आदित्याना

॥ रा० ॥
॥ ५७ ॥

म् । नभोरूपा इति नभःऽरूपाः । पार्जन्याः ॥ १० ॥ उन्नत इत्युत्ऽनतः । ऋषभः ।
वामनः । ते । ऐंद्रावैष्णवाः । उन्नत इत्युत्ऽनतः । शितिबाहुरिति शितिऽबाहुः ।
शितिपृष्ठ इति शितिऽपृष्ठः । ते । ऐंद्राबार्हस्पत्याः । शुकरूपा इति शुकऽरूपाः ।
वाजिनाः । कल्माषाः । आग्निमारुताः । श्यामाः । पौष्णाः ॥ ११ ॥ एताः । ऐंद्रा
ग्नाः । द्विरूपा इति द्विऽरूपाः । अग्नीषोमीयाः । वामनाः । अनड्वाहः । आग्ना
वैष्णवाः । वशाः । मैत्रावरुण्यः । अन्यतएन्य इत्यन्यतःऽएन्यः । मैत्र्यः ॥ १२ ॥

॥प०॥
॥५८॥

कृष्णग्रीवा इति कृष्णऽग्रीवाः। आग्नेयाः। बभ्रवः। सौम्याः। श्वेताः। वायव्याः। अ
विज्ञाता इत्यविऽज्ञाताः। अदित्यै। सरूपा इति सऽरूपाः। धात्रे। वत्सतर्यः। देवाना
म्। पत्नीभ्यः॥१३॥ कृष्णाः। भौमाः। धूम्राः। आन्तरिक्षाः। बृहन्तः। दिव्याः। शबलाः।
वैद्युताः। सिध्माः। तारकाः॥१४॥ धूम्रान्। वसन्ताय। आ। लभते। श्वेतान्। ग्रीष्मा
य। कृष्णान्। वर्षाभ्यः। अरुणान्। शरदे। पृषतः। हेमन्ताय। पिशङ्गान्। शिशिरा
य॥१५॥ त्र्यवय इति त्रिऽअवयः। गायत्र्यै। पञ्चावय इति पञ्चऽअवयः। त्रिष्टु

॥रा०॥
॥५८॥

भे। त्रिस्तुभ इति त्रिऽस्तुभे। दित्यवाह इति दित्यऽवाहः। जगत्यै। त्रिवत्सा इति त्रिऽ
वत्साः। अनुष्टुभे। अनुस्तुभ इत्यनुऽस्तुभे। तुर्यवाह इति तुर्यऽवाहः॥१६॥ पष्ठवा
ह इति पष्ठऽवाहः। विराज इति विऽराजे। उक्षाणः। बृहत्यै। ऋषभाः। ककुभे। अ
नड्वाहः। पङ्क्त्यै। धेनवः। अतिछन्दस इत्यतिऽछन्दसे॥१७॥ कृष्णग्रीवा इति
कृष्णऽग्रीवाः। आग्नेयाः। बभ्रवः। सौम्याः। उपध्वस्ता इत्युपऽध्वस्ताः।
सावित्राः। वत्सतर्यः। सारस्वत्यः। श्यामाः। पौष्णाः। पृश्नयः। मारुताः।

दुष्ठिहै२

बहुरूपा इति बहुऽरूपाः। वैश्वदेवा इति वैश्वऽदेवाः। पृश्नयः। द्यावापृथिवीयाः॥१८॥
उक्ताः। संचरा इति सम्ऽचराः। एताः। ऐंद्राग्नाः। कृष्णाः। वारुणाः। पृश्नयः। मा
रुताः। कायाः। तूपराः॥१९॥ आग्नेयौ। अनीकवत इत्यनीकऽवते। प्रथमजानि
ति प्रथमऽजान्। आ। लभते। मरुद्भ्य इति मरुत्ऽभ्यः। सांतपनेभ्य इति सामऽ
तपनेभ्यः। सवात्यानिति सऽवात्यान्। गृहमेधिभ्य इति गृहमेधिऽभ्यः। ब
ष्किहान्। क्रीडिभ्य इति क्रीडिऽभ्यः। संसृष्टानिति सम्ऽसृष्टान्। स्वतवभ्य

इति स्वतवत्ऽभ्यः। अनुसृष्टानित्यनुऽसृष्टान्॥२०॥ उक्ताः। संचरा इति
सम्ऽचराः। एताः। ऐंद्राग्नाः। प्राशृंगाः। प्रशृंगा इति प्रऽशृंगाः। माहे
न्द्रा इति महाऽइंद्राः। बहुरूपा इति बहुऽरूपाः। वैश्वकर्मणा इति वैश्वऽक
र्मणाः॥२१॥ धूम्राः। बभ्रुनीकाशाः। बभ्रुनिकाशा इति बभ्रुऽनिका
शाः। पितृणाम्। सोमवतामिति सोमऽवताम्। बभ्रवः। धूम्रनीका
शाः। धूम्रनिकाशा इति धूम्रऽनिकाशाः। पितृणाम्। बर्हिषदाम्। ब

प॰॥ ६९॥

बर्हिसदामितिबर्हिंऽसदाम्।कृष्णाः।बभ्रुनीकाशाः।बभ्रुनिकाशाइतिब
भ्रुऽनिकाशाः।पितृणाम्।अग्निष्वात्तानाम्।अग्निस्वात्तानामित्यग्निऽ
स्वात्तानाम्।कृष्णाः।पृषंतः।त्रैयंबकाः॥२२॥उत्क्राः।संचराइतिसम्ऽच
राः।एताः।शुनासीरियाः।श्वेताः।वायव्याः।श्वेताः।सौर्याः॥२३॥ छ
वसंताय।कपिंजलान्।आ।लभंते।ग्रीष्माय।कलविंकान्।वर्षाभ्यः।ति
त्तिरीन्।शरदे।वर्तिकाः।हेमंताय।ककरान्।शिशिराय।विककरानिति

॥राम॥
॥६०॥

विऽककरान्॥२४॥समुद्राय।शिशुमारानितिशिशुऽमारान्।आ।लभ
ते।पर्जन्याय।मंडूकान्।अद्भ्यइत्यत्ऽभ्यः।मत्स्यान्।मित्राय।कुलीपया
न्।वरुणाय।नाक्रान्॥२५॥सोमाय।हंसान्।आ।लभंते।वायवे।ब
लाकाः।इंद्राग्निभ्यामितींद्राग्निऽभ्याम्।क्रुंचान्।मित्राय।मद्गून्।वरुणा
य।चक्रवाकानितिचक्रऽवाकान्॥२६॥अग्नये।कुटरून्।आ।लभंते।व
नस्पतिभ्यइतिवनस्पतिऽभ्यः।उलूकान्।अग्नीषोमाभ्याम्।चाषान्।

प०
॥६१॥

अश्विभ्यामित्यश्विऽभ्याम् । मयूरान् । मित्रावरुणाभ्याम् । कपोतान् ॥२७
सोमाय । लबान् । आ । लभते । त्वष्ट्रे । कौलीकान् । गोषादीः । गोसादीरिति
गोऽसादीः । देवानाम् । पत्नीभ्यः । कुलीकाः । देवजामिभ्य इति देवजा
मिऽभ्यः । अग्नये । गृहपतय इति गृहऽपतये । पारुष्णान् ॥२८॥ अह्ने । पा
रावतान् । आ । लभते । रात्र्यै । सीचापूः । अहोरात्रयोः । संधिभ्य इति
संधिऽभ्यः । जतूः । मासेभ्यः । दात्योहान् । संवत्सराय । महतः । सुपर्णा

॥राम॥
॥६१॥

ति

निसुऽपर्णान् ॥२९॥ भूम्यै । आखून् । आ । लभते । अंतरिक्षाय । पांक्त्रान् । दि
वे । कशान् । दिग्भ्य इति दिक्ऽभ्यः । नकुलान् । बभ्रुकान् । अवांतरदिशा
भ्य इत्यवांतरऽदिशाभ्यः ॥३०॥ वसुभ्य इति वसुऽभ्यः । ऋश्यान् । आ ।
लभते । रुद्रेभ्यः । रुरून् । आदित्येभ्यः । न्यंकून् । विश्वेभ्यः । देवेभ्यः । पृ
षतान् । साध्येभ्यः । कुलुंगान् ॥३१॥ ईशानाय । परस्वतः । आ । लभते
मित्राय । गौरान् । वरुणाय । महिषान् । बृहस्पतये । गवयान् । त्वष्ट्रे ।

प० ॥
॥६२॥

उद्धान्॥२९॥प्रजापतयऽइतिप्रजाऽपतये।पुरुषान्।हस्तिनः।आ।लभते।वा
चे।प्लुषीन्।चक्षुषे।मशकान्।श्रोत्राय।भृंगाः॥३०॥प्रजापतयऽइतिप्रजाऽ
पतये।च।वायवे।च।गोमृगऽइतिगोऽमृगः।वरुणाय।आरण्यः।मेषः।
यमाय।कृष्णः।मनुष्यराजायेतिमनुष्यऽराजाय।मर्कटः।शार्दूलाय।रो
हित्।ऋषभाय।गवयी।क्षिप्रश्येनायेतिक्षिप्रऽश्येनाय।वर्तिका।नी
लंगोः।कृमिः।समुद्राय।शिशुमारऽइतिशिशुऽमारः।हिमवतऽइतिहि

॥राम॥
६२॥

मऽवते।हस्ती॥३१॥मयुः।प्राजापत्यऽइतिप्राजाऽपत्यः।उलः।हलिक्ष्णः।वृष
दंशऽइतिवृषऽदंशः।ते।धात्रे।दिशाम्।कंकः।धुंक्षा।आग्नेयी।कलविंकः।
लोहिताहिरितिलोहितऽअहिः।पुष्करसादऽइतिपुष्करऽसादः।ते।त्वाष्ट्राः।वाचे।
क्रुंचः॥३२॥सोमाय।कुलंगः।आरण्यः।अजः।नकुलः।शका।ते।पौष्णाः।
क्रोष्टा।मायोः।इंद्रस्य।गौरमृगऽइतिगौरऽमृगः।पिद्वः।न्यंकुः।कक्कटः।ते
अनुमत्याऽइत्यनुऽमत्यै।प्रतिश्रुत्कायाऽइतिप्रतिऽश्रुत्कायै।चक्रवाकऽ

प०
॥ ६३ ॥

तिऽवक्रऽवाकः ॥ ३६ ॥ सौरी । बलाका । शार्गः । सृजयः । शयांडकइतिशयांऽ
डकः । ते । मैत्राः । सरस्वत्यै । शारिः । पुरुषवागितिपुरुषऽवाक् । श्वावित् । श्ववि
दितिश्वऽवित् । भौमी । शार्दूलः । वृकः । पृदाकुः । ते । मन्यवे । सरस्वते । शुकः । पुरु
षवागितिपुरुषऽवाक् ॥ ३७ ॥ सुपर्णइतिसुऽपर्णः । पार्जन्यः । आतिः । वाहसः ।
दर्विदेतिदर्विऽदा । ते । वायवे । बृहस्पतये । वाचः । पतये । पैङ्गराजइतिपैङ्गऽरा
जः । अलजः । आन्तरिक्षः । प्लवः । मद्गुः । मत्स्यः । ते । नदीपतयइतिनदीऽपतये । ॥ राम ॥

॥ ६३ ॥

द्यावापृथिवीयः । कूर्मः ॥ ३८ ॥ पुरुषमृगइतिपुरुषऽमृगः । चन्द्रमसे । गोधा ।
कालका । दार्वाघाटः । दार्वाघातइतिदारुऽआघातः । ते । वनस्पतीनाम् । कृक
वाकुरितिकृकऽवाकुः । सावित्रः । हंसः । वातस्य । नाक्रः । मकरः । कुलीपयः ।
ते । अकूपारस्य । ह्रियै । शल्यकः ॥ ३९ ॥ एणी । अह्ने । मण्डूकः । मूषिका । तित्ति
रिः । ते । सर्पाणाम् । लोपाशः । आश्विनः । कृष्णः । रात्र्यै । ऋक्षः । जतूः । सुषि
लीकेतिसुऽषिलीका । ते । इतरजनानामितीतरऽजनानाम् । जहका । वैष्णवी

॥४०॥ अन्यवापऽइत्यन्यऽवापः। अर्द्धमासानाम्। अर्द्धमासानाम्। ऋश्यः। मयूरः। सुपर्णऽइति सुऽपर्णः। ते। गन्धर्वाणाम्। अपाम्। उद्रः। मासाम्। कश्यपः। रोहित्। कुण्डृणाची। गोलत्तिका। ते। अप्सरसाम्। मृत्यवे। असितः॥४१॥ वर्षाहूरिति वर्षऽआहुः। ऋतूनाम्। आखुः। कशः। मान्थालः। ते। पितॄणाम्। बलाय। अजगरः। वसूनाम्। कपिञ्जलः। कपोतः। उलूकः। शशः। ते। निर्ऋत्याऽइति निःऽऋत्यै। वरुणाय। आरण्यः। मेषः॥४२॥ श्वित्रः। आदित्यानाम्। उष्ट्रः। घृणीवान्। घृणिवानिति

घृणिऽवान्। वार्ध्रीनसः। ते। मत्यै। अरण्याय। सृमरः। रुरुः। रौद्रः। क्वयिः। कुटरुः। दात्यौहः। ते। वाजिनाम्। कामाय। पिकः॥४३॥ खड्गः। वैश्वदेवऽइति वैश्वऽदेवः। श्वा। कृष्णः। कर्णः। गर्दभः। तरक्षुः। ते। रक्षसाम्। इन्द्राय। सूकरः। सिंहः। मारुतः। कृकलासः। पिप्पका। शकुनिः। ते। शरव्यायै। विश्वेषाम्। देवानाम्। पृषतः॥४४॥ ७॥ इति शुक्लयजुःकाण्वसंहितायां पदपाठे षड्विंशोऽध्यायः॥ ७॥

॥ ७॥ हरिः ॐ॥ शादम्। दद्भिरिति दत्ऽभिः। अवकाम्। दन्तमूलैरिति दन्त

मूलैः। मृदम्। बर्स्वैः। ते गाम्। दंष्ट्राभ्याम्। सरस्वत्यै। अग्रजिह्वमित्यग्रऽजि
ह्वम्। जिह्वायाः। उत्सादमित्युत्ऽसादम्। अवक्रंदेनेत्यवऽक्रंदेन। तालु। वाज
म्। हनुभ्यामिति हनुऽभ्याम्। अपः। आस्येन। वृषणम्। आंडाभ्याम्॥ १॥ आ
दित्यान्। श्मश्रुभिरिति श्मश्रुऽभिः। पंथानम्। भ्रूभ्याम्। द्यावापृथिवी इति
द्यावापृथिवी। वर्त्तोभ्यामिति वर्त्तःऽभ्याम्। विद्युतमिति विऽद्युतम्। कनीनका
भ्याम्। शुक्लाय। स्वाहा। कृष्णाय। स्वाहा। पार्य्याणि। पक्ष्माणि। अवार्य्याः। इ

क्षवः। अवार्याणि। पक्ष्माणि। पार्याः। इक्षवः॥ २॥ वातम्। प्राणेन। अपानेनेत्यप
आनेन। नासिके इति नासिके। उपयाममित्युपऽयामम्। अधरेण। ओष्ठेन। सत्
उत्तरेणेत्युत्ऽतरेण। प्रकाशेनेति प्रऽकाशेन। अंतरम्। अनूकाशेन। अनुकाशेने
त्यनुऽकाशेन। बाह्यम्। निवेष्यमिति निऽवेष्यम्। मूर्ध्ना। स्तनयित्नुं। निर्बाधेने
ति निःऽबाधेन। अशनिम्। मस्तिष्केण। विद्युतमिति विऽद्युतम्। कनीनकाभ्या
म्॥ ३॥ कर्णाभ्याम्। श्रोत्रम्। श्रोत्राभ्याम्। कर्णौ। तेदनीम्। अधरकंठेनेत्यध

२५ कंठेन। अपः। शुष्ककंठेनेति शुष्क ऽ कंठेन। चित्तम्। मन्याभिः। अदितिम्। शी
र्ष्णा। निर्ऋतिमिति निः ऽ ऋतिम्। निर्जर्जल्प्येनेति निः ऽ जर्जल्प्येन। शीर्ष्णा।
संक्रोशैरिति सम् ऽ क्रोशैः। प्राणान्। रेष्माणम्। स्तुपेन॥४॥ मशकान्। के
शैः। इंद्रम्। स्वपसेति सु ऽ अपसा। वहेन। बृहस्पतिम्। शकुनिसादेनेति
शकुनि ऽ सादेन। कूर्मान्। शफैः। आक्रमणमित्या ऽ क्रमणम्। स्थूराभ्या
म्। ऋक्षलाभिः। कपिंजलान्॥५॥ जवम्। जंघाभ्याम्। अध्वानम्। बाहु

भ्यामिति बाहु ऽ भ्याम्। जांबीलेन। अरण्यम्। अग्निम्। अतिरुग्भ्यामित्य
तिरुक् ऽ भ्याम्। पूषणम्। दोर्भ्यामिति दोः ऽ भ्याम्। अश्विनौ। अंसाभ्या
म्। रुद्रम्। रोराभ्याम्॥६॥ अग्नेः। पक्षतिः। वायोः। निपक्षतिरिति नि
ऽ पक्षतिः। इंद्रस्य। तृतीया। अपाम्। चतुर्थी। अदित्यै। पंचमी। इंद्राण्यै। ष
ष्ठी। मरुताम्। सप्तमी। बृहस्पतेः। अष्टमी। अर्यम्णः। नवमी। धातुः। दश
मी। इंद्रस्य। एकादशी। वरुणस्य। द्वादशी। यमस्य। त्रयोदशीति त्रयः ऽ द

प॰॥
॥६७॥

पी॥७॥इंद्राग्न्योः।पक्षतिः।सरस्वत्यै।नियक्षतिरिति निऽपक्षतिः।मित्र
स्य।तृतीया।सोमस्य।चतुर्थी।निर्ऋत्या इति निःऽऋत्यै।पंचमी।अग्नीषो
मयोः।षष्ठी।सर्पाणाम्।सप्तमी।विष्णोः।अष्टमी।पूष्णः।नवमी।त्वष्टुः।दश
मी।इंद्रस्य।एकादशी।वरुणस्य।द्वादशी।यम्यै।त्रयोदशीति त्रयःऽदशी॥
द्यावापृथिव्योः।दक्षिणम्।पार्श्वम्।विश्वेषाम्।देवानाम्।उत्तरम्॥८॥म
रुताम्।स्कंधाः।विश्वेषाम्।देवानाम्।प्रथमा।कीकसा।रुद्राणाम्।द्विती

॥राम॥
॥६७॥

या।आदित्यानाम्।तृतीया।वायोः।पुछम्।अग्नीषोमयोः।भासदौ।क्रुंचौ।श्रो
णिभ्यामिति श्रोणिऽभ्याम्।इंद्राबृहस्पती इतींद्राबृहस्पती।ऊरुभ्यामित्यूरुऽभ्या
म्।मित्रावरुणौ।अल्गाभ्याम्।आक्रमणमित्याऽक्रमणम्।स्थूराभ्याम्।बृह
स्पतिः।कुष्ठिभ्याम्॥९॥पूषणम्।वनिष्ठुना।अंधाहीनित्यंधऽअहीन्।स्थूल
गुदयेति स्थूलऽगुदया।सर्पान्।गुदाभिः।विह्रुत इति विऽह्रुतः।आंत्रैः।अपः।
वस्तिना।वृषणम्।आंडाभ्याम्।वाजिनम्।शेपेन।प्रजामिति प्रऽजाम्।रे

नेसा। चाषान्। पित्तेन। प्रदरानिति प्रऽदरान्। पायुना। कूश्मान्। शकपिंडैरिति
शकऽपिंडैः॥१०॥ इंद्रस्य। क्रोडः। अदित्यै। पाजस्यम्। दिशाम्। जत्रवः। अ
दित्यै। भसत्। जीमूतान्। हृदयौपशेन। अंतरिक्षम्। पुरीतता। पुरितत इति पु
रिऽतता॥११॥ नभः। उदर्येण। चक्रवाकावितिचक्रऽवाकौ। मतस्नाभ्याम्
दिवम्। वृक्काभ्याम्। गिरीन्। प्लाशिभिरिति प्लाशिऽभिः। उपलान्। प्लीह्ना।
वल्मीकान्। क्लोमभिरिति क्लोमऽभिः। ग्लौभिः। गुल्मान्। हिराभिः। स्रवं

तीः। ह्रदान्। कुक्षिभ्यामिति कुक्षिऽभ्याम्। समुद्रम्। उदरेण। वैश्वानरम्। भ
स्मना॥१२॥ ७॥ विधृतिमिति विऽधृतिम्। नाभ्या। घृतम्। रसेन। अपः।
यूष्णा। मरीचीः। विप्रुड्भिरिति विप्रुट्ऽभिः। नीहारम्। ऊष्मणा। शीनम्। वस
या। प्रुष्वाः। अश्रुभिरित्यश्रुऽभिः। ह्रादुनीः। दूषीकाभिः। अस्ना। रक्षांसि
चित्राणि। अंगैः। नक्षत्राणि। रूपेण। पृथिवीम्। त्वचा। जुंबकाय। स्वाहा॥
॥१३॥ यस्य। इमे। हिमवंत इति हिमऽवंतः। महित्वेति महिऽत्वा। यस्य।

प० ॥
॥ ६७ ॥
६१

समुद्रम् । रसया । सह । आहुः । यस्य । इमाः । प्रदिश इति प्रऽदिशः । यस्य । बाहू
इति बाहू । कस्मै । देवाय । हविषा । विधेम ॥ ४ ॥ यः । आत्मदा इत्यात्मऽदाः । ब
लदा इति बलऽदाः । यस्य । विश्वे । उपासत इत्युपऽआसते । प्रशिषमिति प्रऽ
शिषम् । यस्य । देवाः । यस्य । छाया । अमृतम् । यस्य । मृत्युः । कस्मै । देवाय ।
हविषा । विधेम ॥ ५ ॥ ७ ॥ आ । नः । भद्राः । क्रतवः । यंतु । विश्वतः । अद
ब्धासः । अपरीतास इत्यपरिऽइतासः । उद्भिद इत्युत्ऽभिदः । देवाः । नः । य

॥ राम ॥
॥ ६७ ॥
६१

२ नी

था । सदम् । इत् । वृधे । असन् । अप्रायुव इत्यप्रऽआयुवः । रक्षितारः । दिवेदि
व इति दिवेऽदिवे ॥ १ ॥ देवानाम् । भद्रा । सुमतिरिति सुऽमतिः । ऋजूयताम् ।
देवानाम् । रातिः । अभि । नः । नि । वर्त्तताम् । देवानाम् । सख्य
म् । उप । सेदिम । वयम् । देवाः । नः । आयुः । प्र । तिरंतु । जीवसे ॥ २ ॥ तान् ।
पूर्वया । निविदेति निऽविदा । हूमहे । वयम् । भगम् । मित्रम् । अदितिम् । द
क्षम् । अस्रिधम् । अर्यमणम् । वरुणम् । सोमम् । अश्विना । सरस्वती ।

ऋजूयता
म् २

नः। सुभगेतिसुऽभगा। मयः। करत्॥ १८॥ तत्। नः। वातः। मयोभ्वितिमयःऽ
भु। वातु। भेषजम्। तत्। माता। पृथिवी। तत्। पिता। द्यौः। तत्। ग्रावाणः।
सोमसुतइतिसोमऽसुतः। मयोभुवइतिमयःऽभुवः। तत्। अश्विना।
शृणुतम्। धिष्ण्या। ध्रुवम्॥ १९॥ तम्। ईशानम्। जगतः। तस्थुषः। प
तिम्। धियंजिन्वमितिधियम्ऽजिन्वम्। अवसे। हूमहे। वयम्। पूषा। नः।
यथा। वेदसाम्। असत्। वृधे। रक्षिता। पायुः। अदब्धः। स्वस्तये॥ २०॥

स्वस्ति। नः। इन्द्रः। वृद्धश्रवाइतिवृद्धऽश्रवाः। स्वस्ति। नः। पूषा। विश्ववेदाइतिवि
श्वऽवेदाः। स्वस्ति। नः। तार्क्ष्यः। अरिष्टनेमिरित्यरिष्टऽनेमिः। स्वस्ति। नः। बृहस्पतिः। रि २
दधातु॥ २१॥ ७॥ पृषदश्वाइतिपृषत्ऽअश्वाः। मरुतः। पृश्निमातरइतिपृश्निऽ
मातरः। शुभंयावानइतिशुभम्ऽयावानः। विदथेषु। जग्मयः। अग्निजिह्वाइत्यग्नि
जिह्वाः। मनवः। सूरचक्षसइतिसूरऽचक्षसः। विश्वे। नः। देवाः। अवसा। आ।
गमन्। इह॥ २२॥ भद्रम्। कर्णेभिः। शृणुयाम। देवाः। भद्रम्। पश्येम। अक्षभिः।

पं॥
॥६०॥

अक्षऽभिः। यजत्राः। स्थिरैः। अंगैः। तुष्टुवांसः। तुस्तुवांस इति तुस्तुऽवांसः।
तनूभिः। वि। अशेम। देवहितमिति देवऽहितम्। यत्। आयुः॥ २३॥ शतम्। इ
त्। नु। शरदः। अंति। देवाः। यत्र। नः। चक्र। जरसम्। तनूनाम्। पुत्रासः। यत्र। पि
तरः। भवंति। मा। नः। मध्या। रीरिषत। रिरिषतेति रिरिषत। आयुः। गंतोः॥ २४॥
अदितिः। द्यौः। अदितिः। अंतरिक्षम्। अदितिः। माता। सः। पिता। सः। पुत्रः।
विश्वे। देवाः। अदितिः। पंच। जनाः। अदितिः। जातम्। अदितिः। जनित्वमिति

राम॥
॥६०॥

जनित्वम्॥ २५॥ मा। नः। मित्रः। वरुणः। अर्यमा। आयुः। इंद्रः। ऋभुक्षाः। मरु
तः। परि। ख्यन्। यत्। वाजिनः। देवजातस्येति देवऽजातस्य। सप्तेः। प्रवक्ष्या
म इति प्रऽवक्ष्यामः। विदथे। वीर्याणि॥ २६॥ यत्। निर्णिजा। निर्निजेति निःऽ
निजा। रेक्णसा। प्रावृतस्य। रातिम्। गृभीताम्। मुखतः। नयंति। सुप्राङिति
सुऽप्राङ्। अजः। मेम्यत्। विश्वरूप इति विश्वऽरूपः। इंद्रापूष्णोः। प्रियम्। अपि।
एति। पाथः॥ २७॥ एषः। छागः। पुरः। अश्वेन। वाजिना। पूष्णः। भागः। नीयते।

विश्वदेव्य इति विश्व॰देव्यः। अभिप्रियमित्यभि॰प्रियम्। यत्। पुरोळाशम्। अर्व
ता। त्वष्टा। इत्। एनम्। सौश्रवसाय। जिन्वति ॥२८॥ यत्। हविष्यम्। ऋतुश इत्यृ
तु॰शः। देवयानमिति देव॰यानम्। त्रिः। मानुषाः। परि। अश्वम्। नयंति। अत्र। पू
ष्णः। प्रथमः। भागः। एति। यज्ञम्। देवेभ्यः। प्रतिवेदयन्निति प्रति॰वेदयन्। अजः ॥
॥२९॥ होता। अध्वर्युः। आवया इत्या॰वयाः। अग्निमिंध इत्यग्निम्॰इंधः। ग्रा
वग्राभ इति ग्राव॰ग्राभः। उत। शंस्ता। सुविप्र इति सु॰विप्रः। तेन। यज्ञेन। स्व

रंकृतेनेति सु॰अरं॰कृतेन। स्विष्टेनेति सु॰इष्टेन। वक्षणाः। आ। पृणध्वम् ॥३०॥ यूप
व्रस्का इति यूप॰व्रस्काः। उत। ये। यूपवाहा इति यूप॰वाहाः। चषालम्। ये। अश्वयूपा
येत्यश्व॰यूपाय। तक्षति। ये। च। अर्वते। पचनम्। संभरंतीति सम्॰भरंति। उतो इ
त्युतो। तेषाम्। अभिगूर्तिरित्यभि॰गूर्तिः। नः। इन्वतु ॥३१॥ उप। प्र। अगात्। सु
मदिति सु॰मत्। मे। अधायि। मन्म। देवानाम्। आशाः। उप। वीतपृष्ठ इति वीत॰
पृष्ठः। अनु। एनम्। विप्राः। ऋषयः। मदंति। देवानाम्। पुष्टे। चकृम। सुबंधुमिति

सुऽबंधुम्॥७॥ यत्।वाजिनः।दाम।संऽदानमिति सम्ऽदानम्।अर्वतः।या।शीर्ष
ण्या।रशना।रज्जुः।अस्य।यत्।वा।घ।अस्य।प्रभृतमिति प्रऽभृतम्।आस्ये।तृ
णम्।सर्वा।ता।ते।अपि।देवेषु।अस्तु॥८॥ यत्।अश्वस्य।क्रविषः।मक्षिका।
आश।यत्।वा।स्वरौ।स्वधिताविति स्वऽधितौ।रिप्तम्।अस्ति।यत्।हस्तयोः।
शमितुः।यत्।नखेषु।सर्वा।ता।ते।अपि।देवेषु।अस्तु॥९॥ यत्।ऊवध्यम्।उ
दरस्य।अपवातीत्यपऽवाति।यः।आमस्य।क्रविषः।गंधः।अस्ति।सुकृतेति

सुऽकृता।तत्।शमितारः।कृण्वंतु।उत।मेधम्।शृतपाकमिति शृतऽपाकम्।पचं
तु॥१०॥ यत्।ते।गात्रात्।अग्निना।पच्यमानात्।अभि।शूलम्।निहतस्येति
निऽहतस्य।अवधावतीत्यवऽधावति।मा।तत्।भूम्याम्।आ।श्रिषत्।मा।तृ
णेषु।देवेभ्यः।तत्।उशद्भ्य इत्युशत्ऽभ्यः।रातम्।अस्तु॥११॥ ये।वाजिनम्।
परिपश्यंतीति परिऽपश्यंति।पक्वम्।ये।ईम्।आहुः।सुरभिः।निः।हर।इति।ये।
च।अर्वतः।मांसभिक्षामिति मांसऽभिक्षाम्।उतो इति।तेषाम्।अभिगूर्तिः

उपासत इत्युपऽआसते।

रित्यभिऽगूर्तिः। नः। इन्वतु॥ ३७॥ यत्। नीक्षणमिति निऽईक्षणम्। माꣳस्पचन्याः।
उखायाः। या। पात्राणि। यूष्णः। आसेचनानीत्याऽसेचनानि। उष्मण्या। अपि
धानेत्यपिऽधाना। चरूणाम्। अंकाः। सूनाः। परि। भूषंति। अश्वम्॥ ३८॥ मा।
त्वा। अग्निः। ध्वनयीत्। धूमगंधिरिति धूमऽगंधिः। मा। उखा। भ्राजंती। अभि।
वित्त। जघ्रिः। इष्टम्। वीतम्। अभिगूर्तमित्यभिऽगूर्तम्। वषट्कृतमिति वषट्ऽ
कृतम्। तम्। देवासः। प्रति। गृभ्णंति। अश्वम्॥ ३९॥ निक्रमणमिति निऽक्रमण

म्। निषदनम्। निसदनमिति निऽसदनम्। विवर्तनमिति विऽवर्तनम्। यत्। च। प
ड्वीशम्। अर्वतः। यत्। च। पपौ। यत्। च। घासिम्। जघास। सर्वा। ता। ते। अपि। दे
वेषु। अस्तु॥ ४०॥ यत्। अश्वाय। वासः। उपस्तृणंतीत्युपऽस्तृणंति। अधीवास
म्। या। हिरण्यानि। अस्मै। संदानमिति सम्ऽदानम्। अर्वंतम्। पड्वीशम्। प्रिया।
देवेषु। आ। यामयंति। यमयंतीति यमयंति॥ ४१॥ इमा। नु। कम्। भुवना। सीष
धाम। सीसधामेति सीसधाम। इंद्रः। च। विश्वे। च। देवाः। आदित्यैः। इंद्रः। स

॥ पद ॥
॥ ७३ ॥

गण इति सऽगणः। मरुद्भिरितिमरुत्ऽभिः। अस्मभ्यम्। भेषजा। करत्। यज्ञम्।
चु। नः। तन्वम्। चु। प्रजामितिप्रऽजाम्। अच्छ। आ दित्यैः। इंद्रः। सह। सीषधाति।
सीसधातीतिसीसधाति॥ ४२॥ छ॥ इतिशुक्लयजुःकाण्वसंहितांपदपाठेस
सविंशतिमोध्यायः॥ २७॥ छ॥ हरिःॐम्॥ अग्निः। च। पृथिवी। च। सन्न
ते इतिसम्ऽनते। तेइतिते। मे। सम्। नमताम्। अदः। वायुः। अंतरिक्षम्। आ
दित्यः। द्यौः। आपः। वरुणः। सप्त। संसदइतिसम्ऽसदः। अष्टमी। भूतसा

॥ राम ॥
॥ ७३ ॥

धनीतिभूतऽसाधनी॥ १॥ सकामानितिसऽकामान्। अध्वनः। कुरु। संज्ञान
मितिसम्ऽज्ञानम्। अस्तु। मे। अमुना। यथा। इमाम्। वाचम्। कल्याणीम्।
आवदानीत्याऽवदानि। जनेभ्यः॥ २॥ ब्रह्मराजन्याभ्याम्। शूद्राय। च। अ
र्याय। स्वाय। अरणाय। प्रियः। देवानाम्। दक्षिणायै। दातुः। इह। भूयासम्। अय
म्। मे। कामः। सम्। ऋध्यताम्। उप। मा। अदः। नमतु॥ ३॥ बृहस्पते। अति।
यत्। अर्य्यः। अर्हात्। द्युमदितिद्युऽमत्। विभातीतिविऽभाति। क्रतुमदिति

68

ऋतुऽमत्।जनेषु।यत्।दीदयत्।श्रवसा।ऋतप्रजातेत्यृतऽप्रजात।तत्।अस्मा
सुद्रविणम्।धेहि।चित्रम्।बृहस्पतये।त्वा।एषः।ते।योनिः।बृहस्पतये।त्वा
॥६॥इंद्र।गोमन्निति गोऽमन्।इह।आ।याहि।पिब।सोमम्।शतक्रतो।इति
शतऽक्रतो।विद्यद्भिर्निरिति विद्यत्ऽभिः।ग्रावभिरिति ग्रावऽभिः।सुतम्।इंद्रा
य।त्वा।गोमत इति गोऽमते।एषः।ते।योनिः।इंद्राय।त्वा।गोमत इति गोऽम
ते॥७॥ऋतावानम्।ऋतवानमित्यृतऽवानम्।वैश्वानरम्।ऋतस्य।ज्योति

षः।पतिम्।अजस्रम्।घर्मम्।ईमहे॥वैश्वानराय।त्वा।एषः।ते।योनिः।वैश्वानरा
य।त्वा॥६॥वैश्वानरम्।हवामहे।ऋतस्य।ज्योतिषः।पतिम्।अजस्रम्।घर्मम्।
ईमहे॥७॥अग्निः।उक्थेन।वाहसा॥८॥वैश्वानरस्य।सुमताविति सुऽमतौ।
स्याम।राजा।हि।कम्।भुवनानाम्।अभिश्रीरित्यभिऽश्रीः।इतः।जातः।वि
श्वम्।इदम्।वि।चष्टे।वैश्वानरः।यतते।सूर्येण॥९॥मरुत्वाम्।इंद्र।वृष
भः।रणाय।पिब।सोमम्।अनुष्वधम्।अनुस्वधमित्यनुऽस्वधम्।मदाय।

आ। सिंचस्व। जठरे। मध्वः। ऊर्मिम्। त्वम्। राजा। असि। प्रतिपदिति प्रति॒ऽपत्। सुतानाम्॥१०॥ महान्। इंद्रः। वज्रहस्त इति वज्रऽहस्तः। षोळशी। शर्म। यच्छतु। हंतु। पाप्मानम्। यः। अस्मान्। द्वेष्टि॥११॥ अग्निः। ऋषिः। पवमानः। पांचजन्य इति पांचऽजन्यः। पुरोहित इति पुरःऽहितः। तम्। ईमहे। महागयमिति महाऽगयम्॥१२॥ अनु। वीरैः। अनु। पुष्यास्म। गोभिः। अश्वैः। सर्वेण। पुष्टैः। द्विपदेति द्विऽपदा। चतुष्पदा। चतुःपदेति चतुःऽपदा। वयम्। देवाः। नः।

यज्ञम्। ऋतुथेत्यृतुऽथा। नयंतु॥१३॥ आ। नः। गोत्रा। दर्दृहि। गोपत इति गोऽपते। गाः। सम्। अस्मभ्यम्। सनयः। यंतु। वाजाः। दिवक्षाः। असि। वृषभ। सत्यशुष्म इति सत्यऽशुष्मः। अस्मभ्यम्। सु। मघवन्निति मघऽवन्। बोधि। गोदा इति गोऽदाः॥१४॥ छ॥ छ॥ इति शुक्लयजुः काण्वसंहितायां पदपाठे अष्टाविंशतितमोऽध्यायः॥२८॥ छ॥ हरिः ॐ॥ समाः। त्वा। अग्ने। ऋतवः। वर्द्धयंतु। संवत्सराः। ऋषयः। यानि। सत्या। सम्। दिव्येन। दीदि

लि। रोचनेन। विश्वाः। आ। भाहि। प्रदिश इति प्रऽदिशः। चतस्रः॥ १॥ सम्
च। इध्यस्व। अग्ने। प्र। च। बोधय। एनम्। उत्। च। तिष्ठ। महते। सौभगाय।
मा। च। रिषत्। उपसत्तेत्युपऽसत्ता। ते। अग्ने। ब्रह्माणः। ते। यशसः। सं
तु। मा। अन्ये॥ २॥ त्वाम्। अग्ने। वृणते। ब्राह्मणाः। इमे। शिवः। अग्ने। सं
वरण इति सम्ऽवरणे। भव। नः। सपत्नहेति सपत्नऽहा। नः। अभिमाति
जिदित्यभिमातिऽजित्। च। स्वे। गये। जागृहि। अप्रयुच्छन्नित्यप्रऽयु

च्छन्॥ ३॥ इह। एव। अग्ने। अधि। धारय। रयिम्। मा। त्वा। नि। क्रन्। पूर्वचि
त इति पूर्वऽचितः। निकारिण इति निऽकारिणः। क्षत्रम्। अग्ने। सुयममि
ति सुऽयमम्। अस्तु। तुभ्यम्। उपसत्तेत्युपऽसत्ता। वर्द्धताम्। ते। अनिष्टृ
तः। अनिस्तृत इत्यनिऽस्तृतः॥ ४॥ क्षत्रेण। अग्ने। स्वायुरिति सुऽआ
युः। सम्। रभस्व। मित्रेण। अग्ने। मित्रधेय इति मित्रऽधेये। यतस्व।
सजातानामिति सऽजातानाम्। मध्यमस्था इति मध्यमऽस्थाः। एधि।

॥ प० ॥
॥ ७७ ॥

राक्षाम् । अग्ने । विहव्य इति विऽहव्यः । दीदिहि । इह ॥ ५ ॥ अति । निहः । अति ।
स्रिधः । अति । अचित्तिम् । अति । अरातिम् । अग्ने । विश्वा । हि । अग्ने । दु
रितेति दुःऽइता । सहस्व । अथ । अस्मभ्यम् । सहवीरमिति सहऽवीरम् ।
रयिम् । दाः ॥ ६ ॥ अनाधृष्यः । जातवेदा इति जातऽवेदाः । अनिष्टृतः ।
अनिस्तृत इत्यनिऽस्तृतः । विराडिति विऽराट् । अग्ने । क्षत्रभृदिति क्ष
त्रऽभृत् । दीदिहि । इह । विश्वाः । आशाः । प्रमुंचन्निति प्रऽमुंचन् । मानु

॥ रा० ॥
॥ ७७ ॥

षीः । भियः । शिवाभिः । अद्य । परि । पाहि । नः । वृधे ॥ ७ ॥ बृहस्पते । सवितः ।
बोधय । एनम् । संशितमिति सम्ऽशितम् । चित् । संतरामिति संऽत
राम् । सम् । शिशाधि । वर्द्धय । एनम् । महते । सौभगाय । विश्वे । एनम् ।
अनु । मदन्तु । देवाः ॥ ८ ॥ अमुत्रभूयादित्यमुत्रऽभूयात् । अध । यत् । य
मस्य । बृहस्पते । अभिशस्तेरित्यभिऽशस्तेः । अमुंचः । प्रति । औहताम् ।
अश्विना । मृत्युम् । अस्मात् । देवानाम् । अग्ने । भिषजा । शचीभिः ॥ ९ ॥

ऊर्ध्वाः। अस्य। समिध इति सम्ऽइधः। भवंति। ऊर्ध्वा। शुक्रा। शोचींषि। अग्नेः।
द्युमत्तमेति द्युमत्ऽतमा। सुप्रतीकस्येति सुऽप्रतीकस्य। सूनोः॥११॥ तनूनपादि
ति तनूऽनपात्। असुरः। विश्ववेदा इति विश्वऽवेदाः। देवः। देवेषु। देवः। पथः। अ
नक्तु। मध्वा। घृतेन॥१२॥ मध्वा। यज्ञम्। नक्षसे। प्रीणानः। नराऽशंसः। अग्ने।
सुकृदिति सुऽकृत्। देवः। सविता। विश्ववार इति विश्वऽवारः॥१३॥ अच्छ।
अयम्। एति। शवसा। घृतेन। ईळानः। वह्निः। नमसा। अग्निम्। स्रुचः। अ

ध्वरेषु। प्रयत्स्विति प्रयत्ऽसु॥१४॥ सः। यक्षत्। अस्य। महिमानम्। अग्नेः।
सः। ईम्। मंद्रा। सुप्रयस इति सुऽप्रयसः। वसुः। चेतिष्ठः। वसुधातम इति वसुऽ
धातमः। च॥१५॥ द्वारः। देवीः। अनु। अस्य। विश्वे। व्रता। ददंते। अग्नेः। उरु
व्यचस इत्युरुऽव्यचसः। धाम्ना। पत्यमानाः॥१६॥ ते इति ते। अस्य। योष
णे इति योषणे। दिव्ये इति दिव्ये। न। योनौ। उषासानक्ता। उषसानक्तेत्युष
सानक्ता। इमम्। यज्ञम्। अवताम्। अध्वरम्। नः॥१७॥ दैव्या। होतारा। ऊ

प॰
७९

ध्वम्। अध्वरम्। नः। अग्नेः। जिह्वाम्। अभि। गृणीतम्। कृणुतम्। नः। स्वि
ष्टिमितिसुऽइष्टिम्॥१८॥ तिस्रः। देवीः। बर्हिः। आ। इदम्। सदंतु। इडा। सर
स्वती। भारती। मही। गृणाना॥१९॥ तत्। नः। तुरीपम्। अद्भुतम्। पुरुक्षु।
त्वष्टा। सुवीरमितिसुऽवीरम्॥ रायः। पोषम्। वि। स्यतु। नाभिम्। अस्मे इत्य
स्मे॥२०॥ वनस्पते। अव। सृज। रराणः। त्मना। देवेषु। अग्निः। हव्यम्। श
मिता। सूदयाति॥२१॥ अग्ने। स्वाहा। कृणुहि। जातवेद इति जातऽवेदः।

रा॰
७९

इंद्राय। हव्यम्॥ विश्वे। देवाः। हविः। इदम्। जुषंताम्॥२२॥ ७॥ पीवोअन्नानिति पीवःऽ
अन्नान्। रयिवृध इति रयिऽवृधः। सुमेधा इति सुऽमेधाः। श्वेतः। सिषक्ति। सिस
क्तीति सिसक्ति। नियुतामिति निऽयुताम्। अभिश्रीरित्यभिऽश्रीः। ते। वायवे।
समनस इति सऽमनसः। वि। तस्थुः। विश्वा। इत्। नरः। स्वपत्यानीति सुऽअपत्या
नि। चक्रुः॥२३॥ राये। नु। यम्। जज्ञतुः। रोदसी इति रोदसी। इमे इतीमे। राये। दे
वी। धिषणा। धाति। देवम्॥ अध। वायुम्। नियुत इति निऽयुतः। सश्चत। स्वाः।

॥पू०॥
॥८०॥

उत। श्वेतम्। वसुधितिमितिवसुऽधितिम्। निरेके॥२४॥ वायुः। अग्रेगा इत्यग्रेऽ
गाः। यज्ञप्रीरितियज्ञऽप्रीः। साकम्। गन्। मनसा। यज्ञम्। शिवः। नियुद्भिरिति
नियुत्ऽभिः। शिवाभिः॥२५॥ प्र। याभिः। यासि। दाश्वांसम्। अच्छ। नियु
द्भिरिति नियुत्ऽभिः। वायो इति वायो। इष्टये। दुरोणे। नि। नः। रयिम्।
सुभोजसमितिसुऽभोजसम्। युवस्व। नि। वीरम्। गव्यम्। अश्व्यम्। च। रा
धः॥२६॥ वायो इति वायो। ये। ते। सहस्रिणः। रथासः। तेभिः। आ। गहि।

॥रा०॥
॥८०॥

नियुत्वान्। सोमपीतय इतिसोमऽपीतये॥२७॥ एकया। च। दशभिरितिद
शऽभिः। च। स्वभूत इतिस्वऽभूते। द्वाभ्याम्। इष्टये। विंशती। च। तिसृभिरि
तितिसृऽभिः। च। वहसे। त्रिंशता। च। नियुद्भिरितिनियुत्ऽभिः। वायो
इतिवायो। इह। ता। वि। मुंच॥२८॥ नियुत्वान्। वायो इतिवायो। आ। गहि।
अयम्। शुक्रः। अयामि। ते। गन्ता। असि। सुन्वतः। गृहम्॥२९॥ वायो इति
वायो। शुक्रः। अयामि। ते। मध्वः। अग्रम्। दिविष्टिषु। आ। याहि। सोमपी

प॰
८१

तयइतिसोमऽपीतये। स्पार्हः। देव। नियुत्वता॥ २॥ आ। नः। नियुद्भिरिति
नियुत्ऽभिः। शतिनीभिः। अध्वरम्। सहस्रिणीभिः। उप। याहि। यज्ञम्। वा
यो इति वायो। अस्मिन्। सवने। मादयस्व। यूयम्। पात। स्वस्तिभिरितिस्व
स्तिऽभिः। सदा। नः॥ ३॥ तव। वायो इति वायो। ऋतस्पते। ऋतपतइत्यृ
तऽपते। त्वष्टुः। जामातः। अद्भुत। अवांसि। आ। वृणीमहे॥ २१॥ ७॥
येन। द्यौः। उग्रा। पृथिवी। च। दृळ्हा। येन। स्वरिति स्वः। स्तभितम्। येन।

उ॰
यु॰

रा॰
८१

नाकः। यः। अंतरिक्षे। रजसः। विमानइति विऽमानः। कस्मै। देवाय। हविषा।
विधेम॥ ३॥ यम्। क्रंदसीइतिक्रंदसी। अवसा। तस्तभानेइतितस्तभाने।
अभि। ऐक्षेताम्। मनसा। रेजमानेइतिरेजमाने। यत्र। अधि। सूरः। उ
दितइत्युत्ऽइतः। विभातीति विऽभाति॥ ४॥ आपः। ह। यत्। बृहतीः।
विश्वम्। आयन्। गर्भम्। दधानाः। जनयंतीः। अग्निम्। ततः। देवाना
म्। सम्। अवर्तत। असुः। एकः॥ ५॥ यः। चित्। आपः। महिना। पर्यप

प॥
८२॥
ति १

पृयदिँपरिऽअपश्यत्।दक्षम्।दधानाः।जनयंतीः।यज्ञम्।यः।देवेषु।अधि।
देवः।एकः।आसीत्।नः।जजान।बृहतीः।जजान।विश्वा।जातानि॥२५॥
अभि।त्वा।शूर।नोनुमः।अदुग्धाःऽइव।धेनवः।ईशानम्।अस्य
जगतः।स्वर्दृशमिति स्वःऽदृशम्।ईशानम्।इंद्र।तस्थुषः॥२७॥न।त्वावा
निति त्वाऽवान्।अन्यः।दिव्यः।न।पार्थिवः।न।जातः।न।जनिष्यते।अश्वा
यंतः।अश्वयंतऽइत्यश्वऽयंतः।मघवन्निति मघऽवन्।इंद्र।वाजिनः।गव्यं

॥रा०
॥८२

तः।त्वा।हवामहे॥२८॥त्वां।इत्।हि।हवामहे।सातौ।वाजस्य।कारवः।त्वा
म्।वृत्रेषु।इंद्र।सत्पतिमिति सत्ऽपतिम्।नरः।त्वाम्।काष्ठासु।अर्वतः॥२९॥
सः।त्वम्।नः।चित्र।वज्रहस्तेति वज्रऽहस्त।धृष्णुयेति धृष्णुऽया।महः।स्त
वानः।अद्रिवऽइत्यद्रिऽवः।गाम्।अश्वम्।रथ्यम्।इंद्र।सम्।किर।सत्रा।
वाजम्।न।जिग्युषे॥३०॥कया।नः।चित्रः।आ।भुवत्।ऊती।सदावृधऽइ
ति सदाऽवृधः।सखा।कया।शचिष्ठया।वृता॥३१॥कः।त्वा।सत्यः।म

म.

प० ८३

दा नाम। मंहिष्ठः। मत्सत्। अंधसः। दृव्हा। चित्। आरुजे। वसु॥ ४२॥ अभि।
सु। नः। सखीनाम्। अविता। जरितॄणाम्। शतम्। भवासि। ऊतये॥ ४३॥ य
ज्ञायज्ञेतियज्ञाऽयज्ञा। वः। अग्नये। गिरागिरेतिगिराऽगिरा। च। दक्षसे।
प्रप्रेतिप्रऽप्र। वयम्। अमृतम्। जातवेदसमितिजातऽवेदसम्। प्रियम्। मि
त्रम्। न। शंसिषम्॥ ४४॥ ऊर्जः। नपातम्। सः। हिन। अयम्। अस्मयुरि
त्यस्मऽयुः। दाशेम। हव्यदातयइतिहव्यऽदातये। भुवत्। वाजेषु। अविता। भु

रा ८३

वत्सरः

वत्। वृधः। उत। त्राता। तनूनाम्॥ ४५॥ संवत्सरः। असि। परिवत्सरइतिप
रिऽवत्सरः। इदावत्सरः। इद्वत्सरइतीत्ऽवत्सरः। उषसः। ते। कल्पंताम्। अहो
रात्राः। अर्द्धमासाइत्यर्द्धऽमासाः। मासाः। ऋतवः। संवत्सरः। ते। कल्पताम्॥ ४६॥
प्रेत्याइतिप्रऽइत्यै। एत्याइत्याऽइत्यै। सम्। च। अंच। प्र। च। सारय। सुपर्ण
चिदितिसुपर्णऽचित्। असि। तया। देवतया। अंगिरस्वत्। ध्रुवः। सी
द॥ ४७॥ ७॥ इतिशुक्लयजुःकाण्वसंहितायांपदपाठेएकोनत्रिंशोध्यायः॥

प॰
८४

॥२९॥ छ॥ हरिः ऽ ॐ ॥ समिधेतिसम्ऽइधा । इंद्रम् । इद्धः । पदे । नाभा । पृथि
व्याः । अधि । दिवः । वर्ष्मन् । सम् । इध्यते । ओजिष्ठः । चर्षणीसहाम् । चर्षणि
सहामितिचर्षणिऽसहाम् । विचेतु ॥१॥ तनूनपातमितितनूऽनपातम् । ऊति
भिरित्यूतिऽभिः । जेतारम् । अपराजितमित्यपराऽजितम् । इंद्रम् । देवम् । स्व
र्विदमितिस्वःऽविदम् । पथिभिरितिपथिऽभिः । मधुमत्तमैरितिमधुम
त्ऽतमैः । नराशंसेन । तेजसा ॥२॥ इळाभिः । इंद्रम् । ईळितम् । आजुह्वान

रा॰
८४

मित्याऽजुह्वानम् । अमर्त्यम् । दिवः । दिवे । सवीर्यइतिसऽवीर्यः । वज्रहस्त
इतिवज्रऽहस्तः । पुरंदरइतिपुरम्ऽदरः ॥३॥ बर्हिषि । इंद्रम् । निषद्वरम् । निस
द्वरमितिनिसत्ऽवरम् । वृषभम् । नर्यापसमितिनर्यऽअपसम् । वसुभि
रितिवसुऽभिः । रुद्रैः । आदित्यैः । सयुग्भिरितिसयुक्ऽभिः । बर्हिः । आ ।
असदत् ॥४॥ ओजः । न । वीर्यम् । सहः । द्वारः । इंद्रम् । अवर्द्धयन् । सुप्राय
णाः । सुप्रायणाइतिसुऽप्रायणाः । अस्मिन् । यज्ञे । वि । श्रयंताम् । ऋता

॥प॰॥
॥८५॥

वृधः। ऋतवृधइत्यृतऽवृधः। शूरः। इंद्राय। मीढुषे। व्यंतु॥५॥ उषेइत्युषे।
इंद्रस्य। धेनूइतिधेनू। सुदुघेइतिसुऽदुघे। मातरा। महीइतिमही। सवातराविति
तिसऽवातरौ। न। तेजसा। वत्सम्। इंद्रम्। अवर्द्धताम्। वीताम्॥६॥ भिषजा।
सखाया। हविषा। इंद्रम्। भिषज्यतः। कवीइतिकवी। दिवौ। प्रचेतसाइतिप्रऽचे
तसौ। इंद्राय। धत्तः। इंद्रियम्॥७॥ इडा। सरस्वती। भारती। महीः। इंद्रप
त्नीरितींद्रऽपत्नीः। हविष्मतीः॥८॥ त्वष्टारम्। इंद्रम्। देवम्। भिषजम्। सुय

॥रा॰॥
८५

जमितिसुऽयजम्। घृतश्रियमितिघृतऽश्रियम्। पुरुरूपमितिपुरुऽरूपम्। सुरेत
समितिसुऽरेतसम्। मघोनम्॥९॥ धियः। जोष्टारम्। इंद्रियम्। मध्वा। समंज
न्नितिसम्ऽअंजन्। पथिभिरितिपथिऽभिः। सुगेभिरितिसुऽगेभिः। स्वद
ति। यज्ञम्। मधुना। घृतेन॥१०॥ इंद्रम्। स्वाहा। आज्यस्य। मेदसः। स्तोकाना
म्। स्वाहाकृतीनामितिस्वाहाऽकृतीनाम्। हव्यसूक्तीनामितिहव्यऽसूक्ती
नाम्। देवाः। आज्यपाइत्याज्यऽपाः। जुषाणाः। इंद्रः। आज्यस्य॥११॥ देवम्।

पा॰
८६

बर्हिः। इंद्रम्। सुदेवमिति सुऽदेवम्। देवैः। वीरवदिति वीरऽवत्। स्तीर्णम्। वेद्याम्। अवर्द्धयत्। वस्तोः। वृतम्। प्र। अक्तोः। भृतम्। राया। बर्हिष्मतः। अति। ॥१२॥ अगात्
इंद्रम्। संघानइति सम्ऽघाते। वीड्वीः। यामन्। अवर्द्धयन्। आ। वत्सेन। त
रुणेन। कुमारेण। चामीवता। अर्पा। अर्वाणम्। रेणुककाटमिति रेणुऽककाटः
म्। नुदंताम्। ॥१३॥ उषासानक्ता। उषसानक्तेत्युषसानक्ता। इंद्रम्। य
ज्ञा। प्रयतीति प्रऽयती। अह्वेताम्। देवीः। विशः। प्र। अयासिष्टाम्। सुप्री

रा॰
८६

तेइति सुऽप्रीते। सुधितेइति सुऽधिते। ॥१४॥ वसुधितीइति वसुऽधिती।
२ अन्या देवम्। इंद्रम्। अवर्द्धताम्। अयावि। अघा। द्वेषांसि। आ। अन्या। वक्षत्
वसु। वार्याणि। यजमानाय। शिक्षितेइति शिक्षिते। ॥१५॥ सुदुघेइति
सुऽदुघे। पयसा। इषम्। ऊर्ज्जम्। अन्या। वक्षत्। सग्धिम्। सपीतिमिति सऽ ति
पीतिम्। अन्या। नवेन। पूर्वम्। दयमानेइति दयमाने। पुराणेन। नवम्।
अधाताम्। ऊर्ज्जम्। ऊर्ज्जाहुतीइत्यूर्ज्जाऽआहुती। ऊर्ज्जयमानेइत्यूर्ज्जय

मानेः॥१६॥हुताघस्नांसाइतिहुतऽअघस्नांसौ।आ।अभार्ष्टाम्।शिशिते।
॥१७॥पतिम्।इंद्रम्।अवर्द्धयन्।अस्पृक्षत्।भारती।दिवम्।रुद्रैः।यज्ञम्।
सरस्वती।इळा।वसुमतीतिवसुऽमती।गृहान्॥१८॥त्रिवरूथइतित्रिऽ
वरूथः।त्रिवंधुरइतित्रिऽवंधुरः।ऋतेन।शितिपृष्ठानामितिशितिऽपृ
ष्ठानाम्।आहितइत्याऽहितः।सहस्रेण।प्र।वर्तते।मित्रावरुणा।इत्।
अस्य।होत्रम्।अर्हतः।बृहस्पतिः।स्तोत्रम्।अश्विना।आध्वर्यवम्।

॥१९॥मधुश्चारवइतिमधुऽश्चारवः।सुपिप्पलइतिसुऽपिप्पलः।दिवम्।
अग्रेण।अस्पृक्षत्।आ।अंतरिक्षम्।पृथिवीम्।अदृंहीत्॥२०॥स्वा
सस्थमितिसुऽआसस्थम्।इंद्रेण।आसन्नमित्याऽसन्नम्।अन्या।बर्ही
ंषि।अभि।अभूत्॥२१॥स्विष्टमितिसुऽइष्टम्।कुर्वन्।स्विष्टकृदि
तिस्विष्टऽकृत्।स्विष्टमितिसुऽइष्टम्।अद्य।करोतु।नः॥२२॥इंद्रा
य।छागम्।इंद्राय।छागेन।अघत्।तम्।मेदस्तः।प्रति।पचता।अ

गृभीत। अवीवृधत। पुरोळाशेन॥२३॥७॥ समिधानमितिसम्ऽ
इधानम्। महत्। यशः। सुसमिद्धमितिसुऽसमिद्धम्। वरेण्यम्। अ
ग्निम्। इंद्रम्। वयोधसमितिवयःऽधसम्। गायत्रीम्। छंदः। इंद्रि
यम्। त्र्यविमितित्रिऽअविम्। गाम्। वयः। दधत्॥२४॥ तनून
पातमितितनूऽनपातम्। उभ्दिदमित्युत्ऽभिदम्। यम्। गर्भम्। अ
दितिः। दधे। शुचिम्। उष्णिहम्। दित्यवाहमितिदित्यऽवाहम्॥२५

ईळेन्यम्। ईळितम्। वृत्रहंतममितिवृत्रहन्ऽतमम्। इळाभिः। ईड्यम्। सहः।
सोमम्। अनुष्टुभम्। अनुस्तुभमित्यनुऽस्तुभम्। पंचाविमितिपंचऽअवि
म्॥२६॥ सुबर्हिषमितिसुऽबर्हिषम्। पूषण्वंतमितिपूषण्ऽवंतम्। अ
मर्त्यम्। सीदंतम्। बर्हिषि। प्रिये। अमृता। बृहतीम्। त्रिवत्समितित्रिऽव
त्सम्॥२७॥ व्यचस्वतीः। सुप्रायणाः। सुप्रायणाइतिसुऽप्रायनाः। ऋ
तावृधः। ऋतवृध इत्यृतऽवृधः। द्वारः। देवीः। हिरण्ययीः। ब्रह्माणम्।

॥प॰॥
॥८५॥

पंक्तिम्। इह। तुर्यवाहमिति तुर्यऽवाहम्॥२८॥ सुपेशसेति सुऽपेशसा। सु
शिल्पे इति सुऽशिल्पे। बृहती इति बृहती। उभे इति। स्कभे। नक्तोषासा। नक्तो
षसेति नक्ताऽउषसा। न। दर्शते इति दर्शते। विश्वम्। त्रिष्टुभम्। त्रिष्टुभमि
ति त्रिऽस्तुभम्। पष्ठवाहमिति पष्ठऽवाहम्॥२९॥ प्रचेतसेति प्रऽचेतसा।
देवानाम्। उत्तममित्युत्ऽतमम्। यशः। होतारा। दैव्या। कवी इति कवी।
सयुजेति सऽयुजा। जगतीम्। अनड्वाहम्॥३०॥ पेशस्वतीः। तिस्रः। दे

॥रा॥
८९

वीः। हिरण्ययीः। भारतीः। बृहतीः। महीः। पतिम्। विराजमिति विऽरा
जम्। धेनुम्। न॥३१॥ सुरेतसमिति सुऽरेतसम्। त्वष्टारम्। पुष्टिवर्द्धन
मिति पुष्टिऽवर्द्धनम्। रूपाणि। बिभ्रतम्। पृथक्। पुष्टिम्। द्विपदमिति
द्विऽपदम्। उक्षाणम्॥३२॥ हिरण्यपर्णमिति हिरण्यऽपर्णम्। उक्थि
नम्। रशनाम्। बिभ्रतम्। वशिम्। भगम्। ककुभम्। वशाम्। वेहतम्
॥३३॥ स्वाहावतीरिति स्वाहाऽवतीः। अग्निम्। गृहपतिमिति गृहऽ

प० ॥
१०॥

भ

पतिम्। पृथक्। चरणम्। भेषजम्। कविम्। क्षत्रम्। अतिछंदसमित्य
तिंछंदसम्। बृहत्। ऋषभम्॥ ३४॥ देवम्। बर्हिः। वयोधसमिति वयःऽध
सम्। देवम्। इंद्रम्। अवर्द्धयत्॥ गायत्र्या। छंदसा। इंद्रियम्। चक्षुः। इं
द्रे। वयः। दधत्॥ ३५॥ शुचिम्। उष्णिहा। प्राणम्। अनुष्टुभा। अनुस्त
भेत्यनुऽस्तुभा। बलम्। बृहत्या। श्रोत्रम्। पंक्त्या। शुक्रम्। देवी। त्रिष्टुभा
त्रिस्तुभेति त्रिऽस्तुभा। त्विषिम्। जगत्या। ऋषभम्। विराजेति विऽराजा॥

रा०
१०

रूपम्। द्विपदेति द्विऽपदा। भगम्। ककुभा। यशः। अतिछंदसेत्यतिछंद
सा। क्षत्रम्। इंद्राय। वयोधस इति वयःऽधसे। छागम्। इंद्राय। वयोध
स इति वयःऽधसे। छागेन॥ ३६॥ छ॥ छ॥ छ॥ इति शुक्लयजुः का
ण्वसंहितायां पदपाठे त्रिंशोध्यायः॥ ३०॥ छ॥ शुभं भवतु॥ छ॥ या
दृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशुद्धं वा मम दोषो
न विद्यते॥ छ॥ इदं तृतीयदशकं रामकृष्णोपनाम्ना सदाशिवेलिखितं॥

॥ इतितृतीयदशकंसमासं ॥
॥ शुभंभवतु ॥

॥ अथचतुर्थदशकप्रारंभः ॥

प॰ १

श्रीगणेशाय नमः ॥ श्रीनीलकंठेश्वराय नमः ॥ हरिः ॐ ॥ समिद्ध इति सम्ऽइद्धः । अंजन् । कृदरम् । मतीनाम् । घृतम् । अग्ने । मधुमदिति मधुऽमत् । पिन्वमानः । वाजी । वहन् । वाजिनम् । जातवेद इति जातऽवेदः । देवानाम् । वक्षि । प्रियम् । आ । सधस्थमिति सधऽस्थम् ॥ १ ॥ घृतेन । अंजन् । सम् । पथः । देवयानानीति देवऽयानानि । प्रजानन्निति प्रऽजानन् । वाजी । अपि । एतु । देवान् । अनु । त्वा । सप्ते । प्रदिश इति प्रऽदि

२

शः । सचंताम् । स्वधाम् । अस्मै । यजमानाय । धेहि ॥ २ ॥ ईड्यः । च । असि । वंद्यः । च । वाजिन् । आशुः । च । असि । मेध्यः । च । सप्ते । अग्निः । त्वा । देवैः । वसुभिरिति वसुऽभिः । सजोषा इति सऽजोषाः । प्रीतम् । वह्निम् । वहतु । जातवेदा इति जातऽवेदाः ॥ ३ ॥ स्तीर्णम् । बर्हिः । सुष्टरीम । सुस्तरीमेति सुऽस्तरीम । जुषाणा । उरु । पृथु । प्रथमानम् । पृथिव्याम् । देवेभिः । युक्तम् । अदितिः । सजोषा इति सऽजोषाः । स्योनम् ।

॥प॰॥
॥२॥

वृण्वाना। सुविते। दधातु॥४॥ एताः। ऊं इति। वः। सुभगा इति सुऽभगाः। विश्वरूपा इति विश्वऽरूपाः। वि। पक्षोभिरिति पक्षःऽभिः। श्रयमाणाः। उत्। आतैः। ऋष्वाः। सतीः। कवषः। शुंभमानाः। द्वारः। देवीः। सुप्रायणाः। सुप्रायना इति सुऽप्रायनाः। भवंतु॥७॥ प्र। अंतरा। मित्रावरुणा। चरंती इति चरंती। मुखम्। यज्ञानाम्। अभि। संविदाने इति सम्ऽविदाने। उषासा। उषसेत्युषसा। वाम्। सुहिरण्ये इति सुऽहिरण्ये। सुशिल्पे

रा॰
२

इति सुऽशिल्पे। ऋतस्य। योनौ। इह। सादयामि॥६॥ प्रथमा। वाम्। सरथिनेति सऽरथिना। सुवर्णेति सुऽवर्णा। देवौ। पश्यंतौ। भुवनानि। विश्वा। अपिप्रयम्। चोदना। वाम्। मिमाना। होतारा। ज्योतिः। प्रदिशेति प्रऽदिशा। दिशंता॥७॥ आदित्यैः। नः। भारती। वष्टु। यज्ञम्। सरस्वती। सह। रुद्रैः। नः। आवीत्। इळा। उपहूतेत्युपऽहूता। वसुभिरिति वसुऽभिः। सजोषा इति सऽजोषाः। यज्ञम्। नः। देवीः। अमृतेषु। धत्त॥८॥ त्वष्टा। वीरम्। दे

प॰
३

वऽकाममितिदेवऽकामम्। जजान। त्वष्टुः। अर्वा। जायते। आशुः। अश्वः। त्व
ष्टा। इदम्। विश्वम्। भुवनम्। जजान। बहोः। कर्तारम्। इह। यक्षि। होतरि
तिहोतः॥९॥ अश्वः। घृतेन। त्मन्या। समक्तइतिसम्ऽअक्तः। उप। देवान्।
ऋतुशइत्यृतुऽशः। पाथः। एतु। वनस्पतिः। देवलोकमितिदेवऽलोकम्। प्र
जानन्नितिप्रऽजानन्। अग्निना। हव्या। स्वदितानि। वक्षत्॥१०॥ प्रजा
पतेरितिप्रजाऽपतेः। तपसा। वावृधानः। ववृधानइतिववृधानः। स

रा॰
३

द्यः। जातः। दधिषे। यज्ञम्। अग्ने। स्वाहाकृतेनेतिस्वाहाऽकृतेन। हविषा। पु
रोगाइतिपुरःऽगाः। याहि। साध्या। हविः। अदन्तु। देवाः॥११॥ केतुम्। कृण्वन्।
अकेतवे। पेशः। मर्याः। अपेशसे। सम्। उषद्भिरित्युषत्ऽभिः। अजायथाः
॥१२॥ जीमूतस्येवेतिजीमूतस्यऽइव। भवति। प्रतीकम्। यत्। वर्मी।
याति। समदामितिसऽमदाम्। उपस्थइत्युपऽस्थे। अनाविद्धया। तन्वा।
जय। त्वम्। सः। त्वा। वर्मणा। महिमा। पिपर्तु॥१३॥ धन्वना। गाः। ध

२ ति

न्वना। आजिम्। जयेम। धन्वना। तीव्राः। समदइतिसऽमदः। जयेम। ध
नुः। शत्रोः। अपकाममित्यपऽकामम्। कृणोति। कृणोति। धन्वना। सर्वाः
प्रदिशइतिप्रऽदिशः। जयेम॥१४॥ नेऽइति। आचरंतीइत्याऽचरंती। सम
नेवेतिसमनाऽइव। योषा। मातेवेतिमाताऽइव। पुत्रम्। बिभृताम्।
उपस्थइत्युपऽस्थे। अप। शत्रून्। विध्यताम्। संविदानेइतिसम्ऽवि
दाने। आर्त्नीइत्यार्त्नी। इमेइतीमे। विष्फुरंती। विस्फुरंतीइतिविऽस्फु

रंती। अमित्रान्॥१५॥ वक्ष्यंतीवेतिवक्ष्यंतीऽइव। इत्। आ। गनीगंति।
कर्णम्। प्रियम्। सखायम्। परिषस्वजाना। परिसस्वजानेतिपरिऽसस्व
जाना। योषेवेतियोषाऽइव। शिंक्ते। विततेतिविऽतता। अधि। धन्वन्।
ज्या। इयम्। समने। पारयंती॥१६॥ अहिरिवेत्यहिःऽइव। भोगैः। परि।
एति। बाहुम्। ज्यायाः। हेतिम्। परिबाधमानइतिपरिऽबाधमानः। ह
स्तघ्नइतिहस्तऽघ्नः। विश्वा। वयुनानि। विद्वान्। पुमान्। पुमांऽसम्। प

॥ ऋ॰ ॥
॥ ५ ॥

रिः । पातु । विश्वतः ॥ १७ ॥ बह्वीनाम् । पिता । बहुः । अस्य । पुत्रः । चिश्चा । कृणोति ।
समना । अवऽगत्य । इषुधिरितीषुऽधिः । संकाः । पृतनाः । च । सर्वाः ।
पृष्ठे । निनद्ध इति निःऽनद्धः । जयति । प्रसूत इति प्रऽसूतः ॥ १८ ॥ सुपर्णमि
तिसुऽपर्णम् । वस्ते । मृगः । अस्याः । दंतः । गोभिः । सन्नद्धा । पतति । प्रसू
तेति प्रऽसूता । यत्र । नरः । सम् । च । वि । च । द्रवंति । तत्र । अस्मभ्यम् । इ
षवः । शर्म । यंसन् ॥ १९ ॥ वनस्पते । वीड्वंग इति विडुऽअंगः । हि । भूयाः ।

तिसम्ऽन
द्धा

रा
५

अस्मत्सखेत्यस्मत्ऽसखा । प्रतरण इति प्रऽतरणः । सुवीर इति सुऽवीरः । गोभिः ।
सन्नद्ध इति सम्ऽनद्धः । असि । वीळयस्व । आस्थातेत्याऽस्थाता । ते । जयतु । जे
त्वानि ॥ २० ॥ रथे । तिष्ठन् । नयति । वाजिनः । पुरः । यत्रयत्रेति यत्रऽयत्र । का
मयते । सुषारथिः सुसारथिरिति सुऽसारथिः । अभीशूनाम् । महिमान
म् । पनायत । मनः । पश्चात् । अनु । यच्छंति । रश्मयः ॥ २१ ॥ आ । जंघंति ।
सानु । एषाम् । जघनान् । उप । जिघ्नते । अश्वाजनीत्यश्वऽअजनि । प्रचेत

॥ प० ॥
॥ ६ ॥

सऽइतिप्रऽचेतसः।अश्वान्।समऽहिवितिसमऽत्ऽसु।चोदय॥२२॥उपाश्वा
श्वासय।पृथिवीम्।उत।द्याम्।पुरुत्रेतिपुरुऽत्रा।ते।मनुताम्।विष्ठितम्।
विस्थितमितिविऽस्थितम्।जगत्।सः।दुंदुभे।सजूरितिसऽजूः।इंद्रेण।
देवैः।दूरात्।दवीयः।अप।सेध।शत्रून्॥२३॥७॥यत्।अक्रंदः।प्रथम
म्।जायमानः।उद्यन्नित्युत्ऽयन्।समुद्रात्।उत।वा।पुरीषात्।श्येन
स्य।पक्षा।हरिणस्य।बाहूइतिबाहू।उपस्तुत्यमित्युपऽस्तुत्यम्।महि।जा

रा० ६

तम्।ते।अर्वन्॥२४॥यमेन।दत्तम्।त्रितः।एनम्।आयुनक्।अयुनगित्य
युनक्।इंद्रः।एनम्।प्रथमः।अधि।अतिष्ठत्।गंधर्वः।अस्य।रशनाम्।
अगृभ्णात्।सूरात्।अश्वम्।वसवः।निः।अतष्ट॥२५॥असि।यमः।अ
सि।आदित्यः।अर्वन्।असि।त्रितः।गुह्येन।व्रतेन।असि।सोमेन।सम
या।विपृक्तइतिविऽपृक्तः।आहुः।ते।त्रीणि।दिवि।बंधनानि॥२६॥त्रीणि।
ते।आहुः।दिवि।बंधनानि।त्रीणि।अप्स्वित्यप्ऽसु।त्रीणि।अंतरिस्यंतः

समुद्रे । उतेवेत्युतऽइव । मे । वरुणः । छन्त्सि । अर्वन् । यत्र । ते । आहुः । परमम् ।
जनित्रम् ॥ २७ ॥ ४ ॥ इमा । ते । वाजिन् । अवमार्जनानी त्यवऽमार्जनानि ।
इमा । शफानाम् । सनितुः । निधानेति निऽधाना । अत्र । ते । भद्राः । रशनाः ।
अपश्यम् । ऋतस्य । याः । अभिरक्षंती त्यभिऽरक्षंति । गोपाः ॥ २८ ॥ आ
त्मानम् । ते । मनसा । आरात् । अजानाम् । अवः । दिवा । पतयंतम् । पतं
गम् । शिरः । अपश्यम् । पथिभिरिति पथिऽभिः । सुगेभिरिति सुऽगेभिः ।

अरेणुभिरित्यरेणुऽभिः । जेहमानम् । पतत्रि ॥ २९ ॥ अत्र । ते । रूपम् । उत्तममि
त्युत्ऽतमम् । अपश्यम् । जिगीषमाणम् । इषः । आ । पदे । गोः । यदा । ते । मर्तः ।
अनु । भोगम् । आनट् । आत् । इत् । ग्रसिष्ठः । ओषधीः । अजीगरित्यजीगः ॥
३० ॥ अनु । त्वा । रथः । अनु । मर्य्यः । अर्वन् । अनु । गावः । अनु । भगः । कनी
नाम् । अनु । व्रातासः । तव । सख्यम् । ईयुः । अनु । देवाः । ममिरे । वीर्य्यम् ।
ते ॥ ३१ ॥ हिरण्यशृंग इति हिरण्यऽशृंगः । अयः । अस्य । पादाः । मनोज

वाऽइति मनः ऽजवाः। अवरः। इंद्रः। आसीत्। दिवाः। इत्। अस्य। हविः इषुमि
ति हविः ऽअधम्। आयन्। यः। अर्वंतम्। प्रथमः। अध्यतिष्ठत् इत्यधि ऽअ
तिष्ठत्। ॥ ३२ ॥ ईर्मान्तासऽइतीर्मि ऽअंतासः। सिलिकमध्यमासऽइति सि
लिकऽमध्यमासः। सम्। शूरणासः। दिव्यासः। अत्याः। हंसाऽइवेति हं
सः ऽइव। श्रेणिशऽइति श्रेणि ऽशः। यतंते। यत्। आक्षिषुः। दिव्यम्।
अज्मम्। अश्वाः। ॥ ३३ ॥ तव। शरीरम्। पतयिष्णु। अर्वन्। तव। चित्तम्।

वातऽइवेति वातः ऽइव। ध्रजीमान्। तव। शृंगाणि। विष्ठिता। विस्थितेति
विऽस्थिता। पुरुत्रेति पुरुऽत्रा। अरण्येषु। जर्भुराणा। चरंति। ॥ ३४ ॥ उप।
प्र। अगात्। शसनम्। वाजी। अर्वा। देवद्रीचा। मनसा। दीध्यानः। अ
जः। पुरः। नीयते। नाभिः। अस्य। अनु। पश्चात्। कवयः। यंति। रेभाः। ॥
३५ ॥ परमम्। यत्। सधस्थमिति सधऽस्थम्। अर्वान्। अच्छ। पितर
म्। मातरम्। च। अद्य। देवान्। जुष्टतमऽइति जुष्टऽतमः। हि। गम्याः। अ
॥

थ। आ। अस्मे। दाशुषे। वार्याणि॥ ३६॥ ७॥ समिद्ध इति सम्ऽइद्धः। अद्य।
मनुषः। दुरोणे। देवः। देवान्। यजसि। जातवेद इति जातऽवेदः। आ। च।
वह। मित्रमह इति मित्रऽमहः। चिकित्वान्। त्वम्। दूतः। कविः। असि।
प्रचेता इति प्रऽचेताः॥ ३७॥ तनूनपादिति तनूऽनपात्। पथः। ऋत
स्य। यानान्। मध्वा। समंजन्निति सम्ऽअंजन्। स्वदय। सुजिह्वेति
ति सुऽजिह्व। मन्मानि। धीभिः। उत। यज्ञम्। ऋंधन्। देवत्रेति देवऽत्रा।

च। कृणुहि। अध्वरम्। नः॥ ३८॥ नराशंसस्य। महिमानम्। एषाम्।
उप। स्तोषाम। यजतस्य। यज्ञैः। ये। सुक्रतव इति सुऽक्रतवः। शुचयः।
धियंधा इति धियम्ऽधाः। स्वदंति। देवाः। उभयानि। हव्या॥ ३९॥।
आजुह्वान इत्याऽजुह्वानः। ईड्यः। वंद्यः। च। आ। याहि। अग्ने। व
सुभिरिति वसुऽभिः। सजोषा इति सऽजोषाः। त्वम्। देवानाम्। अ
सि। यह्व। होता। सः। एनान्। यक्षि। इषितः। यजीयान्॥ ४०॥ तव।

॥ प ॥
॥ १० ॥

प्राचीनम्। बर्हिः। प्रदिशेति प्रऽदिशा। पृथिव्याः। वस्तोः। अस्याः। वृज्य
ते। अग्रे। अह्नाम्। वि। उँ इत्यूँ। प्रथते। वितरमिति विऽतरम्। वरीयः। दे
वेभ्यः। अदितये। स्योनम्॥ ४१॥ व्यचस्वतीः। उर्विया। वि। श्रयंताम्।
पतिभ्य इति पतिऽभ्यः। न। जनयः। शुंभमानाः। देवीः। द्वारः। बृहतीः।
विश्वमिन्वा इति विश्वम्ऽइन्वाः। देवेभ्यः। भवत। सुप्रायणाः। सुप्रा
यणा इति सुऽप्रायनाः॥ ४२॥ आ। सुष्वयंती। सुस्वयंती इति सुऽस्व

॥ रा·
१०

२ नत्र

यंती। यजते इति यजते। उपाके इत्युपाके। उषासानक्ता। उषसानक्तेत्युष
सौ। सदताम्। नि। योनौ। दिव्ये इति दिव्ये। योषणे इति योषणे। बृहती
इति बृहती। सुरुक्मे इति सुऽरुक्मे। अधि। श्रियम्। शुक्रपिशमिति शु
क्रऽपिशम्। दधाने इति दधाने॥ ४३॥ दैव्या। होतारा। प्रथमा। सुवाचे
ति सुऽवाचा। मिमाना। यज्ञम्। मनुषः। यजध्यै। प्रचोदयंतेति प्रऽचोद
यंता। विदथेषु। कारू इति कारू। प्राचीनम्। ज्योतिः। प्रदिशेति प्रऽदि

॥ य० ॥
॥ ११ ॥

ष्ठा। दिप्यंता॥ ४४॥ आ। नः। यज्ञम्। भारती। तूयम्। एतु। इळा। मनुष्व
त्। इह। चेतयंती। तिस्रः। देवीः। बर्हिः। आ। इदम्। स्योनम्। सरस्वती।
स्वपसइतिसुऽअपसः। सदंतु॥ ४५॥ यः। इमेइतीमे। द्यावापृथिवीइ
तिद्यावापृथिवी। जनित्रीइतिजनित्री। रूपैः। अपिंशत्। भुवनानि।
विश्वा। तम्। अद्य। होतः। इषितः। यजीयान्। देवम्। त्वष्टारम्। इह। य
क्षि। विद्वान्॥ ४६॥ उपावसृजेत्युपऽअवसृज। त्मन्या। समंजन्नि

॥ रा० ॥
११

तिसम्ऽअंजन्। देवानाम्। पाथः। ऋतुथेत्यृतुऽथा। हवींषि। वन
स्पतिः। शमिता। देवः। अग्निः। स्वदंतु। हव्यम्। मधुना। घृतेन॥ ४७॥
सद्यः। जातः। वि। अमिमीत। यज्ञम्। अग्निः। देवानाम्। अभवत्। पु
रोगाइतिपुरःऽगाः। अस्य। होतुः। प्रदिषीतिप्रऽदिषि। ऋतस्य। वाचि।
स्वाहाकृतमितिस्वाहाऽकृतम्। हविः। अदंतु। देवाः॥ ४८॥ ६॥ अग्न
ये। गायत्राय। त्रिवृतइतित्रिऽवृते। राथंतरायेतिराथम्ऽतराय। अ

॥ प॰ ॥
॥ १२ ॥

ष्टाकपाल इत्यष्टाऽकपालः। इंद्राय। त्रैष्टुभाय। त्रैस्तुभायेति त्रैऽस्तुभाय।
पंचदशायेति पंचऽदशाय। बार्हताय। एकादशकपाल इत्येकादशऽकपा
लः। विश्वेभ्यः। देवेभ्यः। जागतेभ्यः। सप्तदशेभ्य इति सप्तऽदशेभ्यः। वै
रूपेभ्यः। द्वादशकपाल इति द्वादशऽकपालः। मित्रावरुणाभ्याम्। आ
नुष्टुभाभ्याम्। आनुस्तुभाभ्यामित्यानुऽस्तुभाभ्याम्। एकविंशाभ्या
मित्येकऽविंशाभ्याम्। वैराजाभ्याम्। पयस्या। बृहस्पतये। पांक्ताय।

रा॰
१२

त्रिणवाय। त्रिनवायेति त्रिऽनवाय। शाक्वराय। चरुः। सवित्रे। औष्णिहाय।
त्रयस्त्रिंशायेति त्रयःऽत्रिंशाय। रैवताय। द्वादशकपाल इति द्वादशऽक
पालः। प्राजापत्य इति प्राजाऽपत्यः। चरुः। अदित्यै। विष्णुपत्न्या इति विष्णुऽ
पत्न्यै। चरुः। अग्नये। वैश्वानराय। द्वादशकपाल इति द्वादशऽकपालः। अ
नुमत्या इत्यनुऽमत्यै। अष्टाकपाल इत्यष्टाऽकपालः। ॥४९॥ आग्नेयः। कृ
ष्णग्रीव इति कृष्णऽग्रीवः। सारस्वती। मेषी। बभ्रुः। सौम्यः। पौष्णः। श्या

॥ प॰ ॥
॥ १३ ॥

स

मः। श्चितिपृष्ठ इति श्चितिऽपृष्ठः। बार्हस्पत्यः। शिल्पः। वैश्वदेव इति वैश्वऽ
देवः। ऐंद्रः। अरुणः। मारुतः। कल्माषः। ऐंद्राग्नः। संहित इति सम्ऽहितः।
अधोरामइत्यधःऽरामः। सावित्रः। वारुणः। कृष्णः। एकशितिपादित्येकऽ
शितिपात्। पेत्वः॥ ५८॥ अग्नये। अनीकवत इत्यनीकऽवते। रोहितां
जिरिति रोहितऽअंजिः। अनड्वान्। आधोरामाइत्यधःऽरामौ। सावि
त्रौ। पौष्णौ। रजतनाभी इति रजतऽनाभी। वैश्वदेवा इति वैश्वऽदेवौ।

॥ रा॰ ॥
१३

पिशंगौ। तूपरौ। मारुतः। कल्माषः। आग्नेयः। कृष्णः। अजः। सारस्वती।
मेषी। वारुणः। पेत्वः॥ ५९॥ छ॥ छ॥ इति शुक्लयजुः काण्वसंहितायां पद
पाठ एकत्रिंशोऽध्यायः॥ ३१॥ छ॥ हरिः ॐम्॥ अस्य। अजरासः। दमाम्
अरित्राः। अर्चद्धूमास इत्यर्चत्ऽधूमासः। अग्नयः। पावकाः। श्वितीच
यः। श्वात्रासः। भुरण्यवः। वनर्षदः। वनसद इति वनऽसदः। वायवः। न।
सोमाः॥ १॥ हरयः। धूमकेतव इति धूमऽकेतवः। वातजूता इति वातऽ

जूताः। उप। घृवि। यतंते। वृथक्। अग्नयः॥२॥ यज्ञो। नः। मित्रावरुणा।
यज। देवान्। ऋतम्। बृहत्। अग्ने। यक्षि। स्वम्। दमम्॥३॥ द्विइतिद्वि। विरू
पेइतिवि॰रूपे। चरतः। स्वर्थेइतिसु॰अर्थे। अन्यान्येसन्यः॰अन्या। वत्स
म्। उप। धापयेते। धापयेते। हरिः। अन्यस्याम्। भवति। स्वधावानिति
स्वधा॰वान्। शुक्रः। अन्यस्याम्। ददृशे। सुवर्चाइतिसु॰वर्चाः॥४॥ त्री
णि। शता। त्री। सहस्राणि। अग्निम्। त्रिंशत्। च। देवाः। नव। च। अस

इति

पर्यन्। औक्षन्। घृतैः। अस्तृणन्। बर्हिः। अस्मै। आत्। इत्। होतारम्। नि।
असादयंत॥५॥ अग्निः। वृत्राणि। जंघनत्। द्रविणस्युः। विपन्यया। समि
द्धइतिसम्॰इद्धः। शुक्रः। आहुतइत्या॰हुतः॥६॥ विश्वेभिः। सोम्यम्। मधु।
अग्ने। इंद्रेण। वायुना। पिब। मित्रस्य। धामभिरितिधाम॰भिः॥७॥ आ।
यत्। इषे। नृपतिमितिनृ॰पतिम्। तेजः। आनट्। शुचि। रेतः। निषिक्त
म्। निसिक्तमितिनि॰सिक्तम्। द्यौः। अभीके। अग्निः। शर्द्धम्। अनवद्य

॥ प॰ ॥
॥ १५ ॥

म्। युवानम्। स्वाध्यमिति सुऽआध्यम्। जनयत्। सूदयत्। च॥ ८॥ अग्नि
माईं। महते। सौभगाय। तव। द्युम्नानि। उत्तमानीत्युत्ऽतमानि। सं। तु
सम्। जाऽस्पत्यम्। जाःपत्यमिति जाःऽपत्यम्। सुयममिति सुऽयमम्।
आ। कृणुष्व। शत्रूयताम्। शत्रुयतामिति शत्रुऽयताम्। अभि। तिष्ठ। म
हांसि॥ ९॥ त्वाम्। हि। मंद्रतममिति मंद्रऽतमम्। अर्कशोकैरित्यर्कऽशोकैः।
ववृमहे। महि। नः। श्रोषि। अग्ने। इंद्रम्। न। त्वा। शवसा। देवता। वायु

॥ रा ॥
१५

म्। पृणंति। राधसा। नृतमा इति नृऽतमाः॥ १०॥ त्वे इति त्वे। अग्ने। स्वाहु
तेति सुऽआहुत। प्रियासः। संतु। सूरयः। यंतारः। ये। मघवान इति मघ
ऽवानः। जनानाम्। ऊर्वान्। दयंत। गोनाम्॥ ११॥ श्रुधि। श्रुत्कर्णेति श्रुत
ऽकर्ण। वह्निभिरिति वह्निऽभिः। देवैः। अग्ने। सयावभिरिति सयावऽ
भिः। आ। सीदंतु। बर्हिषि। मित्रः। अर्यमा। प्रातर्यावाण इति प्रातःऽया
वानः। अध्वरम्॥ १२॥ विश्वेषाम्। अदितिः। यज्ञियानाम्। विश्वेषा

मू। अतिथिः। मानुषाणाम्। अग्निः। देवानाम्। अवः। आऽवृणानः इत्याऽवृ
णानः। सुमृळीकः इति सुऽमृळीकः। भवतु। जातवेदाः इति जातऽवेदाः॥१३॥
महः। अग्नेः। समिधानस्येति सम्ऽइधानस्य। शर्मणि। अनागाः। मित्रे।
वरुणे। स्वस्तये। श्रेष्ठे। स्याम। सवितुः। सवीमनि। तत्। देवानाम्। अवः।
अद्य। वृणीमहे॥१४॥ आपः। चित्। पिप्युः। स्तर्यः। न। गावः। नक्षन्। ऋ
तम्। जरितारः। ते। इंद्र। याहि। वायुः। न। नियुत इति निऽयुतः। नः। अच्छ।

त्वम्। हि। धीभिः। दयसे। वि। वाजान्॥१५॥ गावः। उप। अवत। अवतम्।
मही इति मही। यज्ञस्य। रप्सुदा। उभा। कर्णा। हिरण्यया॥१६॥ यत्। अ
द्य। सूरे। उदित इत्युत्ऽइते। अनागाः। मित्रः। अर्यमा। सुवाति। सविता।
भगः॥१७॥ आ। सुते। सिंचत। श्रियम्। रोदस्योः। अभिश्रियमित्यभिऽ
श्रियम्। रसा। दधीत। वृषभम्॥१८॥ आऽतिष्ठंतमित्याऽतिष्ठंतम्। परि।
विश्वे। अभूषन्। श्रियः। वसानः। चरति। स्वरोचिरिति स्वऽरोचिः। म

॥ प ॥
॥ १७ ॥

हत् । तत् । वृष्णः । असुरस्य । नाम । आ । विश्वरूप इति विश्वऽरूपः । अमृ
तानि । तस्थौ ॥ १९ ॥ प्र । वः । महे । मंदमानाय । अंधसः । अर्च । विश्वान
राय । विश्वाभुवे । विश्वभुव इति विश्वऽभुवे । इंद्रस्य । यस्य । सुमखमि
ति सुऽमखम् । सहः । महि । श्रवः । नृम्णम् । च । रोदसी इति । रोदसी । सप
र्यतः ॥ २० ॥ बृहत् । इत् । इध्मः । एषाम् । भूरि । शस्तम् । पृथुः । स्वरुः ॥ २१ ॥
इंद्र । आ । इहि । मत्सि । अंधसः । विश्वेभिः । सोमपर्वभिरिति सोमऽप

॥ रा ॥
॥ १७ ॥

र्वऽभिः । महान् । अभिष्टिः । ओजसा ॥ २२ ॥ इंद्रः । वृत्रम् । अवृणोत् । शर्द्ध
नीतिरिति शर्द्धऽनीतिः । प्र । मायिनाम् । अमिनात् । वर्पणीतिः । वर्पनी
तिरिति वर्पऽनीतिः । अहन् । व्यंसमिति विऽअंसम् । उशधक् । वने
षु । आविः । धेनाः । अकृणोत् । राम्याणाम् ॥ २३ ॥ कुतः । त्वम् । इंद्र । मा
हिनः । सन् । एकः । यासि । सत्पत इति सत्ऽपते । किम् । ते । इत्था । सम् ।
पृच्छसे । समराण इति सम्ऽअराणः । शुभानैः । वोचेः । तत् । नः । हरिव

॥प०॥
॥९६॥

इतिहरिऽवः। यत्। ते। अस्मेइत्यस्मे॥२४॥ आ। तत्। ते। इंद्र। आयवः। पनं
त। अभि। ये। ऊर्वम्। गोमंतमितिगोऽमंतम्। तितृत्सान्। सकृत्स्वमितिस
कृत्ऽस्वम्। ये। पुरुपुत्रामितिपुरुऽपुत्राम्। महीम्। सहस्रधारामितिसह
स्रऽधाराम्। बृहतीम्। दुदुक्षन्। दुधुक्षन्नितिदुधुऽक्षन्॥२५॥ इमाम्। ते।
धियम्। प्र। भरे। महः। महीम्। अस्य। स्तोत्रे। धिषणा। यत्। ते। आनजे।
तम्। उत्सवइत्युत्ऽसवे। च। प्रसवइतिप्रऽसवे। च। सासहिम्। ससहिमि

॥रा०॥
॥९६॥

तिससहिम्। इंद्रम्। देवासः। शवसा। अमदन्। अनु॥२६॥७॥ विभ्रा
डितिविऽभ्राट्। बृहत्। पिबतु। सोम्यम्। मधु। आयुः। दधत्। यज्ञपताउ
इतियज्ञऽपतौ। अविहुतमित्यविऽहुतम्। वातजूतइतिवातऽजूतः। यः।
अभिरक्षतीत्यभिऽरक्षति। त्मना। प्रजाइतिप्रऽजाः। पुपोष। पुरुधा।
वि। राजति॥२६॥ येन। पावक। चक्षसा। भुरण्यंतम्। जनान्। अनु। त्व
म्। वरुण। पश्यसि॥२७॥ दैव्यौ। अध्वर्यूइत्यध्वर्यू। आ। गतम्। रथे

ना। सूर्य्यत्वचेति सूर्य्यऽत्वचा। मध्वा। यज्ञम्। सम्। अंजाथेइति संऽअंजाथे॥ २८॥
आ। नः। ऋक्वाभिः। विदथे। सुशस्तीति सुऽशस्ति। विश्वानरः। सविता।
देवः। एतु। अपि। यथा। युवानः। मत्सथ। नः। विश्वम्। जगत्। अभिपि
त्वइत्यभिऽपित्वे। मनीषा॥ २९॥ यत्। अद्य। कत्। च। वृत्रहन्निति वृत्रऽ
हन्। उदगाइत्युत्ऽअगाः। अभि। सूर्य्य। सर्वम्। तत्। इंद्र। ते। वशे॥ ३०॥
तरणिः। विश्वदर्शत इति विश्वऽदर्शतः। ज्योतिष्कृत्। ज्योतिःकृदिति ज्यो

तिःऽकृत्। असि। सूर्य्य। विश्वम्। आ। भासि। रोचनम्॥ ३१॥ तत्। सूर्य्यस्य।
देवत्वमिति देवऽत्वम्। तत्। महित्वमिति महिऽत्वम्। मध्या। कर्तोः। विततमि
ति विऽततम्। सम्। जभार। यदा। इत्। अयुक्त। हरितः। सधस्थादिति स
धऽस्थात्। आत्। रात्री। वासः। तनुते। सिमस्मै॥ ३२॥ तत्। मित्रस्य। वरु
णस्य। अभिचक्षइत्यभिऽचक्षे। सूर्य्यः। रूपम्। कृणुते। द्योः। उपस्थइत्यु
पऽस्थे। अनंतम्। अन्यत्। रुशत्। अस्य। पाजः। कृष्णम्। अन्यत्। हरि

॥ प० ॥
॥ २० ॥

पनस्यते

तः । सम् । भरंति ॥ ३३ ॥ बट् । महान् । असि । सूर्य्य । बट् । आदित्य । महान् । अ
सि । महः । ते । सतः । महिमा । पनस्यते । अद्धा । देव । महान् । असि ॥ ३४ ॥ बट् ।
सूर्य्य । श्रवसा । महान् । असि । सत्रा । देव । महान् । असि । मन्हा । देवानाम् । अ
सुर्य्यः । पुरोहित इति पुरःऽहितः । विभ्विति विऽभु । ज्योतिः । अदाभ्यम् ॥
३५ ॥ श्रायंतइवेति श्रायंतःऽइव । सूर्यम् । विश्वा । इत् । इंद्रस्य । भक्षत । व
सूनि । जाते । जनमाने । ओजसा । प्रति । भागम् । न । दीधिम ॥ ३६ ॥ अघ्या

॥ रा ॥
॥ २० ॥

४ य

देवाः । उदितेत्युत्ऽइता । सूर्य्यस्य । निः । अंहसः । पिपृत । निः । अवद्यात् ।
तत् । नः । मित्रः । वरुणः । मामहंताम् । ममहंतामिति ममहंताम् । अदितिः ।
सिंधुः । पृथिवी । उत । द्यौः ॥ ३७ ॥ आ । कृष्णेन । रजसा । वर्तमानः । निवे
शयन्निति निऽवेशयन् । अमृतम् । मर्त्यम् । च । हिरण्ययेन । सविता । रथेन ।
आ । देवः । याति । भुवनानि । पश्यन् ॥ ३८ ॥ ७ ॥ प्र । वावृजे । ववृज इति व
वृजे । सुप्रया इति सुऽप्रयाः । बर्हिः । एषाम् । आ । विश्पतीव । विश्पतीइवे

ति विश्पती ऽइव । बिरिटे । इयाते इती याते । विशाम् । अक्तोः । उषसः । पू
र्वहूताविति पूर्वऽहूतौ । वायुः । पूषा । स्वस्तये । नियुत्वान् ॥ ३९ ॥ इंद्रवायू
इतींद्रऽवायू । बृहस्पतिम् । मित्रा । अग्निम् । पूषणम् । भगम् । आदित्या
न् । मारुतम् । गणम् ॥ ४० ॥ वरुणः । प्रावितेति प्रऽअविता । भुवत् । मि
त्रः । विश्वाभिः । ऊतिभिरित्यूतिऽभिः । करताम् । नः । सुराधस इति
सुऽराधसः ॥ ४१ ॥ अधि । नः । इंद्र । एषाम् । विष्णो इति विष्णो । सजा

त्यानामिति सऽजात्यानाम् । इत । मरुतः । अश्विना ॥ ४२ ॥ अग्ने । इंद्र । व
रुण । मित्र । देवाः । शर्धः । प्र । यंत । मारुत । उत । विष्णो इति विष्णो । उभा । ना
सत्या । रुद्रः । अध । ग्नाः । पूषा । भगः । सरस्वती । जुषंत ॥ ४३ ॥ इंद्राग्नी इ
तींद्राग्नी । मित्रावरुणा । अदितिम् । स्वरिति स्वः । पृथिवीम् । द्याम् । म
रुतः । पर्वतान् । अपः । हुवे । विष्णुम् । पूषणम् । ब्रह्मणः । पतिम् । भगम् ।
नु । शंसम् । सवितारम् । ऊतये ॥ ४४ ॥ अस्मे इत्यस्मे । रुद्राः । मेहना ॥

॥ प॰ ॥
॥ २२ ॥

पर्वतासः। वृत्रहत्यइति वृत्रऽहत्ये। भरहूताविति भरऽहूतौ। सजोषाइति सऽ
जोषाः। यः। शंसंतं। स्तुवंतं। धायि। पज्रः। इंद्रज्येष्ठाइतींद्रऽज्येष्ठाः। अ
स्मान्। अवंतु। देवाः॥ ४५॥ अर्वांचः। अद्य। भवत। यजत्राः। आ। वः।
हार्दि। भयमानः। व्ययेयम्। त्राध्वम्। नः। देवाः। निजुरइति निऽजुरः।
वृकस्य। त्राध्वम्। कर्तात्। अवपदइत्यवऽपदः। यजत्राः॥ ४६॥ विश्वे।
देवाः। शृणुत। इमम्। हवम्। मे। ये। अंतरिक्षे। ये। उप। द्यवि। स्थ।

॥ रा॰ ॥
॥ २२

अग्निजिह्वाइत्यग्निऽजिह्वाः। उत। वा। यजत्राः। आसद्येत्याऽसद्य।
अस्मिन्। बर्हिषि। मादयध्वम्॥ ४७॥ देवेभ्यः। हि। प्रथमम्। यज्ञिये
भ्यः। अमृतत्वमित्यमृतऽत्वम्। सुवसि। भागम्। उत्तममित्युत्ऽत
मम्। आत्। इत्। दामानम्। सवितः। वि। ऊर्णुषे। अनूचीना। जीविता।
मानुषेभ्यः॥ ४८॥ प्र। वायुम्। अच्छ। बृहती। मनीषा। बृहद्रयिमिति
बृहत्ऽरयिम्। विश्ववारमिति विश्वऽवारम्। रथप्रामिति रथऽ

॥ प॰ ॥
॥ २३ ॥

मा

वरुणम्

ग्रामम्। सुतयामिति सुत॰ यामम्। नियुत इति नि॰ युतः। पस्यमानः। कुविः।
कुविम्। इयक्षसि। प्रयज्योइति प्र॰ यज्यो॥ ४९॥ मित्रम्। हुवे। पूतद
क्षमिति पूत॰ दक्षम्। च। रिशादसम्। धियम्। घृताचीम्। साधंता॥
५०॥ दस्रा। युवाकवः। सुताः। नासत्या। वृक्तबर्हिष इति वृक्त॰ बर्हिषः।
आ। यातम्। रुद्रवर्तनी इति रुद्र॰ वर्तनी॥ ५१॥ विदत्। यदीं। सुर
मा। रुग्णम्। अद्रेः। महि। पाथः। पूर्व्यम्। सध्र्यक्। कुरिति कः। अग्र

॥ रा॰ ॥
॥ २३ ॥

म्। नयत्। सुपदीति सु॰ पदी। अक्षराणाम्। अछ। रवम्। प्रथमा। जान
ती। गात्॥ ५२॥ नहि। स्पशम्। अविदन्। अन्यम्। अस्मात्। वैश्वानरा
त्। पुरएतारमिति पुरः॰ एतारम्। अग्नेः। आ। ईम्। एनम्। अवृधन्। अ
मृताः। अमर्त्यम्। वैश्वानरम्। क्षैत्रजित्यायेति क्षैत्र॰ जित्याय। देवाः।
५३॥ उग्रा। विघनिनेति वि॰ घनिना। मृधः। इंद्राग्नीइतींद्राग्नी। हवा
महे। ता। नः। मृळातः। ईदृशे॥ ५४॥ उप। अस्मै। गायत। नरः। पव

मानाय। इंद्रं। देवी। अभि। द्युमान्। इयक्षति॥५५॥ ये। त्वा। अहिहत्यइत्यहिऽ
हत्ये। मघवन्निति मघऽवन्। अवर्द्धन्। ये। शांबरे। हरिवइतिहरिऽवः। ये।
गोइष्टाइतिगोऽइष्टौ। ये। त्वा। नूनम्। अनुमदंतीत्यनुऽमदंति। विप्राः। पि
ब। इंद्र। सोमम्। सगणइतिसऽगणः। मरुद्भिरितिमरुत्ऽभिः॥५६॥
जनिष्ठाः। उग्रः। सहसे। तुराय। मंद्रः। ओजिष्ठः। बहुलाभिमानइतिब
हुलऽअभिमानः। अवर्द्धन्। इंद्रम्। मरुतः। चित्। अत्र। माता। यत्। वी

रम्। दधनत्। धनिष्ठाः॥५७॥ आ। तु। नः। इंद्र। वृत्रहन्निति वृत्रऽहन्।
अस्माकम्। अर्द्धम्। आ। गहि। महान्। महीभिः। ऊतिभिरित्यूतिऽभिः।
५८॥ त्वम्। इंद्र। प्रतूर्तिष्वितिप्रऽतूर्तिषु। अभि। विश्वाः। असि। स्पृधः।
अशस्तिहेत्यशस्तिऽहा। जनिता। विश्वतूरितिविश्वऽतूः। असि। त्वम्।
तूर्य। तरुष्यतः॥५९॥ अनु। ते। शुष्मम्। तुरयंतम्। ईयतुः। क्षोणीइति
क्षोणी। शिशुम्। न। मातरा। विश्वाः। ते। स्पृधः। श्नथयंत। मन्यवे।

॥

॥प०॥
॥२५॥

वृत्रम्।यत्।इंद्र।तूर्वसि॥६०॥अदब्धेभिः।सवितरितिसवितः।पा
युभिरितिपायुऽभिः।त्वम्।शिवेभिः।अद्य।परि।पाहि।नः।गयम्।
हिरण्यजिह्वइतिहिरण्यऽजिह्वः।सुविताय।नव्यसे।रक्ष।माकिः।
नः।अघशंसइत्यघऽशंसः।ईशत॥६१॥७॥प्र।वीरयेतिवीरऽ
या।शुचयः।दद्रिरे।वाम्।अध्वर्युभिरित्यध्वर्युऽभिः।मधुमंतइ
तिमधुऽमंतः।सुतासः।वह।वायोइतिवायो।नियुतइतिनिऽयुतः।

॥रा०॥
॥२५॥

पाहि।अच्छ।पिब।सुतस्य।अंधसः।मदाय॥६२॥काव्ययोः।आजा
निष्विति।आऽजानेषु।क्रत्वा।दक्षस्य।दुरोणे।रिशादसा।सधस्थइतिस
धऽस्थे।आ॥६३॥तिरश्चीनः।विततइतिविऽततः।रश्मिः।एषाम्
अधः।स्वित्।आसीत्।उपरि।स्वित्।आसीत्।रेतोधाइतिरेतःऽ
धाः।आसन्।महिमानः।आसन्।स्वधा।अवस्तात्।प्रयतिरि
तिप्रऽयतिः।परस्तात्॥६४॥आ।रोदसीइतिरोदसी।अपृणत्।

प॥
॥२६॥

आ। स्वः। महत्। जातम्। यत्। एनम्। अपसः। अधारयन्। सः। ऽअ
ध्वराय। परि। नीयते। कविः। अत्यः। न। वाजऽसातये। इति वाजऽसात
ये। चनःऽहितः। इति चनःऽहितः॥६५॥ उक्थेभिः। वृत्रहन्ऽतमम्। इति वृत्र
हन्ऽतमा। या। मंदाना। चित्। आ। गिरा। आंगूषैः। आविवासत इ
त्याऽविवासतः॥६६॥ उप। नः। सूनवः। गिरः। शृण्वंतु। अमृतस्य।
ये। सुमृळीका इति सुऽमृळीकाः। भवंतु। नः॥६७॥ ब्रह्माणि। मि

रा
२६

मतयः। शम्। सुतासः। शुष्मः। इयर्ति। प्रभृत इति प्रऽभृतः। मे।
अद्रिः। आ। शासते। प्रति। हर्यंति। उक्था। इमा। हरी इति हरी। वह
तः। ता। नः। अछ॥६८॥ अनुत्तम्। आ। ते। मघवन्निति मघऽव
न्। नकिः। नु। न। त्वावानिति त्वाऽवान्। अस्ति। देवता। विदानः।
न। जायमानः। नशते। न। जातः। यानि। करिष्या। कृणुहि। प्रवृ
द्धेति प्रऽवृद्ध॥६९॥ तत्। इत्। आस। भुवनेषु। ज्येष्ठम्। यतः। ज

शे। उग्रः। त्विषन्नृम्ण इति त्विषिऽनृम्णः॥ सद्यः। जज्ञानः। नि। रिणाति। शत्रू
न्। अनु। यम्। विश्वे। मदन्ति। ऊमाः॥७०॥ इमाः। उ। त्वा। पुरूवसो।
पुरूवसो इति पुरुऽवसो। गिरः। वर्द्धन्तु। याः। मम॥ पावकवर्णा इति पाव
कऽवर्णाः। शुचयः। विपश्चित इति विपःऽचितः। अभि। स्तोमैः। अनू
षत॥७१॥ यस्य। अयम्। विश्वः। आर्यः। दासः। शेवधिपा इति शेव
धिऽपाः। अरिः। तिरः। चित्। अर्य्ये। रुशमे। पवीरवि। तुभ्य। इत्। सः।

अज्यते। रयिः॥७२॥ अयम्। सहस्रम्। ऋषिभिरित्यृषिऽभिः। सह
स्कृतः। सहस्कृत इति सहःऽकृतः। समुद्रइवेति समुद्रःऽइव। पप्रथे। स
त्यः। सः। अस्य। महिमा। गृणे। शवः। यज्ञेषु। विप्रराज्य इति विप्रऽ
राज्ये॥७३॥ ७॥ ७॥ इति शुक्लयजुः काण्वसंहितायां पदपाठे द्वा
त्रिंशोध्यायः॥ ७॥ ७॥ हरिः ॐ॥ यत्। जाग्रतः। दूरम्। उदैतीत्यु
त्ऽऐति। दैवम्। तत्। ऊं इति। सुप्तस्य। तथा। एव। एति। दूरंगमम्। इति।

॥७॥
॥२८॥

रम्ऽगमम्। ज्योतिषाम्। ज्योतिः। एकम्। तत्। मे। मनः। शिवसंकल्पमिति
शिवऽसंकल्पम्। अस्तु॥१॥ पितुम्। नु। स्तोषम्। महः। धर्माणम्। तविषी
म्। यस्य। त्रितः। वि। ओजसा। वृत्रम्। विपर्वमिति विऽपर्वम्। अर्दयत्।
